
श्रीमते रामानुजाय नमः श्रीवेदपुरुषाय नमः

श्रीपरवासुदेव श्रीलक्ष्मीहरिग्रन्थमालाया प्रथमपुष्परूपा

श्रीवैकुण्ठचन्द्रिका





श्रीसुदर्शनाचार्यकृपापात्रैः श्रीपराङ्कुशाचार्यैः
(श्रीशठकोप यतिराज रामानुज जीयरस्वामिपादैः)
।।प्रसादिता।।

प्रकाशकः
यदुनन्दनः (गोविन्दः)
श्रीनिवास रामानुज दासानुदासः

श्रीमते रामानुजाय नमः श्रीवेदपुरुषाय नमः श्रियै नमः श्रीधराय नमः

श्रीलक्ष्मीहरिपरवासुदेवग्रन्थमालायाः प्रथमपुष्परूपा

श्रीवैकुण्ठचन्द्रिका

श्रीमत्परमहंसपरिव्राजकाचार्योभयवेदान्तप्रवर्तकाचार्यैरनन्त श्रीविभूषितैः

श्रीत्रिदण्डिशठकोपयतिराजै रामानुजजीयर स्वामिभिः

(श्रीपराङ्कुशाचार्यः) प्रसादिता ॥

प्रकाशकः

(गोविन्द [illegible] श्रीनिवास रामानुजदासानुदासः)

श्रीमते रामानुजाय नमः। श्रीवेदपुरुषाय नमः।

श्रीलक्ष्मीहरिपरवासुदेवग्रन्थमालायाः प्रथमपुष्परूपा

श्रीवैकुण्ठचन्द्रिका

श्रीमत्परमहंसपरिव्राजकाचार्योभयवेदान्तप्रवर्नकाचार्यैरनन्त-
श्रीविभूषितैः श्रीत्रिदण्डिशठकोपयतिराजै रामानुजजीयर -
स्वामिभिः (श्रीपराङ्कुशाचार्यः) प्रसादिता

सम्पादकोऽक्षरसमायोजकः प्रकाशकश्च

(गोविन्द) यदुनन्दन श्रीनिवास रामानुजदासानुदासः।

विक्रमादित्यसंवत् २०६७

श्रीरामानुजसंम्वत् ९९४ धनुर्मासमहोत्सवः

श्रीवैष्णवपरिषन्नेपालस्य विक्रमवत्सरम्य नेत्रव्योमरसरामाब्दे-
मार्गमास सम्पन्नस्याधिवेशनानुसारेण
स्वीकृताः सम्पादनमण्डलपदाधिकारिणः।
१ श्रीकेशवाचार्या माइधारभापावास्तव्याः।
२ श्रीदेवराजाचार्या धनगढी कैलाली वास्तव्याः।
३ श्रीराघवेन्द्रचार्याः काष्ठमाण्डपब्रन्निसपुतली वास्तव्याः।
४ श्रीगोविन्दाचार्या विराटनगर मोरङ्वास्तव्याः।
५ श्रीरामानुजाचार्याःशनिश्चरमोरङ्वास्तव्याः।

तृतीयसंस्करणः

प्रति ११११

अन्यश्रीवैष्णवीयपुस्तकप्रकाशनार्थसहयोगस्वरूपम्मूल्यम् ने० १२५।

मुद्रकः भागवतमुद्रणालय

श्रीमद्गोष्ठीपुरीजातं भाष्यकारमनोऽनुगम् ।
श्रीशठारिदयापात्रं श्रीवेङ्कटमुनिं भजे ॥

वाधुलवंशकलशाम्बुधिपूर्णचन्द्रं
श्रीश्रीनिवासगुरुवर्यपदाब्जभृङ्गम् ।
श्रीवाससूरितनयं विनयोज्ज्वलन्तं
श्रीरङ्गदेशिकमहं शरणं प्रपद्ये ॥

श्रीभगवद्रामानुजाचार्य संप्रदाय के अनुसार स्वरूपतः कर्मानुष्ठान का त्याग नहीं है अपितु फलसंग एवं कर्तृत्वका त्याग है । "कुर्वन्नेवेह कर्म्माणि जिजीविषेच्छत गूँ समाः" इस प्रमाणके अनुसार स्वरूपानुरूप कर्म अवश्य कर्तव्य है, स्वरूपविरूद्ध त्याज्य है ।

जिस प्रकार राजा के द्वारा निर्मित बाधको तोडने वाला राजभृत्य दण्डका भागी होता है , वैसे ही ईश्वर के द्वारा विहित कर्मो को त्यागने वाला भगवन्निग्रहका पात्र बनता है ।

स्वरूपानुरूप कर्मानुष्ठान की महत्ताको दृष्टि में रखते हुए अथक परिश्रम से श्रीपरांकुशाचार्यजी ने श्रीवैष्णवो के हित के लिए नेपाली भाषानुवाद सहित श्रीवैकुण्ठचन्द्रिका नामिका पुस्तिकाको प्रकाशित किया है । आशा है इस परिश्रम को भागवतवृन्द सफल बनाते हुए "श्रुतिः स्मृतिर्ममैवाज्ञा" के अनुसार भगवद् आज्ञा पालनरूप कैंकर्यनिष्ठ बनेंगे ।

दिनाङ्क २.७.१९७०

श्री श्रीगोवर्धन रङ्गाचार्यजी महाराज
श्रीरंग मन्दिर, वृन्दावन ॥

॥ दशपिण्डादानविधिको लागी आवश्कसामान ॥

दशदिनपर्यन्त अखण्डदीप, खिरकापिण्ड कूर्चहरू अर्घ्यादिकासामान दुना पात शर्करा भृङ्गीराज उनकोवस्त्र वा धागो पवित्रचामल दूबो गोमूत्र गोमय गोदुग्ध यज्ञोपवीत तिल कुश समिधा हर्दी गोघृत पञ्चगव्य अर्काले टिपेका तुलसी सर्सिऊँ दियो धूप बत्ती नैवेद्य पुष्प लावा सुनको तार चाँदीको कोदालो आदि ।

मंगलाचरणम्

श्रीमन्नारायणं वन्दे सर्वसद्बुद्धिदायकम् ।
प्रपन्नजनभर्तारं सर्वलोकस्य नायकम् ॥

यस्य प्रसादकलया बधिर:श्रृणोति पङ्गु:प्रधावतिजवेन च वक्ति मूक: ।
अन्ध:प्रपश्यति सुतंलभते चबन्ध्या तन्देवदेववरदं शरणं गतोस्मि ॥

सानो विज्ञप्ति–

"कुर्वन्नेवेह कर्माणि, जिजीविषेच्छत गूँ समा:"" इत्यादि श्रुति र " वेदा: प्राणा भगवतो वासुदेवस्य चात्मन: । तदुक्तकर्माकुर्वाण: प्राणहर्ता भवेद्धरे:" ॥ इत्यादि स्मृतिद्वारा पनि विशिष्ट जनलाई कर्म अनिवार्य भयेको र नगरेमा भगवत्प्राण छेदन तुल्य प्रत्यवाय पनि सिद्ध हुनाले "श्रुति: स्मृतिर्ममैवाज्ञा यस्तानुल्लङ्घ्य वर्तते । आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णव: " इत्यादिका अनुसारले भगवदाज्ञा पालनरूप कैंकर्यका लागि विशिष्ट विधिले नै गर्न अति आवश्यक हुदा र फेरी ग्रन्थहरू चाहिं कलिका प्रभावले कुनै देशविशेषमा लुप्तप्राय हुन लागेका हुदा, उनै प्राचीन भगवच्छास्त्रलाई अन्वेषण गरी विशेष पठित नभएका भागवतहरूको कार्य चलोस् भनेर नेपाली भाषामा अनुवाद गरी न अति संक्षेप न अति विस्ताररूपले प्रकाश गरिदैछ यी वैकुण्ठचन्द्रिका नामकी पुस्तिका ।

मनमानि र अनधिकारको विधि अकर्तव्य हुदा र स्वरूप त्यागदा स्वरूपनाशरूपी आपत्ति हुने हुदा यो विधिनै अतिआवश्यक छ । कमलवासी भ्रमरा झै गुणग्राही भागवतहरूमा उपयोग होस् भनि यो ग्रन्थ प्रकाशका लागि प्रयास गरियो । वैकुण्ठोत्सव नामको पुस्तक जुन्–जुन् ग्रन्थका आधारमा थियो उनै उनै ग्रन्थ अन्वेषण गरि उसका क्रमलाई नछोडी वैकुण्ठोत्सव नामक पुस्तिकामा छुटेका विषयलाई पनि उद्धृत गरी जसमा प्रपन्नलाई अधिकार भयेका विषय सबै राखी प्रकाश गरियेको छ । उस पुस्तिकामा बहुत विषय छुटेका र भाषान्तर अपठित जनहरूले विपरीत कार्य गर्ने भयेकाले यो पुस्तक अति आवश्यक भयेको हुँदा प्रकाश गरियो ।

अधिकार नभयेका विषय ग्रहण गर्दा र अधिकार भयेका विषय छोड्दा पनि स्वरूपविरुद्ध हुनाले ठीक अधिकार भयेका विषय मात्र राखियेका छन् । असूयाले रहित भयेका वैष्णवको मनोहर हओस् ॥ शुभं स्यात् ॥

❖द्वितीयादिवृत्तिको भूमिका❖

श्रीमन्नारायण भगवान्का असीम कृपा कटाक्षले दाक्षिणात्य स्वनाम धन्य उभयवेदान्ताचार्य श्रीगोपालाचार्य स्वामीजीबाट उभय वेदान्तको स्वाध्याय र श्रीवैष्णवीय सत्कर्मको शिक्षा पनि श्रीआचार्यका हार्दिक परिपूर्ण कृपाले प्राप्त गरि अरु अनेक दाक्षिणात्य विद्वान्हरू र उत्तरमा बस्ने धेरै श्रीवैष्णवाचार्यहरूबाट पनि विशेष श्रीवैष्णवीय कर्मकाण्डको अध्ययन विविधस्थानमा रहि प्राप्त गरेको थियें । सदाचार्यको आज्ञानुसार नेपालमा आउने वित्तिकै श्रीवैष्णवीय नित्य नैमित्तिकादि कर्मकाण्डको आवश्यकतादेखि आफूले पूर्वोक्त सबै आचार्यहरूको अनुकम्पाबाट संग्रहीत विषयलाई आवश्यकताका क्रमले संध्यावन्दनादिदेखि प्रारम्भ गरि विविध ग्रन्थ लेखियेका मध्ये श्रीवैष्णवीय और्ध्वदैहिक कर्म गर्न संस्कृत भाषामा श्रीवैकुण्ठ चन्द्रिका नामको पुस्तक लेखेर प्रकास गर्न तयार भयेको थिएं । सोही पुस्तक पूर्व माईधार निवासी अनन्त श्री विभूषित श्रीकमलनयनाचार्य योगिराज स्वामीजी सवारी भयेर रितौदीमा वसेका वेला आज्ञा भयो कि यो पुस्तकसबैले बुझ्ने गरि नेपाली भाषामा लेख्नपाए हुन्थ्यो, कसैको पनि मृत्युहुँदा विद्वान् भएका ठाउमा मात्र हुँदैन विद्वान् नभएका ठाउमा पनि हुनसक्तछ । पुरोहित पठित नभएका ठाउमा कर्म गर्न जान्दैनन् र अशुद्धगराउने संभावना हुन सक्तछ । त्यसो भएको हुनाले यो संस्कृतलाई नेपाली गरौ भन्ने अज्ञा भएको हुँनाले र अरु श्रीवैष्णवलाई सोद्धा श्रीस्वामीजीले आज्ञा गर्नुभएको कुरा ठीकहो भने पछि नेपाली भाषामा अति संक्षिप्त रूपले अनुवाद गरेर श्रीवैष्णवहरूले प्राय पञ्चसूक्तादि मन्त्रहरू कण्ठपारेकै हुन्छ भन्ने संझी आवश्यक स्थानमा आउने पञ्चसूक्तादि मन्त्रहरू न राखि श्रीवैकुण्ठ चन्द्रिकानामक पुस्तकहरू छपाई श्रीवैष्णवहरूका हातमा पुऱ्यायियो । त्यहाँ भन्दा पहिले नेपाली समाजमा प्राय कुनै पनि श्रीवैष्णवविधिका

कर्मकाण्डका पुस्तक थिएनन्। अब ती पुस्तकहरूसमाप्त भएका र मागबढ्दै गएको देखी द्वितीय संस्करण मुद्रण गर्ने चर्चा हुँदा धेरै जना विद्वान् पण्डितहरूले भन्नुभयो कि पहिले लेखिएको संस्कृत कापी तयारछ भने त्यसै लाई प्रकाश गरौं भनेर वहाँ हरूले गरेको आग्रहलाई मध्यनजर गरी पूर्वोक्त संस्कृतमा लेखिएको प्रूफ तयार गर्न विराटनगर वास्तव्य गोविन्दजीलाई दिएको छ।

गोविन्दजीले प्रूफ तयार गरेको सोही पूर्वोक्त पुस्तक श्रीवैष्णव परिषद नेपाललाई प्रकाशगर्न दिएकोछ॥

पराङ्कुशमचार्य ॥

श्रीमते रामानुजाय नमः

शुभसम्मतिः

मूले निविश्य निगमान्तमहाद्रुमाणां मुष्णान् प्रतारकभयं धृतनैकदण्डः।
रंगेशभक्तजनमानसराजहंसो रामानुजः शरणमस्तु मुनिः स्वयं नः॥

वैदिकसिद्धान्तनिष्ठागरिष्ठानां परमभागवतोत्तमानां श्रीवैष्णवानां सन्निधौ सादरनिवेदयामः। लोके समेषां वस्तूनां संस्कारेणैव परिशुद्धिर्विधियत इति विदन्त्येव विपश्चितः। अचेतनपदार्थानामुपयोगोऽपि भिन्नभिन्न संस्कारैः संपद्यते। शरीरविशिष्टस्य मानवस्यापि शैशवादेव वेदविहितास्संस्काराः सन्ति भूयांसः। षोडशसंस्काराः सुप्रसिद्धा एव।

प्राकृतशरीरस्य विसर्जनानन्तरमपि संस्कारोऽनिवार्यः। स एव षोडशसंख्याकस्संस्कारः। श्रीवैष्णवसम्प्रदाये दीक्षितस्य शरीरिणश्चरम संस्कारोपि महता गौरवेण संपाद्यते। शरणागतिनिष्ठस्य साक्षात् गन्तव्य देशश्च श्रीवैकुण्ठ एव। अर्चिरादिमार्गेणागतो जीवस्तावन्मुक्तशब्देन सादर सम्भाव्यते। भगवद्भक्तिनिष्ठस्य संस्काराश्च विलक्षणा भवन्ति।

सम्प्रति प्रस्तूयमानोऽयं वैकुण्ठचन्द्रिकाख्यो ग्रन्थः प्रायः षड्त्रिंशद्वर्षेभ्यः पूर्वमेव श्रीमद्वेदमार्गप्रतिष्ठापकैरुभयवेदान्तप्रवर्तकैरधिगतपरमार्थैर्मान्यतमैः

श्रीमत्परमहंसपरिव्राजकाचार्यैः श्रीत्रिदण्डिपराङ्कुशजीयरस्वामिपादैर्नेपाली भाषायां संकलय्य प्राकाश्य नीतः श्रीवैष्णवजगति महोपकारकस्संजात इति स्मरन्त्येव विपश्चिन्मणयः। स एव ग्रन्थः सम्प्रति श्रीजीयरस्वामिपादानामेवादेशेन पूर्वमेव तैः सस्कृतभाषायां संकलय्य स्थापितपाण्डुलिप्यानुसारेण परिस्कृतः परिवर्धितश्च प्रकाशपथं नीयत इति सविनयं निवेदयामः।

द्वितीयमुद्रणरूपेण प्रकाश्यमानेऽस्मिन् ग्रन्थे क्रियाकलापस्संस्कृतभाषया एव निर्दिष्टो विद्यते। मन्त्रभागश्च तत्तत्प्रकरणेषु पाथर्वेत्यनैव सर्वत्र निर्दिष्टो ग्रन्थविस्तरभीतिं विहाय बुभुत्सूनां सौकर्याय चरमसंस्कारप्रयोगः सामग्र्येणात्र विद्यते। नारायणबलिः सूक्तादयो जितन्ते स्तोत्रादयो विषयाश्च भूयांसो ग्रन्थेऽस्मिन् संयोजिता विलसन्ति। सर्वाङ्गसुन्दरोऽयं ग्रन्थो सर्वदा सर्वथा च श्रीवैष्णवजगतो महोपकाराय कल्पत इति सुदृढं विश्वसिमः।

परमदयालूनां बहुग्रन्थनिर्माणमुखेन कृतोपकृतीनां श्रीमत्परमहंसपरि व्राजकाचार्याणां ग्रन्थसंग्रहीतृणां श्रीजीयरस्वामिपादानामादेशमनुसरताविराट नगरवास्तव्येन श्रीमता गोविन्दाचार्येण भूयांसं परिश्रमं विधाय ग्रन्थोऽयं सर्वाङ्गसुन्दररूपेण पुनः प्रकाश्य विद्वज्जनानां करकमलेषु सादरं समर्प्यत इति प्रत्यक्षेणैव विदितवृत्तान्ताः प्रहर्षस्य परां कोटिमनुभवामः।

ग्रन्थोऽयमाचन्द्रार्कम्महतां महोपकाराय भूयादिति भगवन्तमर्थितार्थपरि दानदीक्षितं हस्तिगिरिनाथं संप्रार्थयमानाः विरिरंसामः।

श्रीकृष्णमाचार्यः गैडाकोट (नवलपरासी)

॥ ब्रह्ममेधविधिको लागी आवश्यकसामान ॥

कर्मपात्र, कुश, तिल, जौ, चन्दन, पुष्प, पीताक्षत, दीयो, वत्ति, जनै ३, माटाका १७ ओटा घडा, शव राख्ने केराका पात, रङ्गवल्लीका लागि आटा, हर्दि, धान, चामल, घ्यू , पञ्चगव्य, दुना, वोहोता, टपरी, वत्ति, अगरवत्ति, लावा, चानचुने पैसा, ओखल मूसल, काँचो पाना हर्दि, अमलाको पात या चूर्ण, पञ्चपल्लव, विमान सजाउने वस्त्र, माला, बाँस, अग्निलाने वर्तन, समिधा, सागर मा लाने वञ्चरो, खुकुरी, कोदालो, तुलसीकाकाठ त्रिकाष्ठिका श्रीखण्ड आदि सुगन्धित लकडी त्रिकाठी पिण्डको पायस नीमकापात इत्यादि ॥

किञ्चिद्वक्तव्यम्

सर्वेष्वपि कर्मसु तेषां पूर्णतायां कर्मान्ते मध्ये वापि कर्तव्यतायां सर्वैकमत्यं दृश्यते।स्मार्तैः संकलितेषु साम्प्रतं दृष्टचरेषु विविधेषु हवनपद्धतिषु गृह्यसूत्रभेदेन निगमागमभेदेन चेति कर्तव्यतायां नैकमत्यं संभवमस्माकं प्रपन्नानान्तु स्मार्तसंकलितग्रन्थानुरूपेण पूजनं हवनं शास्त्रविरुद्धं स्वरूपविरुद्धञ्च भवत्येव नात्र मनागपि संदेहावकाशः। अतो वैष्णवीयपाञ्चरात्रागमानुसारनिर्दिष्टमार्गानुरूप वैदिक पद्धतिमवलम्ब्यसर्वास्वपि श्रीवैष्णवगोष्ठीषु सरलतामेकरूपताञ्च कमपिपूर्णपुस्तकसङ्कलनमावश्यकमासीत् तस्य परिपूर्तये श्रीमद्वेदमार्गेत्यादि गुणगणसमलकृतैः श्रीशठकोपरामानुज जीयरस्वामिभिः सङ्कलितं हवनपद्धति नामकं पुस्तकं पूर्वम्वाराणस्यां सम्पाद्य प्रकाशितम्। तत्रापि प्रकाशने सम्पादने च किञ्चिन्न्यूनतां विलोक्य पुनः संशोध्यप्रकाश्यत इति मोदमावहते दासस्यास्यचेतः तत्रापि श्रीवैष्णव परिषद् द्वारा प्रकाश्यत इति सर्वश्रीवैष्णव संमतं भवत्येवेति मन्ये। जीयर स्वामिभिः सम्पादितेष्वन्येषु सर्वेष्वपि कर्मविषयकग्रन्थेषु शुद्धतां सरलतां यथार्थताञ्च सम्यक् संपाद्य तानि पुस्तकानि प्रकाशयितव्यानि भवन्ति चेत् शोभनमिदं कार्यम्भवेन्नाम। श्रीवैष्णवपरिषदः तादृशप्रकाशनकार्येषु सम्मतमस्त्येव किमधिकं श्रीवैष्णवविशिष्टाद्वैत सिद्धान्त निष्ठागरिष्ठानां शास्त्रैकलोचनानां विदुषाम् ।

प्रस्तोता भगवद्भागवताचार्यदासानुदासः देवराज श्रीनिवासरामानुजदासः अध्यक्षः–श्रीवैष्णवपरिषन्नेपालस्य ॥

एघारदिनको सामान

तेल वत्ती नैवेद्य आचमनी धान चामल कूर्च कुश सर्वत ताम्बूल दक्षिणा ३६५ घडा वा दुना पलाशकापात कलशादिका वस्त्र धागो पूजाको सबै सामान हवनकोसामान गोदुग्ध गोदहि गोघृत गोमूत्र गोमय सिद्धान्न समिधा ईटा वालुवा खीरान्न फलादि।

श्रीमते रामानुजाय नमः

उद्‌गारः सप्रकर्षप्रहर्षनिवेदनम् —

कर्मनिष्ठा ज्ञाननिष्ठा भक्तिनिष्ठा महानुभावाः सर्वविदितः श्रीवैष्णवसमाज आनुकूल्यकर्मकाण्डविधेः संकलन पुस्तकाभाव इति ।

सम्प्रति प्रस्तूयमानोऽयं वैकुण्ठचन्द्रिकाख्यो ग्रन्थः प्रायः षड्त्रिंशद्वर्षेभ्यः पूर्वमेव श्रीमद्वेदमार्गप्रतिष्ठापकैरुभयवेदान्तप्रवर्तकैरधिगतपरमार्थैर्मान्यतमैः श्रीमत्परमहंसपरिव्राजकाचार्यैः श्रीत्रिदण्डिपराङ्कुशजीयरस्वामिपादैर्नेपाली भाषायां संकलय्य प्राकाश्य नीतः । श्रीवैष्णवजगति महोपकारकस्संजात इति स्मरन्त्येव विपश्चिन्मणयः ।

स एव ग्रन्थः श्रीजीयरस्वामिपादानामेवादेशेन पूर्वमेव तैः संस्कृत भाषायां संकलय्य स्थापितपाण्डुलिप्यानुसारेण परिस्कृतः परिबर्धितश्च । इदानीं विदुषां प्रकाशनकार्यस्यानुमोदनाय सप्तानां जनानां समितिगठिता तस्याः समितेः सत्प्रयासेन प्रकाशपथ नीयत इति मोदमावहते चेतः ॥

ग्रन्थोऽयं सर्वदा सर्वथा च श्रीवैष्णवजगतो महोपकाराय कल्पत इति सुदृढं विश्वसिमः । शुभं स्यात् ॥

श्रीराघवेन्द्राचार्यः
भू० पू० अध्यक्षः- श्रीवैष्णवपरिषन्नेपालस्य
श्रीवेंकटेश मन्दिर, बत्तीसपुतलि, काठमण्डपः

बाँर र तेह्रवाँदिनको सामान

सकेसम्मचाँदीका पञ्चपात्र कपूर तुलसी १२कुशको ब्रह्मकूर्च खीरान्न गाईको दूध दधि घृत गोमूत्र गोमय शर्करा नैवेद्य फल चामल तिल यव प्रणिता प्रोक्षणी सुनकोतार धूप वाती अग्निस्थापनाको सबैसामान भक्ष्य भोज्यादिपदार्थ ताम्बूल छाता कपडाकाजूत्ता वस्त्र आभूषण जलपात्र दक्षिणा हर्दि शैय्याकोसबै सामानगाई द्विजदम्पती वाचकका लागीदानसामानआदि ।

श्रीमते रामानुजाय नमः

"उभाभ्यामेव पक्षाभ्यां आकाशे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते पुरुषोत्तमः ॥"

वेदान्तविद्याविद्योदितानन्तकरणैः चतुर्थाश्रमं सुशोभयद्‌भिः श्रीमद्वेद-मार्गेत्यादिसकलगुणगणसमलङ्कृतैः तत्र भवद्‌भिरनन्तश्रीविभूषितैः श्रीपराङ्कुश (शठकोप) यतिराजरामानुजजीयरस्वामिवर्यैः प्रथमं संकलिता प्रकाशिता वैकुण्ठचन्द्रिका पुस्तिका । इदानीं तेषामेव श्रीस्वामिवर्याणामाज्ञया विराट नगरमलङ्कुर्वता गोविन्दाचार्येण द्वितीयावृत्तौ यत्र तत्र विविधेष्वागमग्रन्थेषु प्रकीर्णान् श्रीवैकुण्ठमहोत्सवविषयान् अन्यान्यपि संयोज्य सर्वथा सर्वोपयोगिनीं विधाय प्रकाशपदवीं नीयते सेयं श्रीवैकुण्ठचन्द्रिका । तस्मादियं पाञ्चरात्र संहितानुसा-रिणी मुमुक्षुभिः संस्कृतात्मभिः श्रीवैष्णवैरुपादेया भविष्यतीति मन्ये ।

भगवच्छरणापन्नस्य जीवस्य श्रीवैकुण्ठगमनमभिलक्ष्य श्रीवैकुण्ठ महोत्सवमामनन्ति श्रीवैष्णवाः तत्कर्मणि मार्गदर्शिका सेयं भविष्यत्येव । अस्याः विद्वत्समाजे समादरं स्यात् भक्ताभागवताश्चोपकृता भवेयुरिति श्रीभगवन्तमहमभ्यर्थये ।

नेपालराज्ये झापामण्डले माईधारनामकग्रामे सतासीधाम्निस्थितस्य श्रीलक्ष्मीनारायणमन्दिरस्य तथा श्रीयोगिराज श्रीकमलनयनाचार्याश्रमस्या-ध्यक्षक विदुषामनुचरः केशवाचार्यनामा वैष्णवदासः ॥

❖संपादकीयम्❖

वैकुण्ठचन्द्रिका नाम्नीयं पुस्तिका श्रीमद्वेदमार्गप्रतिष्ठापकैरुभयवेदान्त प्रवर्तकैरधिगतपरमार्थैर्मान्यतमैः श्रीमत्परमहंसपरिव्राजकाचार्यैः श्रीत्रिदण्डि पराङ्कुशजीयरस्वामिपादैःपूर्वमेवास्मिन् विषय उपलब्धान्प्रामाणिक ग्रन्था-नालोड्य तेभ्यः सारमुद्धृत्य श्रीवैष्णवाचार्याणामुपदेशमाचारञ्च हृदि निधाय श्रीवैष्णवसमाजस्योपकाराय संगृहीताऽसीत् । देववाण्यां लिखिता सेयं पुस्तिका

श्रीमत्परमहंसपरिव्राजकाचार्यैः श्रीजीयरस्वामिपादैरस्मदाचार्यवर्यैर्दासाय प्रदत्ता । तत्र भवतां श्रीचरणानामाज्ञानुसारेण सुसांख्ययन्त्र अक्षराणि संयोज्य कर्मकाण्ड एकरूपतां सम्पादनाय श्रीवैष्णवपरिषद्युपस्थापिता । तस्याः परिषदः निर्णयानुसारेणेयं पुस्तिका प्रकाशिता ।

अस्याः पुस्तिकायाः संशोधनकार्य एभिः विद्वद्‌भिराचार्यैः सहयोगः प्रादायि तान् प्रति कृतज्ञतां व्याहरामि ।

अस्याः प्रकाशनाय द्रव्यसहयोगकर्तृभ्यो वदान्यशिरोमणीभ्योमहानुभावेभ्योऽनेकाननेकान् साधुवादानर्पयामि । सुचारुरूपेण कर्मकाण्ड सम्पादनायेयं पुस्तिका उपयोगिनी भविष्यतीति विश्वसिमि । सुसांख्ययन्त्रे दत्तावधानदर्शनेऽपि यत्रतत्र खालित्यानिस्युरेव तानि वरीयांसो विद्वांसरेनमज्ञबालकं विभाव्य स्वयं संशोध्य पठिष्यन्तीति विष्वसिमि ।

विज्ञेषु किमधिकम् ॥

श्रीमद्‌भगवद् भागवताचार्याणां विधेयोऽनुचरश्च दासानुदासः


यदुनन्दन (गोविन्द) श्रीनिवास रामानुजदासः


विराटनगर- ३ सङ्कर्षणनगरी (शंकरपुरः)


॥ वैकुण्ठोत्सवकोसामान ॥


श्री तिलक जनै सुपारी पुष्प माला तुलसी माटाका कलश पीताम्बर वस्त्र सुवर्ण प्रतिमा धातुको कलश थाली दुना टपरा पारायणकालागीपुष्पकहरू गोदुग्ध गोदधि गोघृत मह कपूर विप्रवरणको सामान धोती गञ्जी गामचा पञ्चपात्रा आचमनी आसन श्रीखण्डचन्दन रातो सोतो पहेलो वस्त्र धान चामल यज्ञको सबै सामग्री तिल जऊ ऊखु लावा खुजुरा पैसा अनेककिसिमका पक्वान्न फल रेशमीच्यादर पञ्चकटौरी पतद्‌ग्रह लोहोटा थाली कटौरा खाँम अगरबत्ती सलाई धेरै कुशकाकूर्चहरू पान ल्वाँग सुकुमेल लोकल गाईका दूधमा बनेको खीर यज्ञको सबैसामान काजु किस्मिस बदाम आदि पञ्चमेवा धूप कोइला कोइञ्याटो आरती सलाई आदि अरु आवश्यक सामान आचार्य लाई सोधेर तयार जुटाउनु ॥


पञ्चगव्यः षोडशकलशस्थापनविधिः दिशाबोधः










दशपिण्डदानविधिवेदिका
पिण्डवेदिः
हवनवेदिः
पूजावेदिः
सपिण्डनपिण्डदानविधिवेदिका
वासुदेवः
सकर्षणः
प्रद्युम्नः
अनिरुद्धः
हवनवेदिः
पाथेयपिण्डदानविधिवेदिका
वासुदेवः
सकर्षणः
हवनवेदिः
अनिरुद्धः
प्रद्युम्नः
मध्यमशोडषपिण्डदानविधिवेदिका
हवनवेदिः
हवनवेदिः
पूर्वः
दक्षिणः
उत्तरः
पश्चिमः
उत्तमशोडषपिण्डदानविधिवेदिका दिशाबोधः

मङ्लाचरणम् ॥

श्रीशैलेशदयापात्रं धीभक्त्यादि गुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥
लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥

योनित्यमच्युतपदाम्बुजयुग्मरुक्म व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥
मातापितायुवतयस्तनयाविभूतिस्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्यनः कुलपतेर्वकुलाभिरामं श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥
भूतं सरस्यमहदाह्वयभट्टनाथ श्रीभक्तिसारकुलशेखरयोगिवाहान् ।
भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमिश्रान् श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥
हे नारायण भो यथाहि करुणादिष्टं त्वदीयं हरे
यज्जीवेश्वरयोः स्वरूपसदृशं सौख्यं भवेन्माधव ।
तत्वार्यार्थनियोजको भव जगन्नाथ प्रधो श्रीपते
नित्यं त्वत्परिवारनित्यपुरुषैः स्त्रीभिश्च मुक्तैः परैः ॥

सार्धन्ते भगवन् सुखानुभवनंकुर्वीत मां वत्सल
सम्बन्धश्च निरन्तरं तरुणतां यायात्स सर्वात्मकः ।
नित्यं मङ्गलमस्तु ते च भगवन् त्वद्दिव्यधाम्नि प्रिये
नीत्वा मां तव चेषणा यदि हरे धन्यायितं शं कुरु ॥

अकारार्थ स्वामिन् सफलयतु दासं प्रति हरे
उकारार्थः सिद्धो भवतु सततं निर्व्यवहितम् ।
मकारार्थम्बालं नयतु तव धाम्नि प्ररुचिरे
सदा नित्यैर्मुक्तैः परिकलितमोदं कुरु सखे ॥

अथ विषयप्रारम्भः

अथ परमपदगमनोत्सुकं पवित्रस्थाने निधाय गोमयोदकेनोपलिप्तायां भूमौ तिलकुशान् शुद्धवस्त्राण्यास्तीर्य तुलसीच्छायायां स्थापयेत्। शिरस्सन्निधौ शालग्रामं निधाय श्रीपादतीर्थम्पाययित्वा पुनः पुनर्भगवत्तीर्थञ्च पाययेत्। ततः प्रधानदानानि शक्तश्चेत् स्वयं तानि कुर्यात् नो चेत् पुत्रादयो दापयेयुः।

कर्मपात्रविधानम्

आदौ कर्मपात्रे शंखचक्रे विलिख्य शंखचक्रमुद्रे प्रदर्श्य तमभिमन्त्रयेत्-

ॐ यद्देवाद्देवहेडनन्देवासश्चकृमावयम्। अग्निर्म्मातस्माद्देनसो विश्वान्मुञ्चत्व ग्ँ हसः॥ ॐ यदि दिवा यदि नक्तमेना ग्ँ सि चकृमावयम्। वायुर्म्मातस्माद्देनसो विश्वान्मुञ्चत्व ग्ँ हसः॥

ॐ यदि जाग्रद्यदिस्वप्न एना ग्ँ सि च कृमावयम्। सूर्यो मातस्मा द्देनसो विश्वान्मुञ्चत्व ग्ँ हसः॥ कुशपवित्रं निक्षिपेत्-

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्यते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥ जलं निक्षिपेत्-

ॐ शन्नो देवीरभीष्टयऽआपो भवन्तु पीतये। शं योरभिस्रवन्तु नः॥ तिलान् निक्षिपेत्-

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया ,पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥ यवान् निक्षिपेत्-

ॐ यवोसि यवयास्मद् द्वेषो यवयारातीर्द्दिवेत्वान्तरिक्षायत्वा पृथिव्यैत्वाशुन्धन्ताल्लोकाः पितृषदनाः पितृषदनमसि॥ चन्दनं निक्षिपेत्-

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ पुष्पाणि निक्षिपेत्-

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्म्ऽइषाणसर्वलोकं मऽइषाण ॥ अक्षतान् निक्षिपेत् ॐ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत । अस्तोषत स्वभानवो विप्रा न विष्ठया मतीयोजान्विन्द्रते हरी ॥

ततो□भिमन्त्रितजलेन यज्ञीयद्रव्यं यजमानञ्चाभिषिञ्चेत् ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।

यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

दीपपूजनम्

ॐ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टोविश्वा ओषधीराविवेश । वैश्वानरः सहसा पृष्टोऽअग्निः सनो दिवा सपरिषस्पातु नक्तम् ॥

ॐ स्थिरोभव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥ इति दीपं प्रज्वाल्य सम्पूज्य प्रार्थयेत् –

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुवाहवे ।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः

गोदानप्रयोगः

मोक्षधेनुदानविधिः

हस्ते चन्दनाक्षतपुष्पाणि गृहीत्वा प्रार्थयेत्–

ॐ अपश्याम युवतिमाचरन्तीं मृताय जीवां परिणीयमानाम् ।

अन्धेन या तमसा प्रावृतासि प्राचीमवाचीमवयन्नरिष्ट्यै ॥

ॐ मयैतामास्तां भ्रियमाणा देवी सती पितृलोकं यदैषि ।

विश्ववारा नभसा संव्यन्त्युभौनो लोकौ पयसा वृणीहि ॥

ॐ रयिष्ठामग्निं मधुमन्तमूर्मिणमूर्जः सन्तं त्वा पयसोपसंसदेम ।

संरय्या समुवर्चसा स च स्वानः स्वस्तये ॥

ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्रणुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ठ ॥
ॐ ये जीवा ये च मृता ये जाता ये चजन्याः । तेभ्यो घृतस्य धारयितुं मधुधाराव्युदन्तीम् ॥ इति गोसूक्तं पठित्वा गोरुपरि पुष्पाणि समर्प्य–

ॐ सुं सुरभ्यै नमः । इति मन्त्रेण पुष्प अक्षता गन्ध वस्त्र नैवेद्यादिभिः गां पूजयित्वा आकृष्णोनेति मन्त्रेण ब्राह्मणं पूजयेत् ।

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॥ततः कर्मपात्रोदकेन गां प्रोक्षयेत्–

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ॐ इरावती धेनुमती हि भूत गू सूयवसिनीमनवेदशस्या । व्यस्कभ्ना रोदसी विष्णवे ते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा ॥ ततः कर्मपात्रोदकेन गोपुच्छेन यजमानः स्वशिरस्यभिषिञ्चेत् ।

ॐ मनो मे तर्प्पयत व्वाचं मे तर्प्पयत प्प्राणं मे तर्प्पयत चक्षुर्म्मे तर्प्पयत श्रोत्रं मे तर्प्पयत प्प्रजां मे तर्प्पयत पशून्मे तर्प्पयत गणान्मे तर्प्पयत गणान्मे मा वितृषन् ॥ हस्ते जलाक्षतानादाय संकल्पं कुर्यात् ।

हरिः ॐ तत्सत् तत्सत् तत्सत् ॐ विष्णुर्विष्णुर्विष्णुः ॐ अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्ध एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्यद्वितीये यामे तृतीये मुहूर्तेऽष्टमे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमद्रामानुज मुनिप्रादुर्भावात् ९९४ (श्रीमन्नृपति विक्रमार्कराज्याद्वा) वर्तमानेऽमुक–

संवत्सरेऽमुकायनेऽमुकर्तावमुकमासेऽमुकपक्षेऽमुकतिथावमुकनक्षत्रेऽमुकयोगे ऽमुककरणेऽमुकराशिस्थिते श्रीसूर्येऽमुकराशिस्थितेचन्द्रेऽमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथा यथा स्थानस्थितेषु सत्स्वेवं गुणगणविशेषेण विशिष्टायां शुभपुण्यतिथावमुकगोत्रोत्पन्नामुकशर्मा (वर्मा गुप्तो दासो)ऽहं भगवदाज्ञया भगवन्मुखोल्लासार्थम्भगवत्कैंकर्यरूपं रौप्यखुरां ताम्रपृष्ठां सुर्वणश्रृङ्गां मुक्तापुच्छां कांस्यदोहनीं सुरत्नमालिकां दुकूलादिपरिवृतां सोपस्करां रुद्रदैवतां मोक्षधेनुनामिकामिमां गाममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इति जलाक्षतसहितं गोपुच्छं ब्राह्मणकरे दद्यात्- ब्राह्मणश्च कोदादिति पठन् स्वस्तीत्युक्त्वा प्रतिगृह्णीयात्-

ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात् ।
कामो दाता कामः प्प्रतिग्ग्रहीता कामै तत्ते ॥

ततः सुवर्णादिद्रव्यमादाय

अद्य कृतैतद् गोदानप्रतिष्ठार्थं हिरण्यादिद्रव्यममुकगोत्रायामुक शर्मणे ब्राह्मणाय तुभ्यमहं दातुमुत्सृज इति दत्वा प्रार्थयेत् -

ॐ गावो ममैनः प्रणुदन्तु सौर्यास्तथा सौम्याः स्वर्गयानाय सन्तु ।
आत्मानं मे मातृवच्चाश्रयन्तु तथानुक्ताः सन्तु सत्याशिषो मे ॥

ॐ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः ।
सर्वपापहराधेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥ इति गां ब्राह्मणञ्च प्रदक्षिणीकृत्याभिवादयेत् । विप्रश्च गोपुच्छेन यजमानमभिषिञ्चेत् ।

ॐ द्यौः शान्तिरन्तरिक्ष गूं शान्तिः पृथिवीशान्तिरापः शान्ति-रोषधयः शान्तिः । वनस्प्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व गूं शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ एवं प्रकारेण पापापनोदर्णापनोदप्रायश्चित्तोत्क्रान्तिधेनवः पूर्वोक्तविधिना तत्तन्नामभिः संकल्प्य देयाः ।

पापापनोदधेनुदानसमये भगवदाज्ञया भगवन्मुखोल्लासार्थं पञ्चधेन्वन्त-रगतां सोपस्करां पापापनोदनामिकामिमां गां रुद्रदैवतामिति वाक्यं योजनीयमेवं सर्वत्र योजनीयम् ॥ इति गोदानप्रयोगः॥

परमपदगमनोत्सुकजनस्य देहशुद्ध्यादिकं विधाय शुद्धवस्त्रादिकं परिधाप्य तुलसीशालिग्रामसंनिधिन्तन्नीत्वा विष्णुसहस्रनामादिकं श्राव्यग्रन्थं श्रावयेत् । दशदानादिकं च कारयेत् ।

दशदानप्रयोगः

दशदानसमये विशेषयोजनीयं वाक्यम्-

१. गोदाने पूर्वोक्तप्रकारेण संकल्पं कृत्वामुकगोत्रोत्पन्नामुक शर्माहं भगवदाज्ञया भगवन्मुखोल्लासार्थन्दशदानान्तर्गतां सोपस्करां सुवर्णादिदक्षिणायुतां रुद्रदैवतामिमां गाममुकगोत्रायामुकशर्मणे ब्राह्म-णाय तुभ्यमहं सम्प्रददे ।

२. भूमिदानसमये भगवदाज्ञयाभगवन्मुखोल्लासार्थन्दश दानान्तर्गतां बहुशस्यप्रदां वाराहदैवत्यामिमां भूमिमिति ।

३. तिलदानसमये दशदानान्तर्गतानिमान् तिलान् विष्णुदैवतानिति ।

४. हिरण्यदानसमये दशदानान्तर्गतमिमं हिरण्यं वह्निदैवतमिति

५. आज्यदानसमये दशदानान्तर्गतमाज्यमिदं मृत्युञ्जयदैवतमिति ।

६. वस्त्रदानसमये दशदानान्तर्गत इमे वाससी बृहस्पतिदैवते इति ।

७. धान्यदानसमये दशदानान्तर्गतं धान्यं प्रजापतिदैवतमिति ।

८. गुडदानसमये दशदानान्तर्गतं रसवर्यगुडं सोमदैवतमिति ।

९. रजतदानसमये दशदानान्तर्गतमिदं रजतं सोमदैवतमिति ।

गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।
रौप्यलवणमित्याहुर्दशदानान्यनुक्रमात् ॥

१०. लवणदानसमये दशदानान्तर्गतमिदं लवणं सर्वरसोत्कृष्टंसोम-दैवतमिति ॥

❖ त्रयोदशपददानविधिः ❖

अत्र त्रयोदशपदस्यैकपदं कृत्वा त्रयोदश पदानि त्रयोदशेभ्यो ब्राह्मणेभ्यो दद्यान्नोचेदेकपदमेकस्मा एव ब्राह्मणाय दद्यात् । कुशादिकमादाय संकल्पं कुर्यात् । अद्येह पूर्वोच्चारितसंकल्पसिद्धिरस्तु भगवदाज्ञया भगवन्मुखोल्लासार्थं छत्रोपानहासनान्युत्तानाङ्गिरदैवतानि । वस्त्राणि बृहस्पतिदैवतानि कमण्डल्वासनपञ्चपात्राणि वरुणदैवतानि । आमान्नानि भोजनानि च प्रजापतिदैवतानि । मुद्रिकादण्डार्थयज्ञोपवीतानि विष्णुदैवतानि । अमुकगोत्रायामुकशर्मणे श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं संप्रददे ।

त्रयोदशपदानि चेत्- नानानामगोत्रेभ्यो नानानामशर्मभ्यः श्रीवैष्णवेभ्यो ब्राह्मणेभ्यो युस्मभ्यमहं संप्रददे । इति योजनीयम् ॥

❖ मधुपर्कदानम् ❖

दधिमधुकर्पूरसर्पींषि संमेल्य रौप्यपात्रे पत्रपुटके वा संस्थापयित्वा भगवते निवेदयेत् ॥

ॐ योऽसौ भवास्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः ।
गृहाण चैवं सुरलोकनाथ भक्तोपनीतं मधुपर्कसंज्ञम् ॥

निम्नांकितमन्त्रं पठन् पाययेत् ।

छत्रोपानहवस्त्राणि मुद्रिका च कमण्डलुः ।
आसनं पञ्चपात्राणि पदं पञ्चविधं स्मृतम् ॥
दण्डेन ताम्रपात्रेण ह्यामान्नैर्भोजनैरपि ।
अर्थयज्ञोपवीतैश्च पदं संपूर्णतां व्रजेत् ॥

ॐ गृहाण चेमं मधुपर्कमाद्यं संसारनाशनकरं ह्यमृतेन तुल्यम् । नारायणेनरचितं भगवत्प्रियाणां दाहे च शान्तिकरणं सुरलोक-पूज्यम् ॥

ततो नारायणवासुदेवादिमन्त्राणि श्रीपुरुषविष्णुसूक्तादीनि सूक्तानि भागवदादयश्च श्रावणीयाः, रहस्यत्रयार्चिरादिमार्गगुरुपरंपराकौशितकी ब्रह्मानन्दवल्लीजितन्तेस्तोत्रवैकुण्ठगद्यादयश्च श्रावणीयाः ॥ जीवेन शरीरं विसृज्य गमनसमये रोदनादिकं विहाय सर्वैर्बन्धुपुत्रवध्वादिभिः नाराय-णादिभगवन्नामान्यनुसन्धेयानि । देहोत्सर्जनसमये पञ्चकस्तदा न दाह्यो दाह्यश्चेद् विशेषो द्रष्टव्यः ।

❖पञ्चकविधानम्❖

पञ्चपुत्तलापूजनादिकार्यन्तु श्मशानभूमौ कुर्यात् । कुशगर्भयवपिष्टेन पञ्चपुत्तलान्निर्माय ताँश्चोर्णासूत्रेण वेष्टयित्वा प्रेतवाह प्रेतसख प्रेतप-प्रेतभूमिप प्रेतहर्तेति नामभिर्गन्धपुष्पादिभिः पूजयित्वा शवशरीरे न्यसेत् ।

ॐ त्रायन्तामिह देवा त्रायन्तां मरुतां गणाः । त्रायन्तां विश्वा भूतानि यथायमरपाऽसत् ॥ इति प्रथमं प्रेतवाहं शिरसि स्थापयेत् ।

ॐ इमं मे वरुण श्रुधीहव मद्या च मृडय । त्वामवस्युराचके ॥ इति द्वितीयं प्रेतसखं नेत्रयोः स्थापयेत् ।

ॐ शन्नऽअजऽएकपाद्देवोऽअस्तु शन्नोहिर्बुध्न्यः शंसमुद्रः । शन्नऽअपां नपात्येरुरस्तु शन्नः पृश्निर्भवतु देव गोपाः ॥ इति तृतीयं प्रेतपं वामकुक्षौ स्थापयेत् ।

ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आषिञ्चतु प्रजापतिर्धाता गर्भन्दधातु ते ॥ इति चतुर्थं प्रेतभूमिपं नाभौ स्थापयेत् ।

ॐ ह गूँ सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दु-

नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ इति पञ्चमं प्रेतहर्तारं पादयोः स्थापयेत् ।

ॐ यमाय सोमं सुनुत यमाय जुहुता हविः । यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्वारुकमिव-बन्धनान्मृत्योर्मुक्षीयमामृतात् । इति द्वाभ्यां मन्त्राभ्यां पुत्तलेषु घृताहुतीः (संपदाज्याहुतीः) हुत्वा शवेन सह दहेत् ॥

❖मरणोत्तमकालः❖

शुक्लपक्षे दिवा भूमौ गंगायां चोत्तरायणे ।
धन्यास्तात मरिष्यन्ति हृदयस्थे जनार्दने ॥
पिता वा यदि वा माता भ्राता बान्धवसुहृज्जनः ।
यदि पञ्चत्वमापन्नः कथं कुर्याद् द्विजोत्तम ॥१॥
कनिष्ठवर्जमेवात्र वपनं मुनिभिः स्मृतम् ।
स्नात्वाचम्यविधानेन कारयेत्पूजनं हरेः ॥२॥
रङ्गवल्यादिभिस्तत्र कुर्यात्सर्वत्र मङ्गलम् ।
रोदनं वर्जयित्वैव गोमयेन शुचिस्थलम् ॥३॥
विलिप्य मण्डले तत्र धान्यस्योपर्युलूखलम् ।
कलशाँस्तु चतुर्दिक्षु तण्डुलोपरि निक्षिपेत् ॥४॥
हिरण्यपञ्चगव्यानि पञ्चत्वक्पल्लवान्न्यसेत् ।
वाससा तन्तुना चापि वेष्टयेत्त्रिप्रदक्षिणम् ॥५॥
(बृ.हा.स्मृ.अ.६.श्लो.७९।८०।८१।८२।८३)

इत्यादिकथनानुसारेण ब्रह्ममेधविधिरारभ्यते ।

❖प्रसूती पुष्पवती वा गर्भवती मरणे विशेषः❖

रजस्वला सूतिका वा पञ्चत्वं यदि चेत् गता ।
पञ्चगव्यैः स्नापयित्वा पावमान्यैर्द्विजोत्तमाः ॥
प्रत्यृचं कलशैः स्नाप्य सपवित्रैर्जलैः शुभैः ।

शुभ्रवस्त्रेण संवेष्ट्य दाहं कुर्यात् विधानतः ॥

(बृ.हा.स्मृ.अ.६.श्लो.३६२।३६३)

मृता चेत् सूतिका नारी तथैवापि रजस्वला ।

गोमूत्रेण स्नापयित्वा वस्त्रेणान्येन वेष्टयेत् ॥

कुम्भेन जलमादाय पंचत्वक्पल्लवैर्युतम् ।

पुण्यादि्भरभिमन्त्र्याथ तेनैव स्नापयेद् द्विज ॥

अन्यवस्त्रेण सम्वेष्ट्य दाहं कुर्वीत पूर्ववत् ।

(व.स्मृ.अ.६.श्लो.४६३ ।४६४।४६५.)

प्रसूती पुष्पवती वा गर्भवती पञ्चत्वं गता चेत् पुण्याहवाचनं कृत्वैकस्मिन् बृहत्पात्रे शुद्धजलं संस्थाप्य तस्मिन् जले पुण्याहजलं संमेल्य पूर्वं पञ्चगव्यं संमन्त्र्य पृथक् पृथक् पञ्चगव्येन संस्नाप्य पूर्वोक्तपुण्याहजल मिश्रितजलेन पवमानसूक्तं पठन् सर्वाङ्गस्नानं विधाय शुद्धवस्त्रं परिधाप्य तदनन्तरं ब्रह्ममेधविधिना संस्कुर्यात् ।

अद्य पूर्वोच्चारितसंकल्पसिद्धिरस्त्वमुकगोत्राया अमुकनाम्न्या विगताया रजस्वलावस्थायां प्रसूत्यवस्थायां गर्भवत्यवस्थायां वा मृताया ब्रह्ममेधविधिसंस्करणयोग्यतासिद्ध्यर्थम्प्रायश्चित्तस्नानं कारयिष्ये । इति संकल्प्य पूर्वोक्तविधिना स्नानं कारयित्वा पश्चात् ब्रह्ममेधविधिं कुर्यात् ।

❖गर्भवत्याः विशेषः❖

यदि गर्भिणिमृता चेत् गर्भिण्या उदरं भित्वा बालकं निष्कास्य जीवितं चेत् वक्ष्यमाणमन्त्रेण धातृस्तनं पाययेत् ॥

ॐ यस्ते स्तनशशयो यो मयो भूः योरत्रधावसूविद्म सूदत्रः । येन विश्वापुष्यसि वार्याणि सरस्वती तमिह भातवेकः ॥ ततः रक्षोघ्नसूक्तं पठन् धातृकरेबालकं दत्वा पोषयेत् ।

✸रक्षोघ्नसूक्तम्✸

ॐ रक्षोहणं वलगहनं वैष्णावीमिदमहन्तं वलगमुत्किरामि

यम्मे निष्ट्यो यममात्यो निचखानेदमहन्तं वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्न्निचखानेदमहन्तं वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥

ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्य मित्रहा ॥

ॐ रक्षोहणो वो वलगहनः प्प्रोक्षामि वैष्णवान् रक्षोहणो वो वलगहनो वनयामि वैष्णवान् रक्षोहणो वो वलगहनो वस्तृणामि वैष्णवान् रक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्त्थ ॥

मृतश्चेत् भूमौ निखनेत् ॥ दिवंगताया गर्भिण्या उदरं दध्ना घृतेन च संपूर्य ततो ब्रह्ममेधोक्तविधिना संस्कुर्यात् ॥

ब्रह्ममेधविधेः प्राक् द्रष्टव्योऽयं विषयः

योजनानां सहस्राणि नवतिं नव चाध्वनः ।
त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः ।
श्रीमद्भागवत्. तृ.अ. ३० श्लो २४.

अथ प्राह यमकञ्चित् पुरुषं कृष्णपिङ्गलम् ।
गच्छ त्वं भो महाग्रामं गत्वा ब्राह्मणमानयः ॥
वसिष्ठगोत्रसंभूतं नामतो यज्ञदत्तकम् ।
शमे निविष्टं विद्वासं यज्ञकर्मविशारदम् ।
न चान्य मानयेथास्त्वं सगोत्रं तस्य पार्श्वतः ।
सहितादृग्गुणस्तेन तुल्योध्ययनजन्मना ॥
आकृत्या च तथा चिह्नैः समस्तेनैव सत्तमः ।
तमानयो यथोदिष्टा पूजाकार्या हि तस्य मे ॥

तमेवमानयामास प्रतिसिद्धो यमेन यः ।
तस्मै यमः समुत्थाय पूजां कृत्वा च धर्मवित् ॥
प्रोवाच नियतामेष सोन्यमानीयतामिति ।
कस्मादहमिहानीतः कस्मात् प्रेरयसे पुनः ॥
गन्तुं नैवोत्सहे तत्र मर्त्यलोकं पुनः प्रभो ।
गच्छ विप्रत्वमद्यैव निलयं स्वं यथागतः ॥
अद्यापि दशवर्षाणामायुस्ते परिवर्तते ।
क्षये तवायुषः प्राप्तिर्लोकस्यास्य भविष्यति ॥

इत्यारभ्य पद्मपुराण.पातालखण्ड.अ.९६
श्लो. ३४.३५.३६.३७.३८.३९.४१.४५.४६

अथ गच्छ महीदेव देवलोकाद्यथेच्छया ।
निपात्य भुवि वै देहं रुदन्त्यद्यापि बान्धवाः ॥
विलप्यमानैरपि बन्धुभिस्तैर्नयावदग्नौ तव तच्छरीरम् ।
प्रक्षिप्यते हन्त जवैर्न तावत् याहि स्वयं सुप्त इव प्रबुद्धः ॥
मम प्रसादादिह पुण्ययोगः श्रुतो यथावत्तमिमं विधेहि ।
विधानतो वै समये समं ते समागमोन्ते भविता सुरैश्च ॥
इति देववचः श्रुत्वा नत्वा धर्माधिपं ततः ।
पुनः पपात स इह परितुष्टमना द्विजः ॥
धर्मराजप्रसादेन ततस्तत्र महीतले ।
संसुप्त इव चोत्तस्थौ बन्धुवर्गसमन्वितः ॥

प.पु.पा.ख.अ.१०३श्लो.६.७.८.९.१०

इत्यादि प्रमाणानुसारेण प्राणं त्यक्त्वा दिवंगतस्य पुरुषस्य नार्या वा पुनर्जीवनसंभवात् सद्यो दाहो न कर्तव्यः, पञ्चदशघटिकानन्तरमेव ब्रह्ममेध विधिना दाहादिकं कार्यम् ।

❖ब्रह्ममेधविधिः प्रारम्भः❖

पुत्रादयो मृतकं दृष्ट्वा रोदनादिकं विहाय सदाचार्यमाहूय मृतात्मनः संस्काराय प्रार्थयेयुः। आचार्यः शिष्यादिभिः समागत्य ब्रह्ममेधसंस्कारविधिं कारयेत् । कर्ता वपनं कृत्वा स्नात्वा शुद्धनूतनवस्त्राणि परिधायाचार्यवरणार्थं कुशजलाक्षतदक्षिणादिकमादाय संकल्पयेत्। पूर्वोक्तप्रकारेणदेश कालादिकं संकीर्त्य-

अद्यामुकगोत्रोत्पन्नस्यामुकप्रवरान्वितस्य दिवंगतस्यास्मत्संबन्धिनोऽमुकस्य श्रीमन्नारायणसायुज्य प्राप्तये ब्रह्ममेधसंस्कारकर्मणि भवन्त आचार्यत्वेन मयावृता इत्युच्चार्याचार्यहस्ते कुशादिकं दद्यात् । एवमेव सहायकत्वेन शववाहकत्वेन च अन्यानपि वरयेत् । ते च स्नात्वा नवीनवस्त्रोर्ध्वपुण्ड्रादिकं धरेयुः ।

❖विष्वक्सेनपूजनम्❖

आचार्यः सपरिवारं सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनं पूजयेत् ।

ॐ भूर्भुवः स्वः सपरिवाराय सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः सपरिवारयुतं सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनमावाहयामि स्थापयामि पूजयामि। इत्यावाह्यासनार्घ्यपाद्याचमनीयस्नानवस्त्रोपवीतपुष्पधूपदीपनैवेद्यपुनराचमनीयफलताम्बूलदक्षिणाप्रदक्षिणादिसर्वोपचारैः संपूज्य प्रणमेत्। तत ईशानाग्नेयनैर्ऋत्यवायव्यपूर्वदक्षिणपश्चिमोत्तराद्यष्टदिक्षु क्रमेण गजाननजयत्सेनहरिमुखकालप्रकृतिबलप्रबलविनायक विघ्नेशादीनावाह्य यथोपचारैः पूजयेत् ।

माता अद्यामुकगोत्राया दिवंगताया अमत्संबन्धिन्या अमुकायाः श्रीमन्नारायणसायुज्यप्राप्तये ब्रह्ममेधसंस्कारकर्मणि भवन्त आचार्यत्वेन मयावृता इत्युच्चार्याचार्यहस्ते कुशादिकं दद्यात् ।

❖षोडशकुम्भार्चनम्❖

आचार्यः पञ्चहस्तमितां चतुरस्रां भूमिं गोमयोदकेनोपलिप्य तत्र हरिद्राशालिचूर्णेन भद्रकं मण्डलमालिख्य धान्यमास्तीर्य तन्मध्ये मुसलोलूखलौ स्थापयेत्। पूर्वादिक्रमेण चतुरो घटान् स्थापयित्वा तद्बहिर्भागे द्वादशकुम्भान् स्थापयेत्। ततः चतुर्षु कुम्भेषु चतुर्व्यूहानावाह्य पूजयेत् पूर्वादिक्रमेण ॥

ॐ नित्यानन्दा सहितायानिरुद्धाय नमो नित्यानन्दासहिता-निरुद्धमावाहयामि स्थापयामि पूजयामि । इत्युच्चार्य पूजयेत् ।

ॐ सत्यासहिताय प्रद्युम्नाय नमः सत्यासहितं प्रद्युम्नमावाहयामि स्थापयामि पूजयामि ।

ॐ हिरण्यासहिताय संकर्षणाय नमो हिरण्यासहितं संकर्षणमा-वाहयामि स्थापयामि पूजयामि ।

ॐ त्रयीसहितायाधोक्षजाय नमः त्रयीसहितमधोक्षजमावाहयामि स्थापयामि पूजयामि ।

इत्यावाह्यासनार्घ्यपाद्याचमनीयस्नानवस्त्रोपवीत पुष्पधूपदीपनैवेद्यपुनराचमनीयफलताम्बूलदक्षिणाप्रदक्षिणादिसर्वोपचारैः संपूज्य प्रणमेत् । एवं बहिर्दलस्थितेषु द्वादशेषु घटेषु क्रमेण-

ॐ श्रीसहिताय केशवाय नमः श्रीसहितं केशवमावाहयामि स्थापयामि पूजयामि ।

ॐ लक्ष्मीसहिताय नारायणाय नमो लक्ष्मीसहितं नारायणमा-वाहयामि स्थापयामि पूजयामि ।

ॐ कमलासहिताय माधवाय नमः कमलासहितं माधवमा-वाहयामि स्थापयामि पूजयामि ।

ॐ पद्मासहिताय गोविन्दाय नमः पद्मासहितं गोविन्दमावाहयामि स्थापयामि पूजयामि ।

ॐ पद्मिनीसहिताय विष्णवे नमः पद्मिनीसहितं विष्णुमावाहयामि स्थापयामि पूजयामि ।

ॐ कमलालयासहिताय मधुसूदनाय नमः कमलालयासहितं मधुसूदनमावाहयामि स्थापयामि पूजयामि ।

ॐ रमासहिताय त्रिविक्रमाय नम रमासहितं त्रिविक्रममावाह-यामि स्थापयामि पूजयामि ।

ॐ वृषाकपीसहिताय वामनाय नमोवृषाकपीसहितं वामन-मावाहयामि स्थापयामि पूजयामि ।

ॐ धन्यासहिताय श्रीधराय नमो धन्यासहितं श्रीधरमावाहयामि स्थापयामि पूजयामि ।

ॐ वृत्तिसहिताय हृषीकेशाय नमो वृत्तिसहितं हृषीकेशमावाहयामि स्थापयामि पूजयामि ।

ॐ यज्ञासहिताय पद्मनाभाय नमो यज्ञासहितं पद्मनाभमावाहयामि स्थापयामि पूजयामि ।

ॐ इन्दिरासहिताय दामोदराय नम इन्दिरासहितं दामोदर-मावाहयामि स्थापयामि पूजयामि ।

इति द्वादशव्यूहान् मूलेनावाह्य पूर्वादिक्रमेणासनार्घ्यपाद्याचमनीयस्नान वस्त्रोपवीतपुष्पधूपदीपनैवेद्यपुनराचमनीय फलताम्बूलदक्षिणाप्रदक्षिणादि सर्वोपचारैः संपूज्य नीराज्य नमस्कृत्य नारायणानुवाकेनाभिमन्त्र्य प्रणम्य वस्त्रेणाच्छादयेत् ।

❖नारायणानुवाकः❖

ॐ सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥

ॐ विश्वतः परमं नित्यं विश्वं नारायण गँ हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥
ॐ पतिं विश्वस्यात्मेश्वर गँ शाश्वत गँ शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥
ॐ नारायणपरोज्योतिरात्मा नारायणः परः ।
नारायणः परंब्रह्म तत्वं नारायणः परः ॥
नारायणः परो ध्याता ध्यानं नारायणः परः ।
ॐ यच्च किञ्चिञ्जगत् सर्व दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥
ॐ अनन्तमव्ययं कवि गँ समुद्रेन्तं विश्वसम्भुवम् ।
पद्मकोशप्रतिकाश गँ हृदयं चाप्यधोमुखम् ॥
ॐ अधो निष्ट्यावितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ॥
ॐ सन्तत गँ शिराभिस्तु लम्वत्याकोशसन्निभम् ।
तस्यान्ते सुषिर गँ सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् ॥
ॐ तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतो मुखः ।
सोग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः ॥
ॐ तिर्यगूर्ध्वमधः शायी रश्मयस्तस्य सन्तताः ।
सन्तापयति स्वं देहमापादतलमस्तकम् ॥
ॐ तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता ।
नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ॥
ॐ नीवारशुकवत्तन्वी पीताभास्वत्यणूपमा ।
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।

स ब्रह्मा स शिवः सेन्द्रः सोक्षरः परमस्वराट् ॥

ॐ ऋतं सत्यं परंब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

❖पञ्चगव्य-विधानम्❖

अथ वेद्याः पूर्वस्यां दिशि तण्डुलादिना चतुरस्रं स्थण्डिलं कृत्वा कुंकुमादिना कोष्ठपञ्चकं कृत्वा प्राच्याम्पलमेकं (चतुर्कर्षम्पलम्प्रोक्तं) गोमूत्रं दक्षिणेंऽगुष्ठार्धं गोमयं प्रतीच्यां सप्तपलं गोक्षीरमुदीच्यां पलत्रयं गोदधि मध्ये पलमेकं गोघृतमैशान्ये पलमेकं कुशोदकं स्थापयित्वा गोमूत्रे विष्णुं पूजयेत् ।

ॐ विष्णोरराटमसि विष्णोः स्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्द्ध्रुवोसि वैष्णवमसि विष्णवेत्वा ॥ ॐ विष्णवे नमः विष्णुमा-वाहयामि स्थापयामि पूजयामि । इति पूजयेत् । गोमये-

ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विशीमतः सुरुचो व्वेनऽआवः । सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्चयोनिमसतश्च विवः ॥ ॐ ब्रह्मणे नमः ब्रह्माणमावाह्यामि स्थापयामि पूजयामि । इति पूजयेत् । क्षीरे-

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजा गुँ सि । योऽअस्कभायदुत्तर गूँ सधस्थं विचक्रमाणस्त्रेधोरुगायः ।

ॐ अच्युताय नमोऽच्युतमावाहयामि स्थापयामि पूजयामि । इति पूजयेत् । दध्नि-

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपान गूँ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोमृतं मधु ॥ ॐ शुक्राय नमः शुक्रमावाहयामि स्थापयामि पूजयामि । इति पूजयेत् । घृते-

ॐ कृष्णोस्याखरेष्ठोग्नयेत्वा जुष्टं प्रोक्षामि वेदिरसि वर्हिषेत्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षाम्म्यदित्यैव्युन्दनम् । ॐ कृष्णाय नमः कृष्णमावाहयामि स्थापयामि पूजयामि । इति पूजयेत् । कुशोदके-

ॐ पूषन्नेकर्षे यमः सूर्यप्राजापत्यव्यूहरश्मीन् समूह । तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौ पुरुषः सोहमस्मि ॥ ॐ सवित्रे नमः सवितारमावाहयामि स्थापयामि पूजयामीति सम्पूज्यप्रणमेत्। तत उलूखलेवासुदेवमावाह्याघ्र्याद्युपचारैः पूजयेत् ।

ॐ नमो भगवते वासुदेवाय भगवन्तं वासुदेवम् आवाहयामि स्थापयामि पूजयामि । मूलमन्त्रेण मुसलं पूजयेत् ।

ॐ मुसलाय नमः । विष्णुगायत्र्या पलचतुष्टयहरिद्रामभिमन्त्र्योलूखले निक्षिपेत् ।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ ततः शुद्धस्नातैः पूर्ववृत्तैः चतुर्भिः श्रीवैष्णवैरधोवक्षमाणमन्त्रं पठन्नवकुट्टयेयुः (चूर्णं कुर्युः) ।

ॐ परोमात्रया तनुवावृधान नते महित्वमन्वश्नुवन्ति । उभे ते विद्म रजसी पृथिव्याविष्णोर्देवत्वं परमस्य वित्से ॥ अवहननसंजातहरिद्राचूर्णेन पूर्वपूजितदेवान् संपूज्य किञ्चिच्छवसंस्कारार्थमवशेषयेत् ।

❖होमविधानः प्रारम्भः❖

ततो हस्तमात्रां चतुरस्रां चतुरंगुलोच्चां मृदा वेदीं निर्माय तत्र पञ्च भूसंस्कारान् विधायाग्निं निदध्यात् । ते च यथा त्रिभिर्दर्भैः परिसमूह्य गोमयोदकेनोपलिप्यश्रुवेण दर्भमूलेन वा दक्षिणोत्तरक्रमेण तिस्रो रेखोल्लिख्यानामिकाङ्गुष्ठाभ्यामुल्लेखनक्रमेण मृदमद्धृत्यैशान्यां क्षिपेत्। ततः शुद्धजलेन सम्प्रोक्ष्य कुशैराच्छादयेत् ।

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ इत्यनेन तत्र अग्निं स्थापयेत् । ततः पात्रासादनं (याज्ञिक पात्रशुद्धिप्रयोगः पात्रासादनमित्युच्यते) कुर्यात् । अग्नेर्दक्षिणतः स्त्रिभिर्दर्भैः ब्रह्मासनमास्तीर्य तत्र ब्रह्माणमावाह्य ॐ ब्रह्मणे नमो ब्रह्माणमावाहयामि स्थापयामि पूजयामि । इति सर्वोपचारैः संपूज्याग्नेरुत्तरतः प्रणीताप्रोक्षणी स्रुक् स्रुवेध्माज्यञ्च संस्थाप्य तण्डुलपुञ्जेष्वष्टवसूनावाह्य क्रमेण पूजयेत् । वह्नेः पूर्वदिशि-

ॐ अग्नये नमोऽग्निमावाहयामि स्थापयामि पूजयामि । आग्नेयदिशि-
ॐ जातवेदसे नमो जातवेदसमावाहयामि स्थापयामि पूजयामि । दक्षिणे-
ॐ सहोजसे नमः सहोजसमावाहयामि स्थापयामि पूजयामि । नैऋत्यदिशि-
ॐ अजिराप्रभवे नमोऽजिराप्रभुमावाहयामि स्थापयामिपूजयामि । पश्चिम-
ॐ वैश्वानराय नमो वैश्वानरमावाहयामि स्थापयामि पूजयामि । वायव्य-
ॐ नर्यापसे नमो नर्यापसमावाहयामि स्थापयामि पूजयामि । उत्तरे-
ॐ पंक्तिराधसे नमः पंक्तिराधसमावाहयामिस्थापयामि पूजयामि । ईशाने-
ॐ विसर्पिणे नमो विसर्पिणमावाहयामि स्थापयामि पूजयामि ।
ॐ यज्ञपुरुषाय नमो यज्ञपुरुषमावाहयामि स्थापयामि पूजयामि । इति समन्ततः पूजयेत् । ॐ आत्मने नमः स्वशिरसि । ॐ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः श्रीवैष्णवशिरस्सु पीताक्षतान्निक्षिपेत् । ततः कुशान्तर्हितायां प्रोक्षण्यामुदकं निनीय तेन यज्ञियपात्राणि होमसामग्रींश्च प्रोक्षयित्वा कुशैः परिस्तरणं कुर्यात् । ततः परिस्तरणोपरि प्रोक्षण्युदकेन परिषेचनं कुर्यात् ।

ॐ अदिते अनुमन्यस्वेति दक्षिणे पश्चिमतः प्राचीनं जलधारां दद्यात् ।
ॐ अनुमते अनुमन्यस्वेति पश्चिमे दक्षिणत उदीचीं जलधारां दद्यात् ।
ॐ सरस्वते अनुमन्यस्वेत्युत्तरे पश्चिमतः प्राचीनं जलधारां दद्यात् ।
ॐ देवसवितप्रसुवेति समन्ततः प्रागारभ्य प्रदक्षिणक्रमेणजलधारांदद्यात् । ततः घृताक्ताः पञ्चदशसमिधः पुष्पतण्डुलैरलंकृत्य प्रजापतिं मनसा ध्यात्वा

तुष्णीं प्रज्वलितेऽग्नौ जुहुयात् ।

❖पञ्चवारुणीहोमः❖

ततः श्रुवेणाज्यमादाय ॐ प्रजापतये स्वाहा प्रजापतय इदं न मम नैऋत्यादीशानान्तं जुहुयात् । ॐ इन्द्राय स्वाहा इन्द्रायेदं न मम वायव्यादाग्नेयान्तं जुहुयात् । ॐ अग्नये स्वाहा अग्नय इदं न ममेत्यग्नेर्दक्षिणतो जुहुयात् । ॐ सोमाय स्वाहा सोमायेदं न ममेत्यग्नेरुत्तरतो जुहुयात् । ॐ भूः अग्नये स्वाहा अग्नय इदं न मम । ॐ भुवः वायवे स्वाहा वायव इदं न मम । ॐ स्वः सूर्याय स्वाहा सूर्यायेदं न मम । ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम । ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम । ॐ अग्नये स्वाहा अग्नय इदं न मम । ॐ वरुणाय स्वाहा वरुणायेदं न मम । ॐ सवित्रे स्वाहा सवित्र इदं न मम । ॐ विष्णवे स्वाहा विष्णव इदं न मम । ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम । ॐ वरुणाय स्वाहा वरुणायेदं न मम । ततोऽञ्जलिं बद्ध्वा प्रार्थयेत् ।

ॐ द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।
वरदं शक्तिपाणिञ्च विभ्राणं स्रुक्स्रुवौ तथा ।
ॐ स्वाहाञ्च दक्षिणे पार्श्वे वामे देवीं स्वधान्तथा ।
रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत् ॥ इति ध्यात्वा मूलमन्त्रेणाष्टोत्तरशताहुतीः घृतेन जुहुयात् । एवमेव वासुदेवद्वादशाक्षरेण विष्णुषडक्षरेण द्वयमन्त्रेणापि प्रत्येकमष्टोत्तरशताहुतीश्च जुहुयात् । ततः पुरुषसूक्तविष्णुसूक्त नारायणानुवाक श्रीसूक्तभूसूक्तैर्हुत्वा वैकुण्ठपार्षदनामभिर्हुत्वा केशवादिचतुर्विंशति नामभिश्च जुहुयात् ।

❖अथ पुरुष-सूक्तम् ❖

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

सभूमि गूँ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

ॐ पुरुषाय नारायणाय नमः स्वाहा ।

ॐ पुरुष एवेद गूँ सर्वं यद्भूतं यच्च भाव्यम् ।

उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ॐ पुरुषाय०

ॐ एतावानस्य महिमातोज्ज्यायाँश्च पूरुषः ।

पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥ ॐ पुरुषाय०

ॐ त्रिपादूर्ध्व ऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।

ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ॐ पुरुषाय०

ॐ ततो विराडजायत विराजोऽअधिपूरुषः ।

सजातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ॐ पुरुषाय०

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम् ।

पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्च ये ॥ ॐ पुरुषाय०

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।

छन्दा गुँ सि जज्ञिरे तस्म्माद्यजुस्तस्मादजायत ॥ ॐ पुरुषाय ०

ॐ तस्म्मादश्वाऽअजायन्त ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥ ॐ पुरुषाय०

ॐ तं यज्ञं बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः ।

तेन देवाऽअयजन्त साद्ध्याऽऋषयश्च ये ॥ ॐ पुरुषाय०

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।

मुखङ्किमस्यासीत्किं बाहू किमूरूपादाऽउच्च्येते ॥ ॐ पुरुषाय०

ॐ ब्राह्मणोस्य मुखमासीद्बाहूराजन्न्यः कृतः ।

ऊरू तदस्य यद्वैश्यः पद्भ्या गुँ शूद्रोऽअजायत ॥ ॐ पुरुषाय०

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ ॐ पुरुषाय०

ॐ नाभ्या ऽआसीदन्तरिक्ष गुँ शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकाँ२ अकल्पयन् ॥ ॐ पुरुषाय०
ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो स्यासीदाज्यङ्ग्रीष्म ऽइध्मः शरद्धविः ॥ ॐ पुरुषाय०
ॐ सप्प्तास्यासन्परिधयस्त्रिः सप्प्तसमिधः कृताः ।
देवा यद्यज्ञन्तन्न्वाना ऽअबध्नन्पुरुषं पशुम् ॥ ॐ पुरुषाय०
ॐ यज्ञेन यज्ञमयजन्त देवास्त्तानि धर्म्माणि प्रथमान्यासन् ।
तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॐपुरुषाय०
ॐ अद्भ्यः सम्भृतः पृथिव्यैरसाच्च विश्वकर्म्मणः समवर्ततागग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्न्मर्त्यस्य देवत्वमाजानमग्ग्रे ॥ॐ पुरुषाय०
ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्न्यः पन्था विद्यतेयनाय ॥ ॐ पुरुषाय०
ॐ प्रजापतिश्चरति गर्भे ऽअन्तरजायमानो बहुधा विजायते । तस्य
योनिं परिपश्यन्ति धीरास्तस्मिन्हतस्त्थुर्भुवनानि विश्वा ॥ ॐ पुरुषाय०
ॐ यो देवेभ्य ऽआतपतियो देवानां पुरोहितः ।
पूर्व्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ ॐ पुरुषाय०
ॐ रुचं ब्राह्मञ्जनयन्तो देवा ऽअग्ग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा ऽअसन्न्वसे ॥ ॐ पुरुषाय०
ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूप
मश्विनौ व्यात्तम् । इष्णान्निषाणामुम्म ऽइषाण सर्व्वलोकं
म ऽइषाण ॥

ॐ पुरुषाय नारायणाय नमः स्वाहा ।

इति पुरुषसूक्तम् ।

❖ विष्णुसूक्तम् ❖

ॐ विष्णोर्न्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजा गुँ सि । योऽअस्कभायदुत्तर गूँ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवेत्वा ॥ ॐ विष्णवे नमः स्वाहा ॥

ॐ विष्णोरराटमसि विष्णोः पृष्टमसि विष्णोश्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ ॐ विष्णवे० ॥

ॐ तदस्य प्रियमभिपाथोऽअस्यां नरो यत्र देवयवो मदन्ति । ऊरुक्रमस्य सहिबन्धुरित्था विष्णोः पदे परमे मध्वऽउत्सः ॥ ॐ विष्णवे०

ॐ प्रतद्विष्णुस्तवते वीर्येण मृगोन भीमः कुचरोगिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ ॐ विष्णवे० ॥

ॐ परो मात्रया तनुवा वृधान न ते महित्वमन्वश्नुवन्ति । उभे ते विद्म रजसी पृथिव्या विष्णोर्देवत्वं परमस्य वित्से ॥ ॐ विष्णवे० ॥

ॐ विचक्रमे पृथिवीमेषऽएतां क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासोऽअस्य कीरयो जनासऽऊरुक्षिति गूँ सुजनिमाचकार ॥ ॐ विष्णवे० ॥

ॐ त्रिर्देवः पृथिवीमेषऽएतां विचक्रमे शतवर्चसं महित्वा । प्रविष्णुरस्तुतवसस्तवीयान् त्वेष गुँ ह्यस्य स्थविरस्य नाम ॥ ॐ विष्णवे० ॥

ॐ अतो देवाऽअवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्त-धामभिः ॥ ॐ विष्णवे ० ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा गुँ सुरे स्वाहा ॥ ॐ विष्णवे० ॥ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः । अतो धर्माणि धारयन् ॥ ॐ विष्णवे० ॥ॐ विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ॐ विष्णवे० ॥

ॐ तद्विष्णोः परमम्पद गूँ सदा पश्यन्ति सूरयः । दिवीव

चक्षुराततम् ॥ ॐ विष्णवे० ॥ ॐ तद्विप्रासो विपन्यवो जागृवा गुँ सः समिन्धते । विष्णोर्यत्परमं पदम् ॥ ॐ विष्णवे नमः स्वाहा ॥

॥ इति श्रीविष्णुसूक्तम् ॥

(१५) पृष्टोक्तनारायणानुवाकेन जुहुयात् ।

❖श्रीसूक्तम्❖

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरणमयीं लक्ष्मीं जातवेदो म आवह ॥ ॐ श्रीं श्रीदेव्यै नमः स्वाहा ॥

ॐ ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ ॐ श्रीं श्रीदेव्यै० ॥

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ॐ श्रीं श्रीदेव्यै० ॥

ॐ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ॥ पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ चन्द्रां प्रभासां यशसाज्वलन्तीं श्रियं लोकेदेवजुष्टामुदाराम् । ताम्पद्मनेमीं शरणमहम्प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ॐ श्रीं श्रीदेव्यै० ॥

ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः ॥ ॐ श्रीं श्रीदेव्यै०

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ॥ ॐ श्रीं श्रीदेव्यै० ॥

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।

अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात् ॥ ॐ श्रीं श्रीदेव्यै० ॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ॐ श्रीं श्रीदेव्यै० ॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
नीचदेवीं मातर गु श्रियं वासय मे कुले ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ आर्द्राम् यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ आर्द्राम्पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्याम् हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ ॐ श्रीं श्रीदेव्य०

ॐ स शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ॐ श्रीं श्रीदेव्य० ॥

ॐ पद्मानने पद्मऊरु पद्माक्षि पद्मसंभवे । तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ अश्वदायी गोदायी धनदायी महाधने । धनं मे जुषतां देवि सर्वान्कामांश्च देहि मे ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम् । प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ (धनमस्तु मे) ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ न क्रोधो न च मात्सर्यं न लोभो नासुभामतिः ।भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ॥ विष्णोः प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ ॐ श्रीं श्रीदेव्य० ॥

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

ॐ श्रीं श्रीदेव्य नमः स्वाहा ॥

॥ इति श्रीसूक्तम् ॥

❖ भूसूक्तम् ❖

ॐ भूमिर्भूम्ना द्यौर्वरिम्णान्तरिक्षं महित्वा । उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्यायाा दधे ॥ ॐ भूं भूदेव्यै नमः स्वाहा ॥

ॐ आयङ्गौः पृश्निरक्रमीदशदन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥ ॐ भूं भूदेव्यै० ॥

ॐ त्रि गँ सद्धाम विराजति वाक्पतङ्गाय धीयते। प्रतिवस्तो-रह्युभिः ॥ ॐ भूं भूदेव्यै० ॥

ॐ अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन्महिषः सुवः ॥ ॐ भूं भूदेव्यै० ॥

ॐ यत्वा क्रुद्धः परोवपमन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥ ॐ भूं भूदेव्यै० ॥

ॐ यत्ते मन्युपरोप्तस्य पृथिवीमनुदद्ध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥ ॐ भूं भूदेव्यै० ॥

ॐ मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः ॥ ॐ भूं भूदेव्यै० ॥

ॐ देवी हिरण्यगर्भिणी देवी प्रसूवरी सदने सत्यायने सीद ॥ ॐ भूं भूदेव्यै० ॥

ॐ समुद्रवती सावित्री हनो देवी मद्ध्यवी मही। धरणी महो व्यधिष्ठा श्रृंगे श्रृंगे यज्ञे यज्ञे विभीषिणी ॥ ॐ भूं भूदेव्यै० ॥

ॐ इन्द्रपत्नी व्याजनी सुरसितऽइह वायुमती जलशयनी। श्रियंधाराजा सत्यन्तोपरि मेदिनी श्वोपरि धत्तङ्गाय ॥ ॐ भूं भूदेव्यै० ॥

ॐ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतबल्लभाम् ॥ ॐ भूं भूदेव्यै० ॥

ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात् ॥ ॐ भूं भूदेव्यै नमः स्वाहा ॥

॥ इति भूसूक्तम् ॥

❖ वैकुण्ठपार्षदहोमः ❖

ॐ आधारशक्त्यै नमः स्वाहा
ॐ प्रकृत्यै नमः स्वाहा
ॐ अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः स्वाहा
ॐ अनन्ताय नागराजाय नमः स्वाहा
ॐ भूम्यै नमः स्वाहा
ॐ वैकुण्ठाय दिव्यलोकाय नमः स्वाहा
ॐ वैकुण्ठाय दिव्यजनपदाय नमः स्वाहा
ॐ वैकुण्ठाय दिव्यनगराय नमः स्वाहा
ॐ वैकुण्ठाय दिव्यविमानाय नमः स्वाहा
ॐ आनन्दमयाय दिव्यमण्डपरत्नाय नमः स्वाहा
ॐ आस्तरणारूपिणोऽनन्ताय नागराजाय नमः स्वाहा
ॐ धर्माय पीठपादाय नमः स्वाहा
ॐ ज्ञानाय पीठपादाय नमः स्वाहा
ॐ वैराग्याय पीठपादाय नमः स्वाहा
ॐ ऐश्वर्याय पीठपादाय नमः स्वाहा
ॐ ऋग्वेदाय पीठवाहकाय नमः स्वाहा
ॐ यजुर्वेदाय पीठवाहकाय नमः स्वाहा
ॐ सामवेदाय पीठवाहकाय नमः स्वाहा
ॐ अथर्ववेदाय पीठवाहकाय नमः स्वाहा
ॐ अधर्माय पीठगात्राय नमः स्वाहा
ॐ अज्ञानाय पीठगात्राय नमः स्वाहा
ॐ अवैराग्याय पीठगात्राय नमः स्वाहा
ॐ अनैश्वर्याय पीठगात्राय नमः स्वाहा
ॐ एभिःपरिछिन्नतनवे सदसदात्मकाय पीठभूताय नागराजाय नमः स्वाहा
ॐ पीठस्योपरि अष्टदलपद्माय नमः स्वाहा

ॐ सोममण्डलाय नमः	स्वाहा
ॐ सूर्यमण्डलाय नमः	स्वाहा
ॐ वह्निमण्डलाय नमः	स्वाहा
ॐ विमलायै चामरकरायै नमः	स्वाहा
ॐ क्रियायै चामरकरायै नमः	स्वाहा
ॐ उत्कर्षिण्यै चामरकरायै नमः	स्वाहा
ॐ ज्ञानायै चामरकरायै नमः	स्वाहा
ॐ प्रह्वै चामरकरायै नमः	स्वाहा
ॐ ईशानायै चामरकरायै नमः	स्वाहा
ॐ सत्यायै चामरकरायै नमः	स्वाहा
ॐ योगायै चामरकरायै नमः	स्वाहा
ॐ अनुग्रहायै चामरकरायै नमः	स्वाहा
ॐ जगत्प्रकृतये चामरकराय नमः	स्वाहा
ॐ सहस्रशीर्ष्णोऽनन्ताय नागराजाय नमः	स्वाहा
ॐ पुरतः पादपीठाय नमः	स्वाहा
ॐ भगवद्पादुकाभ्यां नमः	स्वाहा
ॐ अस्मद्गुरुभ्यो नमः	स्वाहा
ॐ अस्मद्परमगुरुभ्यो नमः	स्वाहा
ॐ अस्मसर्वगुरुभ्यो नमः	स्वाहा
ॐ श्रीमते रामानुजाय नमः	स्वाहा
ॐ श्रीपराङ्कुशदासाय नमः	स्वाहा
ॐ श्रीमद्यामुनमुनये नमः	स्वाहा
ॐ श्रीराममिश्राय नमः	स्वाहा
ॐ श्रीपुण्डरीकाक्षाय नमः	स्वाहा
ॐ श्रीमन्नाथमुनये नमः	स्वाहा
ॐ श्रीमते शठकोपाय नमः	स्वाहा
ॐ श्रीमते विष्वक्सेनाय नमः	स्वाहा

ॐ श्रियै नमः स्वाहा
ॐ श्रीधराय नमः स्वाहा
ॐ सुदर्शनाय हेतिराजाय नमः स्वाहा
ॐ पाञ्चजन्याय शंखाधिपतये नमः स्वाहा
ॐ कौमोदक्यै गदाधिपतये नमः स्वाहा
ॐ नन्दकाय खड्गाधिपतये नमः स्वाहा
ॐ शार्ङ्गाय चापाधिपतये नमः स्वाहा
ॐ श्रीवत्साय श्रीनिवासाय नमः स्वाहा
ॐ कौस्तुभाय सर्वरत्नाधिपतये नमः स्वाहा
ॐ वैजयन्त्यै वनमालायै नमः स्वाहा
ॐ ह्रीं पुष्ट्यै नमः स्वाहा
ॐ ऐं सरस्वत्यै नमः स्वाहा
ॐ द्रां निद्रायै नमः स्वाहा
ॐ क्लीं कान्त्यै नमः स्वाहा
ॐ कं पृथिव्यै नमः स्वाहा
ॐ गं गरुडाय नमः स्वाहा
ॐ किरीटाय मुकुटाधिपतये नमः स्वाहा
ॐ किरीटमालायै आपीडात्मिकायै नमः स्वाहा
ॐ मकराकृतिकुण्डलाभ्यां नमः स्वाहा
ॐ कण्ठिकाभरणाय नमः स्वाहा
ॐ श्रीमत्तुलस्यै नमः स्वाहा
ॐ हाराय सर्वाभरणाधिपतये नमः स्वाहा
ॐ काञ्चीगुणोज्वलाय पीताम्बराय नमः स्वाहा
ॐ सर्वेभ्यो भगवद्भूषणेभ्यो नमः स्वाहा
ॐ सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नमः स्वाहा
ॐ सर्वाभ्यो भगवत्पादसंवाहिनीभ्यो नमः स्वाहा
ॐ सर्वेभ्यो भगवत्परिकरेभ्यो नमः स्वाहा

ॐ अनन्ताय नमः स्वाहा
ॐ विष्वक्सेनाय नमः स्वाहा
ॐ सूत्रवत्यै नमः स्वाहा
ॐ जं जयत्सेनाय नमः स्वाहा
ॐ गं गजाननाय नमः स्वाहा
ॐ हं हयाननाय नमः स्वाहा
ॐ कं कालप्रकृतिसंज्ञाय नमः स्वाहा
ॐ सर्वेभ्यो विष्वक्सेनपरिजनेभ्यो नमः स्वाहा
ॐ चण्डाय नमः स्वाहा
ॐ प्रचण्डाय नमः स्वाहा
ॐ भद्राय नमः स्वाहा
ॐ सुभद्राय नमः स्वाहा
ॐ जयाय नमः स्वाहा
ॐ विजयाय नमः स्वाहा
ॐ धात्रे नमः स्वाहा ॐ विधात्रे नमः स्वाहा
ॐ कुमुदाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ कुमुदाक्षाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ पुण्डरीकाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ वामनाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ शंकुकर्णाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ सर्पनेत्राय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ सुमुखाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ सुप्रतिष्ठिताय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा
ॐ सर्वेभ्यो भगवद्गणाधिपतिभ्यो नमः स्वाहा
ॐ नित्येभ्यो नमः स्वाहा
ॐ मुक्तेभ्यो नमः स्वाहा
ॐ दिव्येभ्यो नमः स्वाहा

ॐ समस्तपरिवाराय श्रीमते नारायणाय नमः स्वाहा

❖ चतुर्विंशतिनामभिर्होमः ❖

ॐ केशवाय नमः	स्वाहा	ॐ नारायणाय नमः	स्वाहा
ॐ माधवाय नमः	स्वाहा	ॐ गोविन्दाय नमः	स्वाहा
ॐ विष्णवे नमः	स्वाहा	ॐ मधुसूदनाय नमः	स्वाहा
ॐ त्रिविक्रमाय नमः	स्वाहा	ॐ हृषीकेशाय नमः	स्वाहा
ॐ पद्मनाभाय नमः	स्वाहा	ॐ दामोदराय नमः	स्वाहा
ॐ वासुदेवाय नमः	स्वाहा	ॐ संकर्षणाय नमः	स्वाहा
ॐ प्रद्युम्नाय नमः	स्वाहा	ॐ अनिरुद्धाय नमः	स्वाहा
ॐ पुरुषोत्तमाय नमः	स्वाहा	ॐ अधोक्षजाय नमः	स्वाहा
ॐ नारसिंहाय नमः	स्वाहा	ॐ अच्युताय नमः	स्वाहा
ॐ जनार्दनाय नमः	स्वाहा	ॐ उपेन्द्राय नमः	स्वाहा
ॐ हरये नमः	स्वाहा	ॐ श्रीकृष्णाय नमः	स्वाहा

❖ कूष्माण्डसूक्तम् ❖

ॐ यद्देवा देवहेडनन्देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व गूँ हसः ॥ ॐ अग्नये नमः स्वाहा ॥

ॐ यदि दिवा यदि नक्तमेना गुँ सि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व गूँ हसः ॥ ॐ वायवे नमः स्वाहा ॥

ॐ यदि जाग्रद्यदि स्वप्न एना गुँ सि चकृमा वयम्। सूर्यो मा तस्मादेनसो विश्वामुञ्चत्व गूँ हसः ॥ ॐ सूर्याय नमः स्वाहा ॥

ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकष्याधि कर्म्मणि तस्यावयजनमसि ॥ ॐ भूतेभ्यो नमः स्वाहा ॥

❖ स्विष्टकृद्धोमः ❖

ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृत इदं न मम ।

ॐ भूः अग्नये स्वाहा अग्नय इदं न मम ।

ॐ भुवः वायवे स्वाहा वायव इदं न मम ।

ॐ स्वः सूर्याय स्वाहा सूर्यायेदं न मम ।

ॐ भूर्भुवः स्वः प्रजापतये स्वाहा प्रजापतय इदं न मम ।

ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम ।

ॐ अग्नये अयसे स्वाहा अग्नयेऽयस इदं न मम ।

ॐ वरुणाय स्वाहा वरुणायेदं न मम ।

ॐ सवित्रे स्वाहा सवित्र इदं न मम ।

ॐ विष्णवे स्वाहा विष्णव इदं न मम ।

ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम ।

ॐ मरुद्भ्यः स्वाहा मरुद्भ्य इदं न मम ।

ॐ अर्केभ्यः स्वाहा अर्केभ्य इदं न मम ।

ॐ आदित्याय स्वाहा आदित्यायेदं न मम ।

ॐ अदितये स्वाहा अदितय इदं न मम ।

❖ पूर्णाहुतिः ❖

सुवां चतुः कृत्वः पूरयित्वा नारिकेल पूगीफलानि निधाय विचित्र-तन्तुभिर्वेष्टयित्वा प्रजापतिं मनसा ध्यायन् पूर्णाहुतिं जुहुयात् ।

ॐ पूर्णादर्व्वि परापत सुपूर्णा पुनरापत ।

वस्नेव विक्रीणावहाऽइषमूर्ज गूँ शतक्रतो ॥

ततः परिस्तरणोपरि प्रोक्षण्युदकेन परिषेचनं कुर्यात् ।

ॐ अदिते अनुमन्यस्व । इति दक्षिणे पश्चिमतः प्राचीनं जलधारां दद्यात् । ॐ अनुमते अनुमन्यस्व । इति पश्चिमे दक्षिणत उदीचीं जलधारां दद्यात् ॐ सरस्वते अनुमन्यस्व । इत्युत्तरे पश्चिमतः प्राचीनं जलधारांदद्यात् ।ॐदेवसवितप्रसुव ।इति समन्ततःप्रागारभ्य प्रदक्षिण क्रमेण जलधारां दद्यात् । ततो जलपूर्णां प्रणीतां सव्यहस्तेनादाय-

ॐ देवा ऋषयो मार्जयन्तामिति प्राच्यां किञ्चिज्जलं क्षिपेत ।

ॐ मासाः पितरो मार्जयन्तामिति दक्षिणे किञ्चिज्जलं क्षिपेत् ।

ॐ गृहाः पशवो मार्जयन्तामिति पश्चिमे किञ्चिज्जलं क्षिपेत् ।

ॐ यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्तामित्यूर्ध्वं किञ्चज्जलं क्षिपेत् ।

ततः ॐ सुमित्रियानऽआप ओषधयः सन्तु । इति आत्मानं समुपस्थितजनाँश्च सम्प्रोक्ष्य । ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टियञ्च वयन्द्विष्मः । इति प्रणीतां न्युब्जीकुर्यात् । ततो ब्रह्माणम् ॐ ब्रह्मणे नम इति पूजयित्वा विसर्जयेत् । परिस्तरण कुशानग्नौ जुहुयात् ।

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमधिगच्छत ।

अरिष्टास्माकं वीरामापरासेचिमत्पयम् ॥ ततः प्रार्थयेत् ॥

यस्य स्मृत्या च नामोक्त्या जपयज्ञक्रियादिषु ।

न्यूनं सम्पूर्णतां याति सद्यो वन्देतमच्युतम् ॥

❖शवसंस्कारः❖

आचार्यः सौदर्शनमण्डलं विलिख्य तत्र शवं निधायतदुपरितिलान् विकिरेत् ।

ॐ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्यावसानुगाः ।

तिलाः पुनन्तु ते पापं यत्किञ्चिद्दुरितं त्वयि । आमलकचूर्णमादय -

ॐ धात्रि धातृसमुद्भूते सर्वपातकनाशिनि ।

आमलकि नमस्तुभ्यं सर्वपापहरा भव ॥

❖पञ्चगव्य-स्नपनविधिः❖

गोमूत्रेण गायत्र्यास्नापयेत् । ततो गन्धद्वारेति गोमयेन–

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ आप्यायस्वेति क्षीरेण–

ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्यम् । भवावाजस्य संगथे ॥

दधिक्राव्णोति दध्ना–

ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभिनो मुखाकरत् प्रणऽआयू गुँ षि तारिषत् ॥ तेजोसीत्याज्येन –

ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि । प्रियन्देवाना-मनाधृष्टन्देवयजनमसि ॥ देवस्यत्वेति कुशोदकेन-

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या-माददेऽअद्धरकृते ॥ ततो मध्यवेद्याः परितः स्थितैरनिरुद्धादिचतुर्भिर्घटैः तथा केशवादिद्वादशघटैश्चावाहितक्रमेण वक्ष्यमाणमन्त्रेण स्नापयित्वा (२९ पृष्टोक्त) नारायणानुवाकेन च स्नापयेत् ।

ॐ सम्वाम्मना गुँ सि सव्रतासमुचितान्याकरम् ।
अग्ने पुरीष्याधिपाभवत्वन्नऽइषमूर्ज यजमानाय धेहि ॥ ततः कौपीनं धौतमुत्तरीयं नवयज्ञोपवीतं द्वादशोर्ध्वपुण्ड्रांश्च धारयित्वा सर्वाङ्गीणेन नववस्त्रेण सकुशेन सर्वतो वेष्टयित्वा हरिद्रापुष्पैरलंकृत्य ततो यज्ञीय (उदुम्बरदेवदार्वादयः) वृक्षकाष्ठमयीं शिविकां कदल्याँम्रपल्लवपुष्पमालादिभि-रलंकृत्य शोभनशुद्धवस्त्रैः शोभयित्वा तस्यां शिविकायां शवं स्थापयेत् ।

ॐ अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥

ततः शिविकावहनाय शववाहकान् नियोजयेत् ।

✸अथ प्रथमपिण्डदानम्✸

मृत्युस्थाने प्रथमः पिण्डो देयः । यथा पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्य कुशादिकं निधायापसव्येन तिलसजलकुशादिकमादाय-

अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम् । इति आसन दद्यात् ।

(माता) अद्यामुकगोत्रे अमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजलकौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम् । इति आसनं दद्यात् ।

ततः पिण्डमादाय- अद्यामुकगोत्रामुकनामदिवंगत मृत्युस्थाने भूमिदेवी तुष्टये ते एष पिण्डो मया दीयते तवोपतिष्ठतामिति पिण्डं दत्वा जलपुटकमादाय- अद्य अमुकगोत्र अमुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठतामिति जलादिकं दद्यात् ॥ एवम् अग्रेऽपि बोध्यम् ततः सव्यं विधायाचम्यानन्तरं पुत्रादयः शववाहकाश्च शवशिविकां दक्षिण-स्कन्धेष्वारोप्य द्वारदेशं गत्वा पुत्रो द्वितीयपिण्डं दद्यात् ।

❖द्वारदेशे द्वितीयपिण्डम्❖

पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्यापसव्येन सजलकुशादिकमादाय- अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । तिलकुशजलसहितपिण्डमादाय-

अद्यामुकगोत्रामुकनामन् दिवंगत भूतादिबाधाविनाशाय द्वारदेश एष पिण्डो मया दीयते तवोपतिष्ठतामिति दत्वा जलपुटकमादाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम् । इति जलञ्च दद्यात् ।

माता- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । ततः पिण्डमादाय-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते मृत्युस्थाने भूमिदेवीतुष्टये त एष पिण्डो मया दीयते तवोपतिष्ठताम् । इति पिण्डं दत्वा सजलपुटकमादाय-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम् । द्वितीयपिण्डदानवाक्यम् ।

माता- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । तिलकुशजलसहितपिण्डमादाय-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते भूतादिबाधाविनाशाय द्वारदेशे एष पिण्डो मया दीयते तवोपतिष्ठताम् इति दत्वा सजलपुटकमादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम् । इति जलञ्च दद्यात् ।)

ततः सव्यं कृत्वाचम्य नारायणवासुदेवविष्णुमन्त्रान् जपन्तः शनैः शनैर्वहनं कुर्युः । आचार्यादय ऋत्विजश्चैशावास्यभृगुवल्ल्यानन्दवल्ली-कौषीतक्याद्युपनिषदर्जितन्तेस्तोत्रस्तोत्ररत्नादींश्च पठेयुः । बान्धवाश्च हुताग्निं जलपूर्णघटमन्यौ द्वौ घटौ चादाय भगवन्नामकीर्तयन्तो हरिद्रालाजापुष्पाणि विकिरन्तो नृत्यवाद्यगानपुरस्सरं शवशिविकामादाय श्मशानं व्रजेयुः । ततोऽर्धमार्गे गत्वा पिण्डं दद्यात् ।

❖ विश्रामस्थाने तृतीयपिण्डम् ❖

पिण्डदानस्थानं संशोध्य जलेन प्रोक्ष्य कुशादिकं निधायापसव्येन सजलकुशादिकमादाय- अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । ततः कुशतिलजल सहितं पिण्डं गृहीत्वा- अद्यामुकगोत्रामुकनामन् दिवंगतपिशाचादि-बाधानिवृत्तये विश्रामस्थाने त एषपिण्डोमयादीयते तवोपतिष्ठताम् । इति दत्वा जलपुटकादिकमादाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम् । इति जलं च दद्यात् ।

ततः सव्यं कृत्वाचम्य कार्यान्तरं कुर्यात् । ततो नगराद् ग्रामाद् वा बहिर्यज्ञीयवृक्षसमाकीर्णेऽमेध्यरहिते शुचौ देशे नद्यादितटे व्रजेयुः ।

❖ श्मशाने होमविधानम् ❖

अथ पञ्चहस्तविस्तृतं त्रिहस्तायतं हस्तद्वयनिघ्नं कुण्डं वेदीं वा निर्माय

माताचेत्- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । ततः कुशतिलजलसहितं पिण्डं गृहीत्वा- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते पिशाचादि बाधानिवृत्तये विश्रामस्थाने त एष पिण्डो मया दीयते तवोपतिष्ठताम् । इति दत्वा सजलपुटका-मादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयतेतवोपतिष्ठताम् । इति जलं च दद्यात् ।)

पञ्चभूसंस्कारान् कृत्वा (कुण्डे) प्रथममग्निं संस्थाप्याज्याधारादारभ्य स्वीष्टकृदन्तं हुत्वानन्तरं तत्रैव चितां विधाय शवसंस्कारं कर्तव्यम् ।

◆सौकर्यार्थं पृथक्हवनविधानम्◆

नद्यादितटे पवित्रस्थाने यथा संभवं वेदीं निर्माय गृहादानीतमग्निं प्रज्वाल्य- ॐ क्रव्यादनामाग्नये नमः इति क्रव्यादनामाग्निम्

आवाहयामि स्थापयामि पूजयामीति सम्पूज्य पूर्ववत् पञ्चवारुणि-होमादारभ्य स्वीष्टकृदन्तं होमं कृत्वा लोमभ्यत्यनुवाकेन हवनं कुर्यात् ।

ॐ लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोऽभ्यः स्वाहामेदोऽभ्यः स्वाहा । मा गुँ सेऽभ्यः स्वाहा मा गुँ सेऽभ्यः स्वाहा स्नावऽभ्यः स्वाहा स्नावऽभ्यः स्वाहा स्थऽभ्यः स्वाहा स्थऽभ्यः स्वाहा मज्जऽभ्यः स्वाहा मज्जऽभ्यः स्वाहा रेतसे स्वाहा पायवे स्वाहा ॥

ॐ आयासाय स्वाहा प्प्रयासाय स्वाहा संय्यासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥ ॐ तपे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा । निष्कृत्यै स्वाहा प्रायश्चित्यै

टिप्पणी १.सम्मार्ज्य भूमिं संलिप्योल्लिख्योद्धृत्य च वेदिकाम् ।
अभ्यूक्ष्योपसमाधाय वह्निं तत्र विधानतः ॥
पुष्पाक्षतैरथाभ्यर्च्य देवं क्रव्यादसंज्ञकम् ।
लोमभ्यस्त्वनुवाकेन होमं कुर्याद्यथा विधिः ॥
ग.पु.सा.अ.श्लो. १७. १८ अग्नि-प्रार्थनानन्तरमुक्तञ्च तत्रैव-
संम्यक्संप्रार्थयित्वाग्निं चितां तत्रैव कारयेत् ।
श्रीखण्डतुलसीकाष्ठैः पलाशाश्वत्थदारुभिः ॥ ग.पु.सा.अ.श्लो.२० इत्युक्तप्रकारेण केचिद् चितायां हवनं कुर्वन्ति, केचिद् पृथक् कुर्वन्ति ।

स्वाहा भेषजाय स्वाहा ॥

ॐ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्या गुँ स्वाहा ॥

❖अथ लयहोम-विधानम्❖

ॐ लां नमः पराय सर्वात्मने नारायणाय नमः स्वाहा ॥

ॐ वां नमः पराय निवृत्यात्मने अनिरुद्धाय नमः स्वाहा ॥

ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः स्वाहा ॥

ॐ यां नमः पराय पुरुषात्मने संकर्षणाय नमः स्वाहा ॥

ॐ षां नमः पराय परमेष्ठ्यात्मने वासुदेवाय नमः स्वाहा ।

ॐ सोमऽएकेभ्यः पवते घृतमेकऽउपासते । येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छताम् स्वाहा ॥ॐ ये युध्यन्ते प्रधानेषु शूरासो ये तनुत्यजः । ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतां स्वाहा ॥ ॐ तपसा येऽअनाधृष्या तपसा ये सुवर्गता । तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतां स्वाहा । इति लयहोमं विधायानन्तरं शवसंस्कारं कुर्यात् ।

अथ शवदहनप्रकारम्

ततः पुण्डरीकाक्षविद्यया पञ्चगव्येन चितानिर्माणस्थानं प्रोक्षयेत् ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।

यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरशुचिः ॥

ततः यज्ञीयकाष्ठैः चितिं कुर्यात् ।

ॐ शर्मास्यवधूत गुँ रक्षोवधूताऽअरातयः ।

अदित्यास्त्वगसि प्रतित्वा दितिर्वेत्तु ॥

चिताया उपरिसकुशानन्तिलानाकीर्य तत्र घृताक्तं नववस्त्रवेष्टितमुत्तरशिरस्कं शवं स्थापयित्वा तुलसीकाष्ठेनान्यकाष्ठेन चाच्छाद्यपुष्पादीन् विकीरेत्।

ॐ शर्मास्यवधूत गूँ रक्षो वधूताऽअरातयः ।
आदित्यास्त्वगसि प्रतित्वादितिर्वेत्तु ॥

अपसव्यं विधाय चितायां शवहस्ते च द्वौ पिण्डौ देयौ ।

चितायां चतुर्थपिण्डम्

सजलकुशादिकं गृहीत्वा-

अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम् । कुशजलतिलसहितमेकं पिण्डं हस्तेनादाय- अद्यामुकगोत्रामुकनामन् दिवंगत सकलबाधानिवृत्तये चितास्थाने त एष पिण्डो मया दीयते तवोपतिष्ठताम् । इति दत्त्वा सजलपुटकमादाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम् । पञ्चमपिण्डं गृहीत्वा सजलकुशादिकमादाय-

❖शवहस्ते पञ्चमपिण्डम्❖

सजलकुशादिकं गृहीत्वा- अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । कुशजलतिलसहितमेकं पिण्डं हस्तेनादाय- अद्यामुकगोत्रामुकनामन् दिवंगत सकलबाधानिवृत्तये शवहस्ते त एष पिण्डो मया दीयते तवोपतिष्ठताम्

माता०- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । कुशजलतिलसहितमेकं पिण्डं हस्तेनादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते सकलबाधानिवृत्तये चितास्थाने त एष पिण्डो मया दीयते तवोपतिष्ठताम्। इति दत्वा ततः जलपुटकादिकमादाय अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम् ।)

इति दत्वा ततः सजलपुटकमादाय-

अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठतामिति पिण्डोपरि जलादिकं दद्यात्।

❖ शवदहनविधिः ❖

गृहादानीतपानीयघटे छिद्रं विधाय तदीयजलधारया वक्ष्यमाणमन्त्रं पठन् वामावर्तन्त्रिपरिक्रम्य तद्घटं चाकाशयुत्क्षिप्य स्फोटयेत् ।

ॐ आपोऽअस्मान्मातरःशुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व गूँ हिरिप्प्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि ॥

ततो हवनवेदिकायां क्रव्यादनाम्ना पूजितमग्निमादायापसव्येन शवस्य वामकुक्षितःप्रवेशयित्वा प्रज्वालयेदर्धे दग्धे समन्त्रां सतिलामाज्याहुतिं दद्यात्।

ॐ अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः ।

असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावकः ॥

ततः श्मशानवासिभ्यो भूतेभ्यो बलिं दद्यात् ।

❖ भूत-बलिविधानम् ❖

फलजलदधिसक्तूनां चतुरपिण्डान्कृत्वा तेष्वेकमादाय पूर्वे बलिं दद्यात्।

ॐ आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः ।

प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिमुत्तम् ॥ अन्यपण्डिमादाय दक्षिणे-

ॐ वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।

माता- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजल-कौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम्। कुशजलतिलसहितमेएकं पिण्डं हस्तेनादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते सकलबाधानिवृत्तये शवहस्ते त एष पिण्डो मया दीयते तवोपतिष्ठतामिति दत्वा सजलपुटकमादाय- अद्या-मुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम्। इति पिण्डोपरि जलादिकं दद्यात्।)

भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु ते त्वमुम् ॥

तृतीयपिण्डमादाय पश्चिमे-

ॐ विनायकाः क्षेत्रपाला ये चान्ये बलिकांक्षिणः ।

पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम् ॥ चतुर्थपिण्डमादायोत्तरे-

ॐ ये भूता प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्ठाः ।

तेभ्यो बलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददातु ॥

ततो गन्धपुष्पाक्षतजलैर्बलीन् पूजयित्वा तदनन्तरं पूर्वोक्तविधिना पूर्णाहुतिं कृत्वा स्रुक्स्रुवादीञ्च चितायां क्षिपेत् ॥ निःशेषदग्धं ज्ञात्वास्थिसञ्चयन कुर्यात् ।

❖ अस्थिसञ्चयनम् ❖

कर्त्ता स्नानं कृत्वास्थिवृन्दानुद्धृत्य पलाशपत्रे पुटके वा निधाय दुग्धवारिभिः क्षालयित्वा मृण्मयपात्रे निदध्यात् । ततः त्रिकोणं स्थण्डिलं निर्माय गोमयोदकेनोपलिप्य दक्षिणाभिमुखः सन् त्रिषु दिक्षु त्रिकोणेषु पिण्डत्रयं दद्यात् । अपसव्यं विधाय सजलकुशादिकमादाय- अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थ एतानि सजलकौशेयपिण्डासनानि मया दीयन्ते तवोपतिष्ठन्ताम् । ततः हस्ते तिलजलकुशसहितान्पिण्डानादाय- अद्या-मुकगोत्रामुकनामन् दिवंगत त एते पिण्डा मया दीयन्ते तवोपतिष्ठ-न्ताम् । इति त्रिकोणेषु दत्वा सजलपुटकनादाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम् ।

माता०-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थ एतानि सजलकौशेयपिण्डासनानि मया दीयन्ते तवोपतिष्ठन्ताम् । ततः हस्ते तिलजलकुशसहितान् पिण्डानादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त एते पिण्डा मया दीयन्ते तवोपतिष्ठन्ताम् । इति त्रिकोणेषु दत्वा सजलपुटकानादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम् ।)

❖त्रिपादुकासन्निधौ पिण्डदानम्❖

चिताभस्मं पुञ्जीकृत्य तत्र त्रिपादुकां (त्रिकाष्ठिकां) स्थापयेत् । ततोऽनाच्छादितमुखे घटे जलं पूरयित्वा तस्यां त्रिपादुकायां घटं संस्थाप्य तद्घटसन्निधौ पत्रादिकं निधाय सजलकुशादिकादाय–

अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम् ॥ कुशजलतिलसहितं पिण्डं हस्तेनादाय– **अद्यामुकगोत्रामुकनामन् दिवंगत त एष सजलपिण्डो मया दीयते तवोपतिष्ठताम्** । इत्युच्चार्य पूर्वस्थापितपत्रादौ दद्यात् । ततः सजलपुटकं गृहीत्वा– **अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम्** । इति जलं च दद्यात् ।

ततोऽस्थिस्थापितमृण्मयपात्रं गृहीत्वा चितास्थानात् पञ्चदशपददूर उत्तरां दिशां गत्वा तत्र गर्तं विधायास्थिपात्रं संस्थाप्य पत्रेणाच्छाद्य तस्योपरि वेदिकां विधाय नामगोत्रोच्चारणपूर्वकं पिण्डं दद्यात् ।

❖षष्ठपिण्डदानम्❖

सजलकुशादिकमादाय– **अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम्** ॥ हस्ते कुशजल तिलसहितपिण्डमादाय– **अद्यामुकगोत्रामुकनामन् दिवंगत त एष दाहार्तिनाशनरूपसजलपिण्डो मया दीयते तवोपतिष्ठताम्** ।

माता–अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजल-कौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । कुशजलतिलसहितं पिण्डं हस्तेनादाय– अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त एष सजलपिण्डो मया दीयते तवोपतिष्ठताम् । इत्युच्चार्य पूर्वस्थापितपत्रादौ दद्यात् । सजलपुटकं गृहीत्वा– अद्या मुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम् इति जलं च दद्यात् ।)

इत्युच्चार्य पूर्वोक्तवेदिकायामाच्छादितपत्रोपरिभूमौ दद्यात् । सजलपुटकं गृहीत्वा- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम् । इति जलं च दद्यात् ।

ततः पुष्पादिना पिण्डं संपूज्य विसृज्य पूर्वस्थापितमस्थिपात्रं गर्ताद्-दधृत्य हस्तेनादाय जलसमीपं गत्वा दुग्धजलाभ्यां सम्यक् प्रक्षाल्यास्थिं चन्दन पुष्पैरलंकृत्यास्थिसंपुटं हृदि मस्तके कृत्वा भूमौ निधाय
परिक्रम्य नमस्कृत्य गंगादिनद्यां प्रार्थनापूर्वकं विर्सजयेत् ।

ॐ आपो नारायणोद्भूता ता एव चायनम्पुनः ।

तस्मान्नारायणि गङ्गे दिव्यां शान्तिं करोतु भोः ॥

अस्य दिवंगतस्य दाहादि शान्तिरस्तु त्वयि क्षिपामि भो गङ्गे । इति गङ्गादिजले क्षिप्त्वा पूर्वस्थापितभस्मादिकं जले क्षिपेत् ।

❖अस्थिसञ्चयान्ते स्नानं तर्पणञ्च❖

ततः किञ्चिद्दूरे गत्वा कर्त्ता स्नायात् । तत्र गता वाहकादयो जनाः सचैलं गोघृतगोमयदुर्वाग्राक्षतालाजादिभिर्मङ्गलस्नानं कृत्वा नामगोत्रादि-कथनपूर्वकं दिवंगताय तर्पणं दत्वागच्छेयुः । कर्त्ता स्नानानन्तरं वस्त्राणि सम्यक् प्रक्षाल्य नामगोत्रादिकथनपूर्वकं दिवंगताय तिलोदकं दद्यात् । हस्ते तिलकुशादीनादाय- अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकनामा-हमस्मत्पितोऽमुकगोत्रामुकनामन् दिवंगत त एते जलाञ्जलयो

माता-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजल कौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम् । हस्ते कुशजलतिलसहितं पिण्डमादाय-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त एष दाहार्ति नाशनरूपसजलपिण्डो मया दीयते तवोपतिष्ठताम् । इत्युच्चार्य पूर्वोक्तवेदिकायामाच्छादितपत्रोपरिभूमौ दद्यात् जलपुटकं गृहीत्वा- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्ठताम् । इति जलं च दद्यात् ।)

मया दीयन्ते तवोपतिष्ठन्ताम् ।

ततः सर्वे जनाः किञ्चिन्मार्गमागत्याग्निं प्रज्वाल्य घृताहुतिं हुत्वा कण्टकं पादेन स्पृष्ट्वा गृहमागच्छेयुः । निम्बपत्राणि प्राशयेयुः। मृतकस्य गुणान् वदेयुः । पुनः स्नात्वा वसेयुः । एवं पञ्चसंस्कारादिना संस्कृतं विशिष्टजनं ब्रह्ममेधविधिनैव दाहयेत् ।

सूर्यास्तमये समये नवमदिनपर्यन्तं सायंकालिकं कुर्यात् तद्यथा– गृहप्राङ्गणे गोमयोदकेनोपलिप्य दीपं प्रज्वाल्य पृथक् पृथक् तिस्रः त्रिकाष्ठिकाः स्थापयित्वा तदुपरि पुटकादौ दुग्धतोयपुष्पाणि प्रत्येकं निधायापसव्येन सजलकुशादिकमादाय- अद्यामुकगोत्राामुकनामन् दिव.गत त अमुकदिनसबन्धी सायङ्कालयेतानि दीपजलपयपुष्पाणि मया दीयन्ते तवसम्पद्यतामअनेन दीपेन पश्यानेन जलेन स्नाहीदं पुष्पं परिधेयीदं क्षीरं पीव । इत्युक्त्वा वस्तूनि हस्तेन प्रदर्श्य धूपदीपौ कारयित्वा प्रार्थयेत्

श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः ।

इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिबः ॥ भो जीवात्मन् स्वस्थानं व्रजेति जीवात्मानं विसर्जयेदिति ब्रह्ममेधविधानम् ॥

माता–अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकनामाहमस्मन्मातोऽमुकगोत्रेऽमुकनाम्नि दिवंगते त एते जलाञ्जलयो मया दीयन्ते तवोपतिष्ठन्ताम् ।)

अद्यामुकगोत्रेऽमुकनाम्नि दिवगते त अमुकदिनसबन्धी सायङ्कालयेतानि दीपजलपयपुष्पाणि मया दीयन्ते तवसम्पद्यतामनेन दीपेन पश्यानेन जलेन स्नाहीदं पुष्पं परिधेयीदं क्षीरं पीव । इत्युक्त्वा धूपदीपौ कारयित्वा प्रार्थयेत

टिप्पणी–

दग्ध्वाशरीरंविधिवद्वैष्णवस्यमहात्मनः । यन्मरणंतदवभृथमिति मत्वाविचक्षणः । स्नानार्थंपुण्यसलिलंव्रजेद् भागवतैःसह ।अनुलिप्यघृतंसर्वंगोमयंवा तिलैः सहः ॥

❖दश पिण्डविधानम् ❖

नद्यादौ गत्वा प्रायशामन्त्रकं स्नायात् तिलादिकमादाय-

अद्यामुकगोत्रोऽमुकप्रवरान्वितोऽमुकनामाहमस्मत्पितुर्दिवंगत-स्यामुकदिनसम्बन्धिस्नानमहं करिष्ये (करिष्यामि वा)। इति संकल्प्य स्नात्वापसव्यं विधाय तर्पणं कुर्यात्। अद्यामुकगोत्रामुकनामदिवंगत त अमुकदिनसम्बन्धिजलाञ्जलयो मया दीयन्ते तवोपतिष्ठन्ताम् ।

मात-अद्यामुकगोत्रोऽमुकप्रवरान्वितोऽमुकनामाहमस्मन्मातुर्दिवंगताया अमुकदिनसम्बन्धिस्नानमहं करिष्ये (करिष्यामि वा)। अद्यामुकगोत्रेऽ-मुकनाम्नि दिवंगते त अमुकदिनसबन्धि जलाञ्जलयो मया दीयन्ते तवोपतिष्ठन्ताम् ।)

दूर्वाग्रैरक्षतैर्लाजैः स्नानं कुर्वीत मङ्गलम् ।

(बृ.हा.स्मृ.अ.६.श्लोक.११३.११४.११५)

केशवार्पितसर्वाङ्गं शशिभं मङ्गलाद्वयम् ।

न वृथा दाहयेद् विद्वान् ब्रह्ममेधविधिं विना ॥ (बृ.हा.स्मृ.अ.६.श्लोक.१०८)

मृतकस्थानमालिप्यदक्षिणाभिमुखं ततः। द्वादशाहकपर्यन्तं दीपं कुर्यादहर्निशम् ॥)

अर्धरात्रादर्धपूर्वा सूतके मृतके तथा। ऊर्ध्वचेत्तत्पराग्राह्या तथा रजसि सूतके ॥

(ब.स्मृ.अ.६.श्लो.४७१।)

यस्मिन्दिनेभवेत् मृत्युरटव्यांविषमेऽपिवा।यदातदाभवेत् दाहःसूतकंमृतवासरात् ॥

(गरुड पुराण प्रे० क०ध०का०अध्याय ३४श्लोक६३)

श्राद्धेह्नि वर्जयेत् काष्ठैः दन्तानां शोधनं बुधः ।

यत्रैव शोधयेत् दन्तान् गण्डुषैर्द्वादशैर्जलैः ।(ब.स्मृ.अ६श्लोक.१८)

नामिषंनमधु प्रोक्तंखड्गपात्रं नचैव हि।नानिवेद्य प्रदातव्यं नादैवं कुत्रचित् मतम् ॥

काकपिण्डंनदातव्यंवैष्णवानांकुलेयतः। नागतिर्जायते विप्रा मृतानां पापिनामपि ॥

नृत्यन्ति पितरस्तस्य प्रनृत्यन्ति पितामहाः ॥ वैष्णवोऽयंकुले जातःकिंकरिष्यतिनो यमः।शोचन्ति पितरोऽन्येषां यज्वानः स्वर्गता अपि। बृ.ब्र.सं.च.पा.अ.४.१३६.१३७.१३८.१३९)

इति कुशादिकोपर्यञ्जलीन् दद्यात् ।ततःसव्यं विधायाचम्य वृक्षमूलादौ गत्वा-चार्यसहितः कर्त्ता शुचौ विविक्तस्थाने भूमिं विशोध्यावश्यकानुसारेण पायसं निर्माय भगवते निवेद्य मृत्युदिनात् पिण्डदानदिनसंख्यकान् पिण्डान् कुर्यात् । तत्रोत्तरे पूजावेदीं मध्ये हवनवेदीं दक्षिणे पिण्डवेदीं कृत्वा दीपं प्रज्वाल्य पूजावेदिकायामिष्टदेवं भगवन्तं नारायणं कुशकूर्च आवाह्य पूजयेत् ।

ॐ सश्रीकं भगवन्तं नारायणमावाहयामि स्थापयामि पूजयामी-त्यावाह्य ॐ सश्रीकायभगवते नारायणाय नमः । आसनं समर्पयामि एवं क्रमेणार्घ्यं पाद्यमाचमनं स्नानं वस्त्रोपवस्त्रे यज्ञोपवीतं पुष्पं चन्दनमक्षतान् पुष्पमालिकां धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दक्षिणां प्रदक्षिणां च सर्मपयामीति संपूज्य हस्ते कुशजलाक्षतानादाय- तिथ्यादिकं संकीर्त्य अद्यामुकगोत्रस्यामुकनाम्नो दिवंगतस्य भगवदपचारभागवतापचारा-सह्यापचारनिवृत्तिपूर्वक श्रीलक्ष्मीनारायणसन्निधिप्राप्तये हवन-पूर्वकममुकदिनसंबन्धिपिण्डदानमहं करिष्यामि । इति संकल्प्य होमवेदीं निर्मायाग्निं प्रज्वाल्याज्याधारौ हुत्वा पञ्चवारुणीहोमं कुर्यात् ।

टिप्पणी- पूर्वम्भगवदाराधनां विधाय हवनादिकं कृत्वैव दशपिण्ड दानादिकं समाचरेदुक्तञ्च

सुवर्णद्वयमानीयसुवर्णन्न्यायसंचितम् ।
तस्य नारायणस्यैकां प्रतिमां भूप कल्पयेत् ॥
पीतवस्त्रयुगच्छन्नां सर्वाभरणभूषिताम् ।
स्नापितां विविधैस्तोयैरधिवास्य यजेत्ततः ॥
पूजयेच्च विधानेन गन्धपुष्पादिभिः पृथक् ।
ततः प्रदक्षिणीकृत्य वह्नौ सन्तर्प्यदेवताः ॥
घृतेन दध्ना क्षीरेण विश्वेदेवाश्च तर्पयेत् ।
नारायणाग्रे विधिवत् सत्क्रियामौर्ध्वदेहिकाम् ॥
आरभेत यथाशास्त्रं क्रोधलोभविवर्जितः । ग.पु.सा.अ.७

❖पञ्चवारुणीहोमः❖

स्रुवेणाज्यमादाय ॐ प्रजापतये स्वाहा प्रजापतय इदं न मम नैऋत्यादीशानान्तं जुहुयात्। ॐ इन्द्राय स्वाहा इन्द्रायेदं न मम वायव्यादाग्नेयान्तं जुहुयात्। ॐ अग्नये स्वाहा अग्नय इदं न ममेत्यग्नेर्दक्षिणतो जुहुयात्। ॐ सोमाय स्वाहा सोमायेदं न ममेत्यग्नेरुत्तरतो जुहुयात्। ॐ भूः अग्नये स्वाहा अग्नय इदं न मम। ॐ भुवः वायवे स्वाहा वायव इदं न मम। ॐ स्वः सूर्याय स्वाहा सूर्यायेदं न मम। ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम। ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम। ॐ अग्नये स्वाहा अग्नय इदं न मम। ॐ वरुणाय स्वाहा वरुणायेदं न मम। ॐ सवित्रे स्वाहा सवित्र इदं न मम। ॐ विष्णवे स्वाहा विष्णव इदं न मम ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम। ॐ वरुणाय स्वाहा वरुणायेदं न मम। ततोऽञ्जलिं बद्ध्वा प्रार्थयेत्।

ॐ द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।

वरदं शक्तिपाणिञ्च बिभ्राणं स्रुक्स्रुवौ तथा।

ॐ स्वाहाञ्च दक्षिणे पार्श्वे वामे देवींस्वधान्तथा।

रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत् ॥ ततः तिलैराज्येन च नारायणवासुदेवविष्णुमन्त्रैः प्रत्येकमष्टोत्तरशताहुतीर्जुहुयात्। ततः परिषिच्य संपूज्यावश्यकतानुसारेण तिल घृतमयान् पायसपिण्डान् विधाय पिण्डवेद्यां कुशानास्तीर्य दिवङ्गतात्मानमावाहयेत्।

आवाहयाम्यहं देवं जीवं सर्वगतं विभुम्।

वेद्यामस्यामदृश्यत्वं प्रविशाद्य नमोऽस्तुते ॥इति पुष्पाक्षतान् वेद्यां विकिरेत्। ततोऽपसव्येन नामगोत्रोच्चारणपूर्वकं दिवङ्गतात्मानम्पूजयेत्।

अद्यामुकगोत्रामुकनामन् दिवंगत त आसनार्घ्यपाद्याचमनस्नान-वस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यादीनि नमः संपद्यन्ताम्। ततो दक्षिणाभिमुखो भूत्वा पितृतीर्थेन सजलकुशादिकमादाय-

अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे सजलकौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम्। पिण्डमादाय- अद्यामुकगोत्रामुक-नामन् दिवंगत परमाह्लादजनकोऽमुकदिनसंबन्धी त एष पिण्डो मया दीयते तवोपतिष्ठतां नमः । इत्यास्तृतकुशपुष्पोपरिनिदध्यात् । जलपुटकमादाय- अद्यामुकगोत्रामुकनामन्दिवङ्गत त इदं जलम्मया दीयते तवोपतिष्ठताम्। ततो गन्धपुष्पभृङ्गराजादिभिः पिण्डं संपूज्य गोदुग्धेन पिण्डं संस्नाप्योर्णावस्त्रेण सूत्रेण वाच्छादयेत् । एवं दशमदिनपर्यन्तमेकं पिण्डं प्रत्यहं दद्यात्। तत्रैव घटद्वयं पुटकद्वयं वा सदुग्धनीरकं दद्यात्।

श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः ।

इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिबः ॥ इति प्रार्थयित्वा भो जीवात्मन् यत आगतः तत्र व्रज । इति जीवात्मानं विसृज्य सव्यं कृत्वा पुष्पं गृहीत्वा प्रार्थयेत्।

कृष्णा कृष्णा कृपालुस्त्वमगतीनां गतिप्रद ।

संसारार्णवमग्नानां प्रसीद पुरुषोत्तम ॥ इति सम्प्रार्थ्याग्निं भगवन्तं च विसृज्य हस्तौ पादौ प्रक्ष्याल्य पिण्डान् जले संक्षिप्य ततो वेद्यादि स्थानं गोमयोदकेनोपलिप्य पात्रादिकं शोधयित्वा स्नानं कृत्वा शुद्धवस्त्राणि

माताः-अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त आसनार्घ्यपाद्याचमन स्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यादीनि नमः संपद्यन्ताम् ।) ततो दक्षिणाभिमुखो भूत्वा पितृतीर्थेन सजलकुशादिकादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे सजलकौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम्।

पिण्डमादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते परमाह्लादजनकोऽमुक दिन संबन्धी त एष पिण्डो मया दीयते तवोपतिष्ठतां नमः। इत्यास्तृतकुशपुष्पोपरि निदध्यात् । ततः जलपुटकमादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं जलं मया दीयते तवोपतिष्टताम्।)

परिधाय पवित्रस्थाने पाकं विधाय भगवते निवेद्य स्वयं भुञ्जीत। यदि शक्त श्चेत् यावदाशौचं स्वगृहान्नं नैव स्वीकुर्यात् पवित्रं लभ्यते चेत् पवित्राभावे तु स्वीकुर्यादेव ॥

नवमे दिने सर्वैः सपिण्डान्तरगतबन्धुभिः स्नात्वाग्रे स्त्रीजनं कृत्वा मृतालयं गत्वा लाजादूर्वादिकं विकिरेत्। दूर्वावत्कुलवृद्धिस्ते लाजा इव विकासिता।

दशमेऽहनि पूर्ववत्पिण्डदानादिकं संपाद्य पिण्डवेदीं संपूज्य विसर्जयेत् । सर्वैः बान्धवैः क्षौरकर्मकार्यं कर्त्रापि मुण्डनं कुर्यात्। दशमदिनारभ्यासमाप्तिं पञ्चगव्यं पेयं नवयज्ञोपवीतधारणं च कर्तव्यम्।

इति दशपिण्डदानविधिः

❖पाथेयपिण्डविधिः❖

पाथेयपिण्डप्रदानं दशमे वा एकादशदिवसे कर्तव्यम्। कर्ता स्नानादिकं विधायाचार्यादीन् निमन्त्र्य तैःसह श्राद्धभूमिं गत्वा तत्र लम्वायमानं मण्डलं कृत्वा चतुर्व्यूहस्थानं प्रकल्प्य होमवेदीं निर्माय दीपं प्रज्वाल्य पूजयित्वा श्राद्धभूमौ तिलसर्षपादीन् विकीर्य देयानि वस्तूनि संपाद्यैकत्र निधाय कर्मपात्रं कृत्वा तज्लेन तत्स्थानं सामग्रीञ्च परिषिञ्चेत्।

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गताऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

ततः कुशादिकमादाय पूर्वोक्तप्रकारेण देशकालादीन् सङ्कीर्त्य- अद्या-मुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकमनामाहं ममामुकस्यामुकगोत्रस्या-मुकनाम्नो दिवंगतस्य परमपदगमनाय सर्वबाधानिवृत्तिपूर्वकपरमपद प्राप्तये भगवत्कैङ्कर्यरूपेण चतुर्व्यूहपूजनपूर्वकहवनं पिण्डदानञ्चाहं करिष्ये (करिष्यामि वा)। इति सङ्कल्प्य पूर्वादिक्रमेणचतुर्षु घटेषु वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धान् स्थापयेत्।

पीताक्षतानादाय- अद्यामुकगोत्रस्यामुकनाम्नो दिवङ्गतस्य पाथेयपिण्ड दानकर्मणि हरिणीहिरण्यासत्यानित्यानन्दासहितान् वासुदेवसङ्कर्षण प्रद्युम्नानिरुद्धानावाहयामि स्थापयामि पूजयामि।

इत्यावाह्यासनार्घ्यपाद्याचमनस्नानवस्त्रोपवीत गन्धाक्षतापुष्पालङ्कार धूप दीपनैवेद्यताम्बूलनीराजनदक्षिणाप्रदक्षिणादीन् समर्पयामि। ततो होम वेदीं विधाय पूर्वोक्तप्रकारेण हवनं कृत्वा वासुदेवादीनामग्रे चतुष्कोणं मण्डलं विधाय तत्र मनुष्याहारपरिमितं हविरादिकं सजलं निधाय-

इदमन्नं भूस्वामि स्वरूपिणे नारायणाय नमः। इत्युत्सृजेत्।

पुनर्वासुदेवादिभ्यो दद्यात्। अन्नं पुरस्कृत्यकुशादिकमादाय- अद्या-मुकगोत्रस्यामुकनाम्नो दिवङ्गततृप्तय इदमन्नादिकं सशक्तिकेभ्यो वासुदेवादिभ्यो नमः स्वाहा। इति तत्तत्पुरतो मण्डलोपरिदत्वापुनराचमन वस्त्रताम्बूलदक्षिणापुष्पाणि दद्यात्। ततोऽनिरुद्धस्याग्रे वेदिकायां कुशादिक-मास्तीर्यापसव्येन दिवङ्गतात्मानमावाह्य पूजयेत्।

अद्यामुकगोत्रामुकनामन् दिवङ्गतात्र वेद्यां त्वामावाहयामि स्थापयामि

माता-अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकमनामाहं ममामुकाया अमुकगोत्राया अमुकनाम्न्या दिवंगतायाः परमपदगमनाय सर्वबाधानिवृत्तिपूर्वक-परमपदप्राप्तये भगवत्कैङ्कर्यरूपेण चतुर्व्यूहपूजनपूर्वकहवनं पिण्डदानञ्चाहंकरिष्ये करिष्यामि वा।) इति सङ्कल्प्य.............

माता-अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गतायाः पाथेयपिण्डदान कर्मणि हरिणीहिरण्यासत्यानित्यानन्दासहितान् वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाना-वाहयामि स्थापयामि पूजयामि) इत्यावाह्यासन.....

माता-अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गततृप्तय इदमन्नादिकं सशक्तिकेभ्यो वासुदेवादिभ्यो नमः स्वाहा इति तत्तत्पुरतो मण्डलोपरि दत्वा पुनराचमनवस्त्रताम्बूलदक्षिणापुष्पाणि दद्यात्।..

पूजयामि । इत्यावाह्य कौशेयासनं दद्यात् । अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदंकौशेयासनं नमः सम्पद्यताम् । एवं प्रकारेणार्घ्यपाद्याचमन स्नानवस्त्रोपवीतगन्धाक्षतापुष्पालङ्कारधूपदीपैः पूजयेत् । ततः कुशादिकमादाय- अद्यामुकगोत्रामुकनामन् दिवंगत ते पाथेयपिण्डदानार्थे सजलकौशेय पिण्डासनं मया दीयते तवोपतिष्ठताम् ।

कुशजलसहितं पिण्डमादाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत त एष पाथेयपिण्डो मया दीयते तवोपतिष्ठताम् । इति वेद्यां दत्वा पुटके जलं कृत्वा- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते तवोपतिष्ठताम् । ततो गन्धादिभिः पिण्डं संम्पूज्य पिण्डोपरि दुग्धधारां दत्वा पीताक्षतैर्विसृज्य सव्यं कृत्वा नमस्कुर्यात् ।

अत्र कार्येषु यच्छिद्रं कर्मतो मन्त्रतोऽपि वा ।
सर्वं सम्पूर्णतां कृत्वा नारायण प्रसीदतु ॥

"भोः जीवात्मन् स्वस्थानं व्रज" इति विसर्जनम् । इति पाथेयम् ।

माता-अद्यामुकगोत्रेऽमुकनाम्नि दिवङ्गत अत्र वेद्यां त्वामावाहयामि स्थापयामि पूजयामि । इत्यावाह्य सर्वोपचारै संपूज्य कौशेयासनं दद्यात् ।

माता-अद्यामुकगोत्रेऽमुकनाम्निदिवंगते ते पाथेयपिण्डदानार्थे सजल कौशेयपिण्डासनं मया दीयते तवोपतिष्ठताम् । कुशजलसहितं पिण्डमादाय-

माता-अद्यामुकगोत्रेऽमुकनाम्निदिवङ्गते त एषपिण्डोमयादीयते तवोपतिष्ठताम् । अद्यामुक गोत्रेऽमुकनाम्नि दिवङ्गते त इदं जलं मया दीयते तवोपतिष्ठताम् ।

टिप्पणी- चतुर्व्यूहात्मकं सर्व स्मृत्वा विश्वक्जले जनः । एते रुद्राःसमाख्याताः सङ्कर्षणविभूतयः ॥एतेवैद्वादशादित्याह्यनिरुद्धविभूतयः । ब्रह्माशक्रश्चरुद्रश्च गणेशोभास्करस्तथा ।विचिन्त्यावासुदेवस्यतनुभूताविभूतयः नान्यंदेवंनमस्कुर्यात्त-च्छरीरतयाविना॥पिण्डोदकप्रदानाद्यं कर्म चैवौर्ध्वदैहिकम् निवर्त्यविधिनाधर्म सामान्येनाविशेषतः ॥इत्याद्युक्तप्रकारेण सर्वान् चतुर्व्यूहात्मकानेव समाराधयेत्

❖ मध्यमषोडशिविधानम् ❖

एकादशदिवस आवश्यकं विधाय पृथक् विस्तृतभूमिं संशोध्य पूजावेदीं हवनवेदीं च कृत्वा दीपं प्रज्वाल्य भगवदाराधनादिकं परिसमाप्य ततो लम्वायमानां मध्यमषोडशिवेदीं कृत्वा तत्र षोडशतण्डुलपुञ्जेषु कुशकूर्चान् स्थापयित्वा संकल्पं कुर्यात् ।

अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकमनामा अहं ममामुकस्यामुकगोत्रस्यामुकनाम्नो दिवंगतस्य परमपदगमनाय सर्वबाधानिवृत्ति पूर्वकपरमपदप्राप्तये भगवत्कैङ्कर्यरूपेण विष्ण्वादिपुरुषान्त्यान्मकं भगवन्तमावाह्यपिण्डदानञ्चाहं करिष्ये (करिष्यामि वा)

इति संकल्प्य प्रत्येकशो दीपान् प्रज्वाल्य क्रमेणोत्तरतः विष्ण्वादि पुरुषान्त्यात्मकं भगवन्तं पीताक्षतैरावाह्य पूजयेत् ।

अद्य पूर्वोच्चारितस्सङ्कल्पसिद्धिरस्तु अमुकगोत्रस्यामुकनाम्नो दिवङ्गतस्य मध्यमषोडशपिण्डदानकर्मणि विष्णुनामानं शिवात्मकं यमात्मकं सोमात्मकं हव्यवाहात्मकं कव्यवाहात्मकं कालात्मकं रुद्रात्मकं

माता– अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकमनामा अहं ममामुकस्यामुकगोत्रस्यामुकनाम्नो दिवंगतस्य परमपदगमनाय सर्वबाधानिवृत्ति पूर्वकपरमपद प्राप्तये भगवत्कैङ्कर्यरूपेण विष्ण्वादिपुरुषान्त्यान्मकं भगवन्तमावाह्यपिण्डदानञ्चाहं करिष्ये (करिष्यामि वा) इति संकल्प्य

माता – अद्य पूर्वोच्चारितस्सङ्कल्पसिद्धिरस्तु अमुकगोत्राया-मुकनाम्न्या दिवङ्गताया मध्यमषोडशपिण्डदानकर्मणि विष्णुरूपं शिवात्मकं यमात्मकं सोमात्मकं हव्यवाहात्मकं कव्यवाहात्मकं कालात्मकं रुद्रात्मक पुरुषात्मकं प्रेतात्मकं विष्णुरूपं ब्रह्मात्मकं विष्णुरूपं शिवात्मकं यमात्मकं पुरुषात्मकं भगवन्तमावाहयामि षोडशस्थानेषु स्थापयामि पूजयामि । इत्यावाह्य क्रमेणाघ्र्यादि शोडषोपचारैः संपूजयेत् ।

पुरुषात्मकं प्रेतात्मकं विष्णुनामनं ब्रह्मात्मकं विष्णुनामानं शिवात्मकं यमात्मकं पुरुषात्मकं भगवन्तमावाहयामि षोडशस्थानेषु स्थापयामि पूजयामि । इत्यावाह्य क्रमेणाघ्यादि शोडषोपचारैः संपूजयेत् । तद्यथा-

अद्यामुकगोत्रस्यामुकनाम्नोऽ दिवङ्गतस्य मध्यमषोडशपिण्डदान- कर्मणि प्रथमतण्डुलपुञ्ज आवाहिताय ॐ विष्णुनाम्ने भगवते ना-रायणाय नमः । आसनमर्घ्यम्पाद्यमाचमनं स्नानं वस्त्रोपवस्त्रे यज्ञोपवीतं पुष्पं चन्दनमक्षतान् पुष्पमालिकां धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दक्षिणां प्रदक्षिणां विष्णवे भगवते नारायणाय नमः सम्पद्यन्ताम् ।

एवं प्रकारेण द्वितीये शिवात्मकं भगवन्तम्-

ॐ शिवात्मकाय भगवते नारायणाय नमः । तृतीये यमात्मकं भगवन्तम्-

ॐ यमात्मकाय भगवते नारायणाय नमः । चतुर्थे सोमात्मकम्-

ॐ सोमात्मकाय भगवते नारायणाय नमः । पञ्चमे हव्यवाहात्मकम्-

ॐ हव्यवाहात्मकाय भगवते नारायणाय नमः । षष्ठे कव्यवाहात्मकम्-

ॐ कव्यवाहात्मकाय भगवते नारायणाय नमः । सप्तमे कालात्मकम्-

ॐ कालात्मकाय भगवते नारायणाय नमः । अष्टमे रुद्रात्मकम्-

ॐ रुद्रात्मकाय भगवते नारायणाय नमः । नवमे पुरुषात्मकम्-

ॐ पुरुषात्मकाय भगवते नारायणाय नमः । दशमे प्रेतात्मकम्-

ॐ प्रेतात्मकाय भगवते नारायणाय नमः । एकादशे विष्णुरूपं भगवन्तम्-

---

माता:-अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गताया मध्यमषोडश पिण्ड दानकर्मणि प्रथमतण्डुलपुञ्ज आवाहिताय ॐ विष्णुनाम्ने भगवते नाराय-णाय नमः । आसनमर्घ्यम्पाद्यमाचमनं स्नानं वस्त्रोपवस्त्रे यज्ञोपवीतं पुष्पं चन्दनमक्षतान् पुष्पमालिकां धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दक्षिणां प्रदक्षिणां विष्णवे भगवते नारायणाय नमः सम्पद्यन्ताम् ।

ॐ विष्णुनाम्ने भगवते नारायणाय नमः । द्वादशे ब्रह्मात्मकम्-
ॐ ब्रह्मात्मकाय भगवते नारायणाय नमः । त्रयोदशे विष्णुरूपम्-
ॐ विष्णुनाम्ने भगवते नारायणाय नमः । चतुर्दशे शिवात्मकम्-
ॐ शिवात्मकाय भगवते नारायणाय नमः । पञ्चदशे यमात्मकम् -
ॐ यमात्मकाय भगवते नारायणाय नमः । षोडशे पुरुषात्मकम्-
ॐ पुरुषात्मकाय भगवते नारायणाय नमः ।

एवं क्रमेण एकैकात्मकं भगवन्तं नारायणं संपूज्य हवनं कुर्यात् । तदाथा पूर्वं हवनवेदीं निर्मायापद्रव्यं निरस्य गोमयेनोपलिप्य रङ्गवल्यादिकं विधाय समिधादिकं संस्थाप्य संक्षेपेण विधानेनाग्निं प्रतिष्ठापयेत् ।

ॐ अग्निं दूतम्पुरोदधे हव्यवाहमुपब्रुवे ।देवाँ२ऽआसादयादिह ॥

कृत्वाग्निं प्रतिष्ठाप्य सर्वोपचारैरग्निं संपूज्य पूर्वोक्तप्रकारेण पञ्चवारुणि होमं कृत्वाष्टाक्षरद्वादशाक्षषडक्षरमन्त्रैः प्रत्येकाष्टोत्तरशताहुतिर्हुत्वा ॐ अग्नये पूर्णाय स्वपते स्वाहा । इत्यनेन मन्त्रेण पूर्णाहुतिं कृत्वाग्निं विसृज्य सिद्धान्नदानं कुर्यात् ।

पूर्वं सप्तदशपत्रपुटकेषु दधिघृतशर्कराकदलीफलादिसहितं पक्वान्नं निधाय तेष्वेकमादाय कुशजलादिकमादाय पुटकम्पृशन्- ॐ सोपस्करं सजलसिद्धान्नादिकं भूस्वामिस्वरूपिणे नारायणाय नमः । कुशादिकं भूमावुत्सृजेत् । तत विष्ण्वादिभ्यो दद्यात् । कुशजयुतमन्यान्नपुटकमादाय

अद्यामुकगोत्रस्यामुकनाम्नोऽदिवंगततृप्तय एतदन्नं सोपस्कर-अमृतस्वरूपं हव्यं श्रीविष्णुनाम्ने भगवते नारायण स्वाहा नमः ।

माता:- अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गतायास्तृप्तय इदं नैवेद्यं श्रीविष्णुनाम्ने भगवते नारायणाय स्वाहा नमः) इति दत्वा तत जलपुटक-मादाय- अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गतायाः तृप्तये श्रीविष्णुरूपाय भगवते नारायणाय त इदं जलं नमः) इति जलं च दद्यात् ।

इति दत्वा तत जलपुटकमादाय- अद्यामुकगोत्रस्यामुकनाम्नोऽदिवंगतस्य तृप्तय श्रीविष्णुनाम्ने भगवते नारायणायेदं जलं ते नमः । ततः प्रत्येकं शिवादिभ्यो दद्यात् ।

द्वितीये ॐ शिवात्मकाय भगवते नारायणाय स्वाहा नमः ।
तृतीये ॐ यमात्मकाय भगवते नारायणाय स्वाहा नमः ।
चतुर्थे ॐ सोमात्मकाय भगवते नारायणाय स्वाहा नमः ।
पञ्चमे ॐ हव्यवाहात्मकाय भगवते नारायणाय स्वाहा नमः ।
षष्ठे ॐ कव्यवाहात्मकाय भगवते नारायणाय स्वाहा नमः ।
सप्तमे ॐ कालात्मकाय भगवते नारायणाय स्वाहा नमः ।
अष्टमे ॐ रुद्रात्मकाय भगवते नारायणाय स्वाहा नमः ।
नवमे ॐ पुरुषात्मकाय भगवते नारायणाय स्वाहा नमः ।
दशमे ॐ प्रेतात्मकाय भगवते नारायणाय स्वाहा नमः ।
एकादशे ॐ विष्णुनाम्ने भगवते नारायणाय स्वाहा नमः ।
द्वादशे ॐ ब्रह्मात्मकाय भगवते नारायणाय स्वाहा नमः ।
त्रयोदशे ॐ विष्णुनाम्ने भगवते नारायणाय स्वाहा नमः ।
चतुर्दशे ॐ शिवात्मकाय भगवते नारायणाय स्वाहा नमः ।
पञ्चदशे ॐ यमात्मकाय भगवते नारायणाय स्वाहा नमः ।
षोडशे ॐ पुरुषात्मकाय भगवते नारायणाय स्वाहा नमः ।

एवं क्रमेण पिण्डान् दत्वाचमनादिकं कृत्वा तत्तत्पुरतः सर्वान् नमस्कृत्य तेषामग्रे वेद्यां कुशानास्तीर्यापसव्येन-

अद्यामुकगोत्रामुकनामन् दिवङ्गत भो जीवात्मन् त्वामावाहयामि इत्यावाह्य- अद्यामुकगोत्रामुकनामन् दिवङ्गत त आसनार्घ्यपाद्याचमन स्नानवस्त्रगन्धपुष्पधूपदीपादीनि स्वधा नमः । इति समर्पयेत् । सजल कुशादिकादाय-

अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे षोडशधा विभज्य सजलकौशेयपिण्डासनानि मया दीयन्ते नमः सम्पद्यन्ताम् पिण्डमादाय– अद्यामुकगोत्रामुकनामन् दिवङ्गत त एषः प्रथमपिण्डो मया दीयते नमः सम्पद्यताम्। एवं क्रमेण शोडषपिण्डान् दत्वा जलपूर्णानि शोडषपुटकानि शोडषस्थाने निधायैकैकपुटकमादाय–

अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं जलं मया दीयते नमः सम्पद्यताम्। एवं क्रमेण द्वितीयादि स्थाने पिण्डान् दत्वा जलपात्राणि च दद्यात्। ततो गन्धपुष्पादिभिः पिण्डान् संपूज्य पिण्डेषु दुग्धधारां दत्वा नमस्कृत्य पीताक्षतैः जीवात्मानं विसर्जयित्वा सव्यं कृत्वा यस्मा-दावाहिताश्चात्र तत्र सर्वे व्रजन्तु भो ! इति प्रणम्य सर्वानावाहितदेवान् विसर्जयेत्

इति मध्यमषोडशिविधिः

❖षष्ट्युत्तरत्रिशतघटदानम् ❖

अथ वृक्षमूलादौ गत्वा भूमौ विस्तृतं चतुरस्रं मण्डलं कृत्वा मध्ये धान्योपरि घटं संस्थाप्य घटोपरि तण्डुलपूर्णपात्रे कूर्चन्निक्षिप्यापसव्येन जीवात्मानम्

माता– अद्यामुकगोत्रेऽमुकनाम्नि दिवङ्गते त्वामावाहयामि। आसनार्घ्य पाद्याचमनस्नानगन्धपुष्पधूपदीपादीञ्च समर्पयामीतिसमर्पयेत्।

अद्यामुक- गोत्रेऽमुकनाम्नि दिवंगते ते पिण्डदानार्थे षोडशधा विभज्य सजलकौशेयपिण्डासनानि मया दीयन्ते नमः सम्पद्यन्ताम्।अद्यामुकगोत्रे ऽमुकनाम्नि दिवङ्गते त एषः प्रथमपिण्डो मया दीयते नमः सम्पद्यताम्)। इति प्रथमस्थाने दद्यात्।

एवं क्रमेणद्वितीयादि स्थानेपिण्डान् दत्वाजलपात्राणि च दद्यात्। जलपात्रं जलपूर्णपुटकं वा हस्तेन आदाय- अद्य अमुकगोत्रे अमुकनाम्नि दिवङ्गते त इदं जलं मया दीयते नमः सम्पद्यताम्।)

पीताक्षतैरावाहयेत् । भो जीवात्मन्नत्रागच्छेहस्थित्वोपचारान्स्वीकुरु । तत आसनं दद्यात्- अद्यामुकगोत्रस्यामुकनाम्नो दिवङ्गतस्य त इदमासनं नमःसम्पद्यताम् । ततः-अद्यामुकगोत्रामुकनामन् दिवगत त अर्घ्य-पाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्प धूपदीपनैवेद्यादीनि नमः सम्पद्यन्ताम् इति दत्वा परितः षष्ट्युत्तरत्रिशत घटेषु सुगन्धिद्रव्ययुक्तमधुरजलं पूरयित्वा कुशादिकमादाय-अद्यामुकगोत्रामुकनामन् दिवङ्गत ते स्नानपानादिना पिपासादिशान्तये सजला एते घटाःपत्रपुटकानि वा नमःसंपद्यन्ताम् । इति दत्वा धूपदीपनमस्कारान् कृत्वा पीताक्षतैः ।

भो जीवात्मन् स्वस्थानं व्रज । इति विसर्जयित्वा सव्यं विधायाचमनं कुर्यात् । ततः शुद्धपाकं कृत्वा भवते निवेद्य स्वयं भुञ्जीत ।

इति एकादशदिन कृत्यविधिः ।

माताचेत्-अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गताया त इदमासनं नमः सम्पद्यताम् ।) अद्यामुकगोत्रेऽमुकनाम्नि दिवगते त अर्घ्यपाद्याचमनस्नानवस्त्रो-पवीतगन्धपुष्पधूपदीपनैवेद्यादीनि नमः सम्पद्यन्ताम्) अद्यामुकगोत्रेऽमुकनाम्नि दिवङ्गते ते स्नानपानादिना पिपासादिशान्तये सजला एते घटाः पत्रपुटकानि वा नमः संपद्यन्ताम् ।)

इति एकादशदिन कृत्यविधिः ।

टिप्पणी-दिवंगतवैष्णवस्य वृषोत्सर्गं नावश्यकम्

अगत्वा शरणं ये तु मृता विप्रादयो जनाः ।
प्रेतयोनिं गतानां तु तेषामात्मविशुद्धये ॥
वृषोत्सर्गं प्रकुर्वन्ति कृत्वा चक्रेण लाञ्छनम् ।
तरिष्यन्ति तमस्तेऽपि शिक्षेयं मामकी सुत ॥
अनायुधासो ह्यसुरा न देवा इति वै श्रुतिः ।

❖ उत्तमषोडशिविधानम् ❖

अथ द्वादशेऽहन्युत्तमषोडशिविधिं कुर्यात्। आचार्यादि सहितः कर्त्ता कर्मपात्रं विधाय शुद्धस्थाने हवनवेदीं पूर्वपश्चिमायतां पिण्डवेदीं च निर्माय वेद्याः सप्तदशभागान् कृत्वा पञ्च भूसंस्कारान् कुर्यात्। त्रिभिर्दर्भैः परिसमूह्य गोमयोदकेनोपलिप्य श्रुवेण दर्भमूलेन वा दक्षिणोत्तरक्रमेण तिस्रो-रेखा उल्लिख्यानामिकाङ्गुष्ठाभ्यामुल्लेखनक्रमेण मृदमुद्धृत्यैशान्यां निक्षिप्य. शुद्धजलेन सम्प्रोक्ष्य कुशैराच्छादयेत्।रङ्गवल्लीं कृत्वा तत्र षोडशदीपान् प्रज्वाल्य सम्पूज्य सप्तदशघटान् संस्थाप्य षोडशघटेषु व्यूहान् संस्थाप्य सप्तदशघटे विष्वक्सेनं च संस्थाप्य संकल्पं कुर्यात्।

देशकालादीन् सङ्कीर्त्य-अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुक-नामाहं ममामुकस्यामुकगोत्रस्यामुकनाम्नो दिवंगतस्य परमपदगमनाय सर्वबाधानिवृत्तिपूर्वकपरमपदप्राप्तये भगवत्कैङ्कर्यरूपेण षोडशव्यूह पूजनपूर्वकहवनं पिण्डदानञ्चाहं करिष्ये (करिष्यामि वा)। इति संकल्प्य विष्वक्सेनस्थान विष्वक्सेनं पूजयेत्- ॐ भूर्भुवः स्वः सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनमावाहयामि स्थापयामि पूजयामि। इत्यावाह्याघ्र्यादि षोडशोपचारैः संपूज्य प्रणमेत्। वेद्यां षोडशस्थानेषु तण्डुलपुञ्जेषुकूर्चान् निक्षिप्यपीताक्षतैः सशक्तिकान् व्यूहानावाहयेत्॥

अद्यामुकगोत्रस्यामुकनाम्नोदिवङ्गतस्यास्मत्पित्रात्मकस्य भगवतः तृप्तये भगवदाज्ञया करिष्यमाणोत्तमषोडशपिण्डान्तर्गताद्योनमासिक-द्वितीयत्रैपाक्षिकतृतीयकचतुर्थपञ्चमषष्ठोनषाण्मासिकसप्तमाष्टम नवमदशमैकादशद्वादशमासिकोनाब्दिकपिण्डदानकर्मणिनित्यानन्दा सत्याहिरण्यात्रयीश्रीलक्ष्मीकमलापद्मापद्मिनीकमलालयारमावृषाकपि धन्यापृथ्वीयज्ञेन्दिरासहितानिरुद्धप्रद्युम्नसङ्कर्षणाधोक्षजकेशवना-रायणमाधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधर-

हृषीकेशपद्मनाभदामोदरान् (पुरुषोत्तममासश्चेत् सुखासहितं पुरुषोत्तमम्) आवाहयामि स्थापयामि पूजयामि इह तिष्ठन्तु क्रियमाणोपहारान् स्वीकुर्वन्तु । इत्यावाह्य पृथक् पृथक् षोडशोपचारैः पूजयेत् । तद्यथा –

ॐ नित्यानन्दासहितायभगवतेऽनिरुद्धायनमः ।आसनं समर्पयामि एवमर्घ्यपाद्याचमनीयस्नानवस्त्रगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणा नमस्कारनीराजनानि कृत्वा पुष्पाणि समर्प्य प्रणमेत् ॥

ॐ सत्यासहिताय भगवते प्रद्युम्नाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ हिरण्यासहिताय भगवते संकर्षणायनमः ।इति सर्वोपचारैःपूजयेत् ।

ॐ त्रयीसहिताय भगवतेऽधोक्षजाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ श्रीसहिताय भगवते केशवाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ लक्ष्मीसहिताय भगवते नारायणाय नमः ।इति सर्वोपचारैःपूजयेत् ।

ॐ कमलासहिताय भगवते माधवाय नमः । इति सर्वोपचारैः पूजयेत्

ॐ पद्मासहिताय भगवते गोविन्दाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ पद्मिनीसहिताय भगवते विष्णवे नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ कमलालयासहितायभगवतेमधुसूदनाय नमः । इतिसर्वोपचारैःपूजयेत्

ॐ रमासहिताय भगवते त्रिविक्रमाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ वृषाकपिसहितायभगवतेवामनाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ धन्यासहिताय भगवते श्रीधराय नमः ।इति सर्वोपचारैः पूजयेत् ।

ॐ पृथ्वीसहिताय भगवते हृषीकेशाय नमः ।इति सर्वोपचारैः पूजयेत् ।

ॐ यज्ञासहिताय भगवते पद्मनाभाय नमः । इति सर्वोपचारैः पूजयेत् ।

ॐ इन्दिरासहिताय भगवते दामोदराय नमः । इति सर्वोपचारैः पूजयेत्

वत्सरमध्ये यस्मिन्मासे यत्संख्याकमासिकश्राद्धे पुरुषोत्तममासमायाति तत्र सुखासहितं पुरुषोत्तमावाह्य पूजयेत् ।

(ॐ सुखासहिताय भगवते पुरुषोत्तमाय नम इति सर्वोपचारैः पूजयेत्।)

ततः पुरतो होमवेदीं निर्मायतत्राग्निं संस्थाप्य वसूनावाह्य संपूज्य ब्रह्माणं संपूज्य (२० पृष्टोक्त) पञ्चवारुणीहोमं कृत्वा मूलेनाष्टोत्तरशत वासुदेव-विष्णुमन्त्राभ्यां प्रत्येकमष्टोत्तरशतं हुत्वा केशवादिचतुर्विंशतिनामभिर्हुत्वा पूर्णाहुतिं कृत्वा परिषिच्य हवन आवाहितान् देवान् विसर्जयेत्। ततो व्यूहानां पुरतः प्रत्येकं चतुरस्रं पिण्डवेदीं निर्माय तिलान् विकीर्य जलेन चतुरस्रं मण्डलं विधाय तस्मिन् मण्डले गोघृतपक्वान्नादिकं नैवेद्यं सजलं पत्रादौ निधाय कुशजलादिकमादाय-

इदमन्नादिकं भूस्वामिस्वरूपिणे नारायणाय नमः स्वाहा इति मण्डले दत्वा ततः प्रत्येकभागमनिरुद्धादिदामोदरान्तेभ्यः सजलगोघृत-पक्वान्नादिकमादाय दद्यात् ।

अद्यामुकगोत्रायामुकनाम्ने दिवंगतायास्मत्पित्रात्मकाय नित्या-नन्दासहिताय भगवतेऽनिरुद्धायेदं गोघृतपक्वान्नादिकं नैवेद्यं ते नमः स्वाहा। इति मण्डलोपरि दत्वा पुटके जलमादाय- अद्यामुकगोत्राया-मुकनाम्नेऽस्मत्पित्रात्मकाय नित्यानन्दासहिताय भगवतेऽनिरुद्धायेदं जलं ते नमः स्वाहा इति दद्यात्।

२. अद्यामुकगोत्रायामुकनाम्ने दिवंगतायास्मत्पित्रात्मकाय सत्यासहिताय भगवते प्रद्युम्नायेदं गोघृतपक्वान्नादिकं नैवेद्यं ते नमः स्वाहा।

३. अद्य.....हिरण्यासहिताय भगवते संकर्षणाय इदं... ते नमः स्वाहा

४. अद्य.....त्रयीसहिताय भगवते अधोक्षजाय इदं... ते नमः स्वाहा

माता-अद्यामुकगोत्राया अमुकनाम्न्यै दिवंगताया अस्मन्मातृस्वरूपाया अनिरुद्धसहितायै भगवत्यै नित्यानन्दायम इदं गोघृतपक्वान्नादिकं नैवेद्यं ते नम इति मण्डलोपरि दत्वा पुटके जलमादाय- अद्यामुकगोत्राया अमुकनाम्न्यै दिवंगताया अस्मन्मातृस्वरूपाया अनिरुद्धसहितायै भगवत्यै नित्यानन्दाया इदं जलं ते नमः स्वाहा इति दद्यात्।)

५. अद्य.....श्रीसहिताय भगवते केशवाय इदं... ते नमः स्वाहा
६. अद्य.....लक्ष्मीसहिताय भगवते नारायणाय इदं... ते नमः स्वाहा
७. अद्य.....कमलासहिताय भगवते माधवाय इदं... ते नमः स्वाहा
८. अद्य.....पद्मासहिताय भगवते गोविन्दाय इदं... ते नमः स्वाहा
९. अद्य.....पद्मिनीसहिताय भगवते विष्णवे इदं... ते नमः स्वाहा
१०. अद्य...कमलालयासहिताय भगवते मधुसूदनाय इदं... ते नमः स्वाहा
११. अद्य.....रमासहिताय भगवते त्रिविक्रमाय इदं... ते नमः स्वाहा
१२. अद्य.....वृषाकपिसहिताय भगवते वामनाय इदं... ते नमः स्वाहा
१३. अद्य.....धन्यासहिताय भगवते श्रीधराय इदं... ते नमः स्वाहा
१४. अद्य.....पृथ्वीसहिताय भगवते हृषीकेशाय इदं... ते नमः स्वाहा
१५. अद्य.....यज्ञासहिताय भगवते पद्मनाभाय इदं... ते नमः स्वाहा
१६. अद्य.....इन्दिरासहिताय भगवते दामोदराय इदं... ते नमः स्वाहा

पुरुषोत्तममासश्चेत्- अद्य....सुखासहिताय भगवते पुरुषोत्तमाय इदं..ते नमः स्वाहा। ततः प्रत्येकजलपुटकमादाय

२. अद्यामुकगोत्रायामुकनाम्ने दिवंगतायमस्मत्पित्रात्मकाय सत्यासहिताय भगवते प्रद्युम्नायेदं जलं ते नमः स्वाहा
३. अद्य...हिरण्यासहिताय भगवते संकर्षणायेदं जलं ते नमः स्वाहा
४. अद्य...त्रयीसहिताय भगवते अधोक्षजायदं जलं ते नमः स्वाहा
५. अद्य... श्रीसहिताय भगवते केशवायेदं जलं ते नमः स्वाहा
६. अद्य...लक्ष्मीसहिताय भगवते नारायणायेदं जलं ते नमः स्वाहा
७. अद्य.....कमलासहिताय भगवते माधवायेदं जलं ते नमः स्वाहा
८. अद्य.....पद्मासहिताय भगवते गोविन्दायेदं जलं ते नमः स्वाहा
९. अद्य...पद्मिनीसहिताय भगवते विष्णव इदं. जलं ते नमः स्वाहा
१०.अद्य...कमलालयासहिताय भगवते मधुसूदनायेदं जलं ते नमः स्वाहा
११. अद्य.....रमासहिताय भगवते त्रिविक्रमाय इदं जलं ते नमः स्वाहा
१२. अद्य.....वृषाकपिसहिताय भगवते वामनाय इदं जलं ते नमः स्वाहा

१३. अद्य.....धन्यासहिताय भगवते श्रीधराय इदं जलं ते नमः स्वाहा
१४. अद्य.....पृथ्वीसहिताय भगवते हृषीकेशाय इदं जलं ते नमः स्वाहा
१५. अद्य.....यज्ञासहिताय भगवते पद्मनाभाय इदं जलं ते नमः स्वाहा
१६. अद्य...इन्दिरासहिताय भगवते दामोदराय इदं जलं ते नमः स्वाहा
(**पुरुषोत्तमे**–.अद्य..सुखासहिताय भगवते पुरुषोत्तमाय इदं..जलं ते नमःस्वाहा)

माता–अद्यामुकगोत्रायायमुकनाम्न्यै दिवंगतायायस्मन्मातृस्वरूपायै प्रद्युम्नसहितायै भगवत्यै सत्यायायिदं गोघृतपक्वान्नादिकं नैवेद्यं ते नमः स्वाहा

३. अद्य....संकर्षणसहितायै हिरण्यायै इदं... ते नमः स्वाहा
४. अद्य....अधोक्षजसहितायै त्रय्यै इदं... ते नमः स्वाहा
५. अद्य....केशवसहितायै भगवत्यै श्रियै इदं... ते नमः स्वाहा
६. अद्य....नारायणसहितायै भगवत्यै लक्ष्म्यै. इदं... ते नमः स्वाहा
७ अद्य....माधवसहितायै भगवत्यै कमलायै इदं... ते नमः स्वाहा
८ अद्य....गोविन्दसहितायै भगवत्यै पद्मायै इदं... ते नमः स्वाहा
९ अद्य....विष्णुसहितायै भगवत्यै पद्मिन्यै इदं... ते नमः स्वाहा
१० अद्य....मधुसूदनसहितायै भगवत्यै कमलालयायै इदं... ते नमः स्वाहा
११ अद्य....त्रिविक्रम सहितायै भगवत्यै रमायै इदं... ते नमः स्वाहा
१२ अद्य....वामनसहितायै भगवत्यै वृषाकप्यै इदं... ते नमः स्वाहा
१३ अद्य....श्रीधरसहितायै भगवत्यै धन्यायै इदं... ते नमः स्वाहा
१४ अद्य....हृषीकेशसहितायै भगवत्यै पृथ्व्यै इदं... ते नमः स्वाहा
१५.अद्य....पद्मनाभसहितायै भगवत्यै यज्ञायै इदं... ते नमः स्वाहा
१६.अद्य....दामोदरसहितायै भगवत्यै इन्दिरायै इदं... ते नमः स्वाहा

अद्यामुकगोत्रायायमुकनाम्न्यै दिवंगतायायस्मन्मातृस्वरूपायै प्रद्युम्नसहितायै भगवत्यै सत्यायै इदं जलं ते नमः स्वाहा
३. अद्य....संकर्षणसहितायै हिरण्यायै इदं जलं ते नमः स्वाहा
४. अद्य....अधोक्षजसहितायै त्रय्यै इदं जलं ते नमः स्वाहा
५. अद्य....केशवसहितायै भगवत्यै श्रियै इदं जलं ते नमः स्वाहा

ततः पुनराचमनीयं ताम्बूलं दक्षिणां समर्प्य प्रदक्षिणां कृत्वा नीराजनं विधाय प्रणम्य निवेदितमन्नमपसारयेत्। व्यूहानामग्रे वेद्यां कुशानास्तीर्य पुष्पाणि निक्षिप्यापसव्येन जीवात्मानम् पीताक्षतैरावाहयेत्।

अद्यामुकगोत्रामुकनामन् दिवंगत त्वमत्रागच्छेह स्थित्वोपचारान् स्वीकुरु। आसनम् दद्यात्- अद्यामुकगोत्रस्यामुकनाम्नो दिवङ्गतस्य त इदमासनं नमः संपद्यताम्॥

ततः अद्यामुकगोत्रामुकनामन् दिवङ्गत त अर्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपादीनि नमः संपद्यन्ताम्। इति दत्वा सजलकुशादिकान्यादाय- अद्यामुकगोत्रामुकनामन् दिवंगत ते पिण्डदानार्थे षोडशधाविभक्तानि सजलकौशेयपिण्डासनानि नमः संपद्यन्ताम्। इति दत्वा कुशजलसहितं पिण्डमादाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत

---

६. अद्य....नारायणसहितायै भगवत्यै लक्ष्म्यै	इदं जलं ते नमः स्वाहा
७ अद्य....माधवसहितायै भगवत्यै कमलायै	इदं जलं ते नमः स्वाहा
८ अद्य....गोविन्दसहितायै भगवत्यै पद्मायै	इदं जलं ते नमः स्वाहा
९ अद्य....विष्णुसहितायै भगवत्यै पद्मिन्यै	इदं जलं ते नमः स्वाहा
१० अद्य.मधुसूदनसहितायै भगवत्यै कमलालयायै	इदं जलं ते नमः स्वाहा
११ अद्य....त्रिविक्रमसहितायै भगवत्यै रमायै	इदं जलं ते नमः स्वाहा
१२ अद्य....वामनसहितायै भगवत्यै वृषाकप्यै	इदं जलं ते नमः स्वाहा
१३ अद्य....श्रीधरसहितायै भगवत्यै धन्यायै	इदं जलं ते नमः स्वाहा
१४ अद्य....हृषीकेशसहितायै भगवत्यै पृथ्व्यै	इदं जलं ते नमः स्वाहा
१५.अद्य....पद्मनाभसहितायै भगवत्यै यज्ञायै	इदं जलं ते नमः स्वाहा
१६.अद्य. दामोदरसहितायै भगवत्यै इन्दिरायै	इदं जलं ते नमः स्वाहा (
पु.मा..अद्य पुरुषोत्तमसहितायै भगवत्यै सुखायै	इदं जलं ते नमः स्वाहा)

अद्यामुकगोत्रे अमुकनाम्नि दिवंगते त्वमत्रागच्छेह स्थित्वोपचारान् स्वीकुरु। आसनं दद्यात् -अद्यामुकगोत्रे अमुकनाम्नि दिवंगते त इदमासनं नमः संपद्यताम्।)

त एषः प्रथमः पिण्डो नमः संपद्यतामिति प्रथमस्थाने दद्यात् । एवं क्रमेण द्वितीयादि स्थाने द्वितीयादिपिण्डान् तत्तत्स्थाने दत्वा षोडशपत्रपुटकेषु जलं निधाय- अद्यामुकगोत्रामुकनामन् दिवङ्गत त इदं प्रथमं जलपुटकं नमः संपद्यताम् । इति प्रथमस्थाने दत्वा एवं क्रमेण द्वितीयादिस्थाने द्वितीयादि जलपुटकानि तत्तत्स्थाने दद्यात् । गन्धादिसर्वोपचारैः पिण्डान् सम्पूज्य गोदुग्धेन स्नापयित्वा प्रणम्य जीवात्मानं विसर्जयेत्- भो जीवात्मन् स्वस्थानं व्रज । ततः सव्यं कृत्वा प्रद्युम्नादीन् प्रणमेत् ।

प्रद्युम्नादिमहाभागाः प्रसीदन्तु ममोपरि ।
यन्न्यूनतातिरिक्तं स्यात् सर्वं सम्पूर्णतां व्रजेत् ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ततः विसर्जयेत्- अत्र ह्यावाहिताः सर्वे स्वस्वस्थानं व्रजन्तु भो इति पीताक्षतान् विकिरेत् ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः ॥

❁❁इत्युत्तमषोडशपिण्डदानविधिः❁❁

माता– अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गतायास्त इदमासनं नमः संपद्यताम् । ततः अद्यामुकगोत्रेऽमुकनाम्नि दिवङ्गते त अर्घ्य-पाद्य-आचमन-स्नान-वस्त्र-उपवीत-गन्ध-पुष्प-धूप-दीपादीनि नमः संपद्यन्ताम् इति दत्वा सजलकुशादिकानि आदाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त पिण्डदानार्थे षोडशधा विभक्तानि सजलकौशेय-पिण्डासनानि नमः संपद्यन्तामिति दत्वा कुशजलसहितं पिण्डमादाय- अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त एषः प्रथमः पिण्डः नमः संपद्यतामिति प्रथमस्थाने दद्यात् ।)

अद्यामुकगोत्रेऽमुकनाम्नि दिवंगते त इदं प्रथमं जलपुटकं नमः संपद्यताम् ।)

❖पिण्डनविधिः❖

द्वादशाहे कर्त्ता सपिण्डिदिनात् पूर्वदिने सायंकाले ज्ञानाधिकानां सदाचारिणां शरीरदोषरहितानां विप्राणामामन्त्रणं वासुदेवसङ्कर्षणप्रद्युम्ना-निरुद्धनामभिः कुर्यात्। सपिण्डिदिवसे चाचार्यसहितान् तानाहूय तेषां कर-चरणादि शुद्धिं कारयित्वा स्वासनेषूपवेश्य गन्धाद्युपचारैः संपूज्य प्रणमेत्।

आचार्यो हस्तपादौ प्रक्षाल्याचम्य यागोचितां शुद्धभूमिमुपलिप्य र-ङ्गवल्यादिभिश्चित्रितां कृत्वा तन्मध्ये हस्तमितां चतुरस्रां मृदा होमवेदीं निर्माय होमवेदितो दक्षिणश्चतुरङ्गुलमायतां चतुर्विंशाङ्गुलविस्तारां सपिण्डनवेदीं कुर्यात् वेदिद्वयञ्च पञ्चभूसंकारैः संशोधयेत्। अथ कर्त्ता आचम्य प्राणानायम्य कर्मपात्रं विधाय हस्ते जलाक्षतमादाय संकल्पं कुर्यात् । पूर्वोक्तप्रकारेण देशकालादीन् संकीर्त्य-

---

टिप्पणी-सपिण्डनदिनादारभ्य परमैकान्तिकैः श्रीवैष्णवैः श्राद्धं देवकर्मवत् कर्त्तव्यम्।

कुम्भस्य दक्षिणे पार्श्वे गोमयालिप्त भूतले ।
त्रिकोणमण्डलं कृत्वा वृत्तं वा साधकोत्तमः ॥
दक्षिणाग्रान् कुशान्न्यस्य तेषु कुम्भं निवेशयेत्।
माषान्नं तिलसंमिश्रं मध्वाज्य दधि संयुतम् ॥
क्षीरयुक्तं च षट्पिण्डान् कारयित्वा विनिक्षिपेत्।
पिता पितामहश्चैव प्रपितामह एव च ॥
सपत्नीकानिमाँश्चोक्त्वा गोत्रनामादिभिः क्रमात्।
बदरीफलमात्राणि दद्यात् पिण्डानि देशिकः ॥
येन श्राद्धं कृतं ब्रह्मन् तं विद्यादनिरुद्धकम्।
प्रद्युम्नं च ततो विद्यात् संकर्षणमतः परम् ॥
वासुदेवं च तत्पश्चात् प्रपितामहमर्चयेत्।
कुम्भोदकेन तान् पिण्डान् अष्टाक्षरविधानतः।

भगवदाज्ञया भगवद् कैङ्कर्यत्वेन भगवत् प्रीत्यर्थममुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य भगवदपचारभागवतापचारासह्यापचारनिवृत्तिपूर्वकं लक्ष्मीनारायणसायुज्यप्राप्त्यर्थं सपिण्डिकर्म करिष्यामि तदर्थं विष्वक्सेनपूजनं कालकामसंज्ञकविश्वेदेवपूजनं च करिष्यामि। इति संकल्प्य पलाशमध्यपर्णे पत्रपुटकादौ वा स्थापिततण्डुलपुञ्जे सूत्रवतीसहितं विष्वक्सेनं पूजयेत्।

माता–अमुकगोत्राया अमुकनाम्न्या दिवङ्गताया भगवदपचारभागवतापचारसह्यापचारनिवृत्तिपूर्वकं लक्ष्मीनारायणसायुज्यप्राप्त्यर्थं सपिण्डि कर्मकरिष्यामि तदर्थं विष्वक्सेनपूजनं कालकामसंज्ञकविश्वेदेवपूजनं च करिष्यामि।)

वैष्णवानां विशेषोऽयं पित्र्ये कर्मणि वर्तते॥

देवकर्मेव श्राद्धं कर्तव्यं वैष्णवैः–

वैष्णवानां गृहस्थानां कर्तव्यं दैवकर्मवत्।

वैष्णवपुत्रं विना अवैष्णवपितृणां क्रन्दनम्–

वारयिष्यति नः पातात् विना श्रीवैष्णवान् सुतान्।

अस्माभिरर्जिते पुण्ये क्षयं जाते च कः पुनः॥

वैष्णवपितरः– सर्वे चतुर्भुजा ज्ञेयाः शङ्खचक्रगदाधराः॥

वैष्णवानां हि पितरो न वै नरकवासिनः॥

ते पितृलोकेऽपि न सन्ति– प्रद्युम्नसंकर्षणवासुदेवा इति त्रयः।

त्रिपाद्विभूतिराख्याता अमृता मुक्तिसेतवः॥

अतो देवादिभिः पित्रे ब्राह्मणा ब्रह्मकांक्षिणः।

त्रिपादं पुरुषं साक्षाद्यजन्ति मनसा धिया॥

आत्मानमनिरुद्धेन ह्यभिन्नं चिन्त्य चेतसा।

प्रद्युम्नादिस्वरूपेण त्रिपादी पुरुषत्रयम्॥

ॐ सपरिवाराय सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः । इति सपरिवारं सूत्रवतीसहितं विष्वक्सेनमावाह्य षोडशोपचारैः संपूज्य प्रणमेत् ।

ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः ।
स मे वैकुण्ठसेनानीर्भूयात् सर्वत्र विघ्नहा ॥

ततः पुण्याहवाचनं विधाय तज्जलेनात्मानयजमानगृहयागोपकरणानि परिषिञ्चेत् । पुण्याहवाचनक्रममग्रे (१२६ पृष्ठे) द्रष्टव्यम् । सपिण्डवेद्यां दक्षिणोत्तरक्रमेण पञ्चरेखाः कृत्वा तासु प्रत्येकं तण्डुलपूर्णपुटकेषु कुशकूर्चानि निधाय तेषु चतुर्षु स्थानेषु तथा निमन्त्रितविप्रविग्रहेषु च पुष्पाक्षतैः वासुदेव-सङ्कर्षणप्रद्युम्नानिरुद्धानावाह्य पूजयेत् पञ्चमकूर्चस्थाने कालकामसंज्ञकान् विश्वेदेवान् पूजयेत् ।

ॐ विश्वेदेवाः श्रृणुतेम गँ हवं मे येऽअन्तरिक्षे यऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवा यजत्राऽआसद्यास्म्मिन् बर्हिषिमादयद्ध्वम् ॥
इत्यावाह्य- अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डिनिमित्तक कालकामसंज्ञकविश्वेदेवा एतान्यासनाद्यर्घ्यपाद्या-चमनवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यदक्षिणादीनि वो नम इति विश्वेदेवेभ्यः सर्वोपचारान् दत्वा प्रणमेत् ।

पैत्रं स्थानं वैष्णवानामिदमेव परं मतम् ।
मार्गोऽयमर्चिरादिः स्यात्सूर्यलोकमुखेन हि ॥
मार्गेणानेन गच्छन्ति वैष्णवाः परमात्मनि ।
नान्यो लोके निवासाय श्रुतिरत्र सनातनी ॥
कर्मिणां सूर्यपुत्रस्य लोकद्वारेण वै गतिः ।
वसुरुद्रादिरूपेण पैत्रं स्थानमथापरम् ।
वैष्णवानामनन्यानां वासुदेवमुपेयुषाम् ।
यजनं शुद्धरूपाणां केशवादिस्वरूपिणाम् ॥

आवाहयाम्यहं देवं वासुदेवं जगत्पतिम् ।
अमृताध्मातमेघाभं विद्युत्सदृशवाससम् ॥
एह्येहि पुण्डरीकाक्ष शरणागतवत्सल ।
सर्वकाम प्रदाचिन्त्य सर्वशक्तिबलान्वित ॥

ॐ हरिणीसहिताय वासुदेवाय नमो हरिणीसहितं वासुदेवमावाहयामि स्थापयामि पूजयामि ।

आवाहयाम्यहं देवं सङ्कर्षणमनामयम् ।
शशाङ्कशतसङ्काशं सजलाम्बुदवाससम् ॥
एहि सङ्कर्षणाचिन्त्यदेवभक्तजनप्रिय ।
वाङ्मनः कायसम्भूतमलत्रितयनाशन ॥

ॐ हिरण्यासहिताय संकर्षणाय नमो हिरण्यासहितं संकर्षणमावाहयामि स्थापयामि पूजयामि ।

देवमावाहयाम्यद्य प्रद्युम्नमपराजितम् ।
दुर्वाङ्कुरदलश्यामं शशाङ्कांशु समाम्वरम् ॥
काम कामप्रद शान्त कमनीयगुणालय ।
प्रद्युम्नाभ्येहि देवेश प्रद्योतित चराचर ॥

सत्यासहिताय प्रद्युम्नाय नमः सत्यासहितं प्रद्युम्नमावाहयामि स्थापयामि पूजयामि ।

आवाहयाम्यहं देवमनिरुद्धं जगद्गुरुम् ।
पद्मपत्राग्रसङ्काशं रक्ताम्बरविभूषणम् ॥
अनिरुद्धत्वमभ्येहि व्याप्ताशेषचराचर ।
सर्वेषां प्राणिनां कर्मसाक्षिभूत परात्पर ॥

नित्यानन्दासहितायानिरुद्धाय नमो नित्यानन्दासहितमनिरुद्धमावाहयामि स्थापयामि पूजयामि । सर्वेषां ध्यानम्

सर्वे चतुर्भुजा ध्येयाः शङ्खचक्रगदाधराः ।
किरीटकौस्तुभधरा वैनतेयासनेस्थिताः ॥
प्रोद्यता इव चोद्धर्तुं प्रेतभूतं हि नारद ॥

इत्यावाह्यासनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्य-ताम्बूलदक्षिणाप्रदक्षिणानमस्कारैः पूजयेत् । ततो रौप्यादिपात्रेषु पर्णपुटकेषु वा पलैकं दधि पलैकं सर्पिः पलैकं मधु कर्पूरञ्च संमिश्य तुलसीदलं निक्षिप्य मूलमन्त्रेणाभिमन्त्र्य चतुर्भ्यो निवेदयेत् ।

ॐ गृहाण चेमं मधुपर्कमाद्यं संसार नाशनकरं ह्यमृतेन तुल्यम् । नारायणेन रचितं भगवत्प्रियाणां दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥ इति मधुपर्कम्प्रदाय हस्तमुखशोधनं कारयित्वा जितन्तेन स्तुवीत ॥

❖अथ जितन्तस्तोत्रे प्रथमोध्यायः❖

ॐ जितन्ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह ।
परानन्द परब्रह्म नमस्ते चतुरात्मने ॥
नमस्ते पीतवसने नमः कटकधारिणे ।
नमो नीलालकाबद्धवेणीसुन्दर पुङ्गव ।
स्फुरद्वलयकेयूरनूपुराङ्गदभूषणैः ।
शोभनैर्भूषिताकारकल्याणगुणराशये ॥
करुणापूर्णहृदय शङ्खचक्रगदाधर ।
अमृतानन्दपूर्णाभ्यां लोचनाभ्यां विलोकय ॥
कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम् ।
अपराधसहस्राणामाकरं करुणाकर ॥
कृपया मां केवलया गृहाण मथुराधिप ।
विषयार्णवमग्नं मामुद्धर्तुं त्वमिहार्हसि ॥

पिता माता सुहृद्बन्धुः भ्राता पुत्रस्त्वमेव मे ।
विद्या धनञ्चकामश्च नान्यं किञ्चित्त्वया विना ॥
यत्र कुत्र कुले वासो येषु केषु भवोस्तु मे ।
तव दास्यैक भावे स्यात् सदा सर्वत्र मे रतिः ॥
मनसा कर्मणा वाचा शिरसा वा कथञ्चन ।
त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् ॥
पाहि पाहि जगन्नाथ कृपया भक्तवत्सल ।
अनाथोहमधन्योहमकृतार्थो ह्यकिञ्चनः ॥
नृशंसः पापकृत् क्रूरो वञ्चको निष्ठुरः सदा ।
भवार्णवनिमग्नं मामनन्यकरुणानिधे ॥
करुणापूर्णदृष्टिभ्यां दीनं मामवलोकय ।
त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो ॥
मया कृतानि पापानि त्रिविधानि पुनः पुनः ।
त्वत्पादपङ्कजं प्राप्तुं नान्यत् त्वत्करुणां विना ॥
साधनानि प्रसिद्धानि यागादीन्यब्जलोचन ।
त्वदाज्ञया प्रयुक्तानि त्वामुद्दिश्य कृतानि वै ॥
भक्त्यैकलभ्यः पुरुषोत्तमो हि जगत्प्रसूतिस्थितिनाशहेतुः ।
अकिञ्चनं नान्यगतिं शरण्यं गृहाण मां क्लेशिनमम्बुजाक्ष ॥
धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन ।
त्वत्पादपङ्कजं साधो जीवितं दीयतां मम ॥
कामये तावकत्वेन परिचर्यासु वर्तनम् ।
नित्यं किङ्करभावेन परिगृह्णीष्व मां विभो ॥
लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥

नित्यसिद्धैः समाकीर्णं त्वन्मयैः पाञ्चकालिकैः ।
सभा प्रासाद संयुक्तं वनैश्चोपवनैः शुभैः ॥
वापीकूपतडागैश्च वृक्षखण्डैः सुमण्डितम् ।
अप्राकृतसुरैर्वन्द्यमयुतार्कसमप्रभम् ॥
प्रकृष्टसत्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा ।
क्रीडन्तं रमयासार्द्धं लीलाभूमिषु केशवम् ॥
मेघश्यामं विशालाक्ष्यं कदा द्रक्ष्यामि चक्षुषा ।
उन्नसं चारुदशनं विम्बोष्ठञ्च शुभाननम् ॥
विशालवक्षसं श्रीशं कम्बुग्रीवं जगद्गुरुम् ।
आजानुबाहुपरिघमुन्नतांशं मधुद्विषम् ॥
तनूदरं निम्ननाभिमापीनजघनं हरिम् ।
करभोरुश्रियः कान्तं कदा द्रक्ष्यामि चक्षुषा ॥
शंखचक्रगदापद्मैरङ्कितं पादपङ्कजम् ।
शरच्चन्द्रशताक्रान्तं नखराजिविराजितम् ॥
सुरासुरैर्वन्द्यमानमृषिभिर्विदितं सदा ।
मूर्द्धानं मामकं देव तावकं मण्डयिष्यति ॥
कदा गम्भीरया वाचा श्रिया युक्तो जगत्पते ।
चामरव्यग्रहस्तं मामेवंकुर्विति वक्ष्यति ॥
कदाहं राजराजेन गणनाथेन नोदितः ।
चरेयं भगवत्पादपरिचर्यानुवृत्तिषु ॥
शान्ताय सुविशुद्धाय तेजसे परमात्मने ।
नमः सर्वगुणातीत षाड्गुण्यायातिवेधसे ॥
सत्यज्ञानानन्तगुणब्रह्मणो चतुरात्मने ।
चतुः पञ्चनवव्यूह दशद्वादश मूर्तये ॥

नमोनन्ताय विश्वाय विश्वातीताय चक्रिणे ।
नमस्ते पञ्चकालज्ञ पञ्चकालपरायण ॥
पञ्चकालैकमनसां त्वमेव गतिरव्यय ।
स्वमहिम्नि स्थितं देवं निर्विकारं निरञ्जनम् ॥
अप्रमेयमजं विष्णुं शरणं त्वां गतोस्म्यहम् ।
गुणातीतं परं शान्तमब्जनाभं सुरेश्वरम् ॥
तुरीयाद्यतिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम् ।
विश्वरूपं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ॥
मोक्षं सालोक्यसारूप्यं प्रार्थये न धराधर ।
इच्छामि हि महाभाग कारुण्यं तव सुव्रत ॥
सकलावरणातीत किंकरोस्मि तवानघ ।
पुनः पुनः किंकरोस्मि तवाहं पुरुषोत्तम ॥
आसनाद्यनुयागान्तमर्चनं यन्मयाकृतम् ।
भोगहीनं क्रियाहीनं मन्त्रहीनमभक्तिकम् ॥
तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु ।
इति स्तोत्रेण देवेशं स्तुत्वा मधुविघातिनम् ॥
यागावसानसमये देवदेवस्य चक्रिणः ।
नित्यं किंकर भावेन स्वात्मानं विनिवेदयेत् ॥
इति श्रीपाञ्चरात्रागमे जितन्तेस्तोत्रे प्रथमोध्यायः ॥

❖अथ द्वितीयोध्याय:❖

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेस्तु हृषीकेश महापुरुषपूर्वज ॥
विज्ञापनमिदं देव श्रृणुष्व पुरुषोत्तम ।
नरनारायणाभ्यां च श्वेतद्वीपनिवासिभि: ॥
नारादाद्यैर्मुनिगणै: सनकाद्यैश्च योगिभि: ।
ब्रह्मेशाद्यै: सुरगणै: पञ्चकालपरायणै: ॥
पूज्यसे पुण्डरीकाक्ष दिव्यैर्मन्त्रैर्महात्मभि: ।
पाषण्डधर्मसङ्कीर्णे भगवद्भक्तिवर्जिते ॥
कलौ जातोस्मि देवेश सर्वधर्मबहिष्कृते ।
कथं त्वामसमाचार: पापप्रसवभूरहम् ॥
अर्चयामि दयासिन्धो पाहि मां शरणागतम् ।
तापत्रयदवाग्नौ च दह्यमानं सदा विभो ॥
पाहि मां पुण्डरीकाक्ष केवलं कृपया तव ।
जन्ममृत्युजराव्याधिदु:खसन्तप्तदेहिनम् ॥
पालयासु दृशा देव तव कारुण्यगर्भया ।
इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम ।
शरीरं मम देवेश व्यादिभि: परिपीडितम् ॥
मनो मे पुण्डरीकाक्ष विषयानेव धावति ।
वाणी मम हृषीकेश मिथ्या पारुष्यदूषिता ॥
एवं साधनहीनोऽहं किं करिष्यामि केशव ।
रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा ॥
अपराधसहस्राणां सहस्रमयुतं तथा ।

अर्वुदं चाप्यसंख्येयं करुणाब्धे क्षमस्व मे ॥
यच्चापराधकृतवानज्ञानात् पुरुषोत्तम ।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥
अज्ञत्वादल्पशक्तित्वादालस्याद्दुष्टभावनात् ।
कृतापराधकृपणं क्षन्तुमर्हसि मां विभो ॥
अपराधसहस्राणि क्रियन्तेहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व मधुसूदन ॥
यज्जन्मनः प्रभृति मोहवशं गतेन
नानापराधशतमाचरितं मया ते ।
अन्तर्बहिश्च सकलं तव पश्यतोऽपि
क्षन्तुं त्वमर्हसि हरे करुणावशेन ॥
कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ॥
इति श्रीपाञ्चरात्रे जितन्तेस्तोत्रे द्वितीयोध्यायः ॥

❖ अथ तृतीयोध्यायः ❖

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेस्तु हृषीकेश महापुरुषपूर्वज ॥
नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ।
अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ॥
अच्युतायाविकाराय तेजसां निधये नमः ।
चतुः पञ्च नवव्यूह द्वादशाक्षरमूर्तये ॥
अनेक मूर्तये तुभ्यममूर्त्तायैकमूर्त्तये ।

नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ॥
सुभ्रू ललाट सुनस सुस्मिताधर विद्रुम ।
पीनवृत्तायतभुज श्रीवत्सकृतभूषण ॥
तनुमध्य महावक्ष पद्मनाभ नमोऽस्तुते ।
विलासविक्रमाक्रान्तत्रैलोक्यचरणाम्बुज ॥
नमस्ते पीतवसन स्फुरन्मकरकुण्डल ।
स्फुरत्किरीटकेयूरहारकौस्तुभभूषण ॥
पञ्चायुध नमस्तेस्तु नमस्ते पञ्चकालिक ।
पञ्चकालायतेक्रान्त योगक्षेमावह प्रभो ॥
नित्यज्ञानबलैश्वर्य भोगोपकरणाच्युत ।
नमस्ते ब्रह्मरुद्रादि लोकयात्रा प्रवर्तक ॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तव सुव्रत ।
त्वञ्च स्वामी गुरुर्माता पिता च मम माधव ॥
अपि त्वां भगवन् ब्रह्मशिवशक्रमहर्षयः ।
द्रष्टुं यष्टुमभिष्टोतुमद्यापीश नहीशिरे ॥
तापत्रयमहाग्राह भीषणे भवसागरे ।
मज्जतां नाथ नौरेषा प्रणतिस्तु त्वदर्पिता ॥
अनाथाय जगन्नाथ शरण्याशरणार्थिने ।
प्रसीद सीदते मह्यं मुह्यते भक्तवत्सल ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
तत् क्षन्तव्यं प्रपन्नानामपराधसहा ह्यसि ॥
चतुः पञ्च नवव्यूह द्वादशाक्षरमूर्तये ॥
अनेक मूर्तये तुभ्यममूर्त्तायैकमूर्त्तये ।

त्रिभिर्ज्ञानबलैश्वर्यवीर्यशक्त्योजसां युगैः ।
त्रियुगाय नमस्तेस्तु नमस्ते चतुरात्मने ॥
प्रधानपुरुषेशाय नमस्ते पुरुषोत्तम ।
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किङ्करोस्मि हृषीकेश भूयो भूयोस्मिकिङ्करः ॥
एकत्रिचतुरत्यन्त चेष्टज्येष्ठाकृतिस्थिते ।
व्यक्तषाड्गुण्यचेष्टाय चतुरात्मात्मने नमः ॥
इति श्रीपाञ्चरात्रे जितन्तेस्तोत्रे तृतीयोध्यायः।

❖अथ चतुर्थोध्यायः❖

जितन्ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह ।
नमस्तेस्तु हृषीकेश महापूरुषपूर्वज ॥
देवानां दानवानां च सामान्यमधिदैवतम् ।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥
एकस्त्वमस्य लोकस्य स्रष्टा संहारकारक ।
अध्यक्षश्चानुमन्ताच गुणमायासमावृतः ॥
संसारसागरं घोरमनन्तक्लेशभाजनम् ।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥
न ते रूपन्न चाकारो नायुधानि न चास्पदम् ।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥
नैव किञ्चित् परोक्षन्ते प्रत्यक्षोऽसि न कस्यचित् ।
नैव किञ्चिदसाध्यं ते न चासिद्धोऽसि कर्हिचित् ॥
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।

योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥
अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे ।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥
कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।
शरीरे च गतौ चापि वर्तते मे महद्भयम् ॥
त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।
निमित्तकुशलस्यास्ति येन गच्छामि सद्गतिम् ॥
विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमूर्जितम् ।
जन्मान्तरेऽपि देवेश मा भूदस्य परिक्षयः ॥
दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं न विन्देत तावतास्मि कृती सदा ॥
न काम कलुषं चित्तं मम ते पादयोः स्थितम् ।
कामये वैष्णवत्वञ्च सर्वजन्मसु केवलम् ॥
अज्ञानाद्यदि वा ज्ञानादशुभं यत्कृतं मया ।
क्षन्तुमर्हसि देवेश दास्येन च गृहाण माम् ॥
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किङ्करोऽस्मि हृषीकेश भूयो भूयोऽस्मि किङ्करः ॥
इत्येवमनयास्तुत्या स्तुत्वा देवं विनोदये ।
किङ्करोऽस्मीति चात्मानं देवाय विनिवेदयेत् ॥
यच्चापराधं कृतवानज्ञानात्पुरुषोत्तम ।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥
अहंकारार्थकामेषु प्रीतिरद्यैव नश्यतु ।
त्वां प्रपन्नस्य मे सैव वर्द्धतां श्रीमति त्वयि ॥

क्वाहमत्यन्तदुर्बुद्धिः क्व नु चात्महितेक्षणम् ।
यद्धितं मम देवेश तदाज्ञापय माधव ॥
सोऽहं ते देवदेवेश नार्चनादौ स्तुतौ न च ।
सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे ॥
उपचारापदेशेन क्रियतेऽहर्निशं मया ।
अपचारान्निमान्सर्वान्क्षमस्व पुरुषोत्तम ॥
न जाने कर्म यत् किञ्चिन्नापि लौकिकवैदिकौ ।
न निषेधविधिर्विष्णो तदा दासोऽस्मि केवलम् ॥
स त्वं प्रसीद भगवन् कुरु मय्यनाथे ।
विष्णो कृपां परमकारुणिकः किल त्वम् ॥
संसारसागरनिमग्नमनन्तदीन-
मुद्धर्तुमर्हसि हरे करुणावशेन ॥
इति श्रीपाञ्चरात्रे जितन्ते स्तोत्रे चतुर्थोध्यायः ।

❖ अथ पञ्चमोध्यायः ❖

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥
नमस्ते वासुदेवाय शान्तानन्तचिदात्मने ।
अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ॥
महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥
सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
अमूर्तये नमस्तुभ्यमेकमूर्ताय ते नमः ॥

अनेकमूर्तये तुभ्यमक्षराय च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥
चिन्मात्ररूपिणे तुभ्यं नमस्तुर्यादिमूर्तये ।
अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥
वरिष्ठाय वसिष्ठाय कनिष्ठाय नमो नमः ।
नेदिष्ठाय दविष्ठाय क्षेपिष्ठाय च ते नमः ॥
पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिणे नमः ।
कलाषोडशरूपाय सृष्टिस्थित्यन्तहेतवे ॥
नमस्ते गुणरूपाय गुणारूपानुवर्तिने ।
व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे ॥
लोकयात्राप्रसिद्ध्यर्थं सृष्टब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमूर्तिभेदाय विष्णवे ॥
नाहं हित्वा प्रजानामि त्वां भजाम्येव केवलम् ।
आदिमध्यान्तशून्याय तद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥
विपाकैः कर्मभिः क्लेशैरस्पृष्टवपुषे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥
नित्यसाधारणानेकलोकरक्षपरिक्षदे ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥
यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
नित्यकालात्मने तुभ्यं नमः स्वाध्यायशालिने ।
नमः परमहंसाय नमः सत्त्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥

हरिर्देहभृतामात्मा परमप्रकृतीश्वरः ।
त्वत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥
संसारसागरे घोरे विषयावर्त्तसंकुले ।
अपारे दुस्तरेगाधे वर्तेहं कर्मभिः स्वकैः ॥
अनाथमगतिं भीरु दयया परया हरे ।
मामुद्धर दयासिन्धो संसाराब्धेः सुदुस्तरात् ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
तत् क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि ॥
अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥
जन्मप्रभृतिदासोऽस्मि शिष्योऽस्मि तनयोऽस्मिते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥
नाहं हित्वा प्रजानामि त्वां भजाम्येव केवलम् ।
बुद्ध्वैवं मम गोविन्द भक्त्युपायेन मां हरे ॥
त्वां विना मे प्रियो नान्यो नेदं नेदमितीति च ।
बुद्धिं नीतिं च मे देहि येन त्वामुपयाम्यहम् ॥
इति विज्ञाप्य देवेशं वैश्वदेवस्वधामनि ।
कुर्यात्पञ्चमहायज्ञानपि गृह्योक्तकर्मणा ॥
इत्यादि समये तस्य कथितः कमलासन ।
देवानां सारमुद्धृत्य सर्वागमसमृद्धये ॥

इति श्रीपाञ्चरात्रे महोपनिषदि ब्रह्मतन्त्रे श्रीमदष्टाक्षरकल्पे
जितन्तेस्तोत्रे पञ्चमोध्यायः समाप्तः ।

ततो होमवेद्यां पञ्चभूसंकारान् कृत्वा यथा सम्भवमग्निं संस्थाप्य तद्दक्षिणतः त्रिभिः कुशैर्ब्रह्मासनमास्तीर्य द्वादशदर्भनिर्मितकूर्चे ब्रह्माणमावाह्य संपूज्य पात्रासादनं कृत्वा कुशैः परिस्तीर्य प्रणीतोदकेन परिषिच्येध्ममादा-याज्याधाराहुतीर्हुत्वा घृतपायसेन पुरुषसूक्तेन हुत्वाज्येन श्रीसूक्तेन सर्पिसर्क-रात्कतिलैः नारायणानुवाकविष्णुसूक्तभूसूक्तैर्हुत्वा नारायणाष्टाक्षर-वासुदेवद्वादशाक्षरविष्णुषडक्षरमन्त्ररत्नैः प्रत्येकमष्टोत्तरशतं हुत्वा ॐ वासुदेवाय नमः स्वाहा । ॐ सङ्कर्षणाय नमः स्वाहा । ॐ प्रद्युम्नाय नमः स्वाहा ।ॐ अनिरुद्धाय नमः स्वाहा ॥ इति मन्त्रैःप्रत्येकमष्टोत्त-रशतं हुत्वा वैकुण्ठपार्षदनामभिःचतुर्विंशतिनामभिश्च जुहुयात्। ततः पार्षदेभ्यो बलिं प्रदाय पूर्णाहुतिं हुत्वा परिषेचनादिकमवशिष्टकार्यं सर्वं परिसमाप्य सिद्धान्नदानं कुर्यात् ।

॥ सिद्धान्नदानम् ॥

सप्तपुटकेषु दधिघृतशर्कराफलव्यञ्जनादिसहितं सिद्धान्नं निधाय पूर्वोक्तप्रकारेण विश्वेदेवान् व्यूहादीञ्च प्रपूज्य हस्ते कुशजलमादायैकं सिद्धान्न-पुटकम्पृशन् -ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डीश्राद्धे सोपस्करं सजलमिदमन्नादिकं भूस्वामिस्वरूपिणे ना-रायणाय नमः । इत्युक्त्वा कुशजलादिकं भूमावुसृजेत् । तत आचमनादिकं कारयित्वा विश्वेदेवादीनां पुरत द्वौ सिद्धान्नपुटकौ निधाय कुशजलादिकमादाय

ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डीश्राद्धे भगवदात्मककालकामसंज्ञकविश्वेदेवा एतत्सव्यञ्जनं हव्यं वो नमः ॥

माता– ॐ अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गतायाः सपिण्डीश्राद्धे सोपस्करं सजलमिदमन्नादिकं भूस्वामिस्वरूपिणे नारायणाय नमः ।

ॐ अद्यामुकगोत्रायामुकनाम्न्या दिवंगतायाः सपिण्डीश्राद्धे भगव-दात्मककालकामसंज्ञकविश्वेदेवा एतत्सव्यञ्जनं हव्यं वो नमः ॥

ततो वासुदेवादिव्यूहानामग्रे पृथक्पृथकेकैकभागं सिद्धान्नपुटकं निधाय कुशजलादिकमादाय प्रत्येकमेकैकं दद्यात्। तद्यथा-

ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डीश्राद्धेऽमुकगोत्रायामुकनाम्ने मत्पितृस्वरूपायानिरुद्धाय त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

कुशादिकंभूमावुत्सृजेत्।

ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डीश्राद्धेऽमुकगोत्रायामुकनाम्ने मत्पितृपितृस्वरूपाय प्रद्युम्नाय त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डीश्राद्धेऽमुकगोत्रायामुकनाम्ने मत्पितृपितामहस्वरूपाय

माता–ॐ अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गताया सपिण्डीश्राद्ध अमुकगोत्राया अमुकनाम्न्यै मन्मातृस्वरूपायै नित्यानन्दायै त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

ॐ अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गताया सपिण्डीश्राद्ध अमुक-गोत्राया अमुकनाम्न्यै मन्मातृश्वशूस्वरूपायै सत्यायै त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

ॐ अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गताया सपिण्डीश्राद्ध अमुक गोत्राया अमुकनाम्न्यै मन्मातृप्रश्वशूस्वरूपायै हिरण्यायै त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

ॐ अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गताया सपिण्डीश्राद्ध अमुक गोत्राया अमुकनाम्न्यै मन्मातृवृद्धप्रश्वशूस्वरूपायै हरिण्यै त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

सङ्कर्षणाय त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा।

ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य सपिण्डीश्राद्धेऽमुकगोत्रायामुकनाम्ने मत्पितृप्रपितामहस्वरूपाय वासुदेवाय त एतत्सजलं सव्यञ्जनं सोपस्करममृतस्वरूपं हव्यं नमः स्वाहा। इत्युक्त्वा कुशादिकं भूमावुत्सृजेत्।

तत आचमनादिकं कारयित्वा घृतशर्करासंयुक्तेन पायसेन विल्वफलोपमान् वर्तुलान् त्रीन् पिण्डान् कृत्वैकं किञ्चिल्लम्वायमानं नारिकेल फलसदृशं च कृत्वा वासुदेवादीनामग्रे पिण्डवेदीं निर्माय कुशपुष्पादिकं निधाय चतुर्व्यूहानावाह्य सम्पूज्यप्राङ्मुखो भूत्वादेवतीर्थेन प्रत्येकं पिण्डासनं दद्यात्। कुशखण्डान् हस्तेनादाय-

ॐ अद्यामुकगोत्रा अमुकामुकनामन अस्मत्पितामहप्रपितामह बृद्धप्रपितामहस्वरूपाः प्रद्युम्नसंङ्कर्षणवासुदेवा एतानि कौशेयान्यासनानि वो नमः। इति पिण्डासनं दत्वा ततोऽर्घ्यपाद्यादीनिगृहीत्वा-

ॐ अद्यामुकगोत्रा अमुकामुकनामन अस्मत्पितामहप्रपितामह बृद्धप्रपितामहस्वरूपाः प्रद्युम्नसंङ्कर्षणवासुदेवा एतान्यर्घ्यपाद्यादीनि वो नमः। इत्यर्घ्यादिकं प्रदाय वर्तुलपिण्डमेकमादाय प्रद्युम्नस्थाने दद्यात्।

माता-ॐ अद्यामुकगोत्रा अमुकामुकनाम्न्य अस्मत्पितामहीप्रपितामही बृद्धप्रपितामहीस्वरूपाः सत्याहिरण्याहरिण्य एतानि कौशेयान्यासनानि वो नमः। इति पिण्डासनं दत्वा ततोऽर्घ्यपाद्यादीनिगृहीत्वा

ॐ अद्यामुकगोत्रा अमुकामुकनाम्न्य अस्मत्पितामहीप्रपितामही बृद्धप्रपितामहीस्वरूपाः सत्याहिरण्याहरिण्य एतान्यर्घ्यपाद्यादीनि वो नमः। इत्यर्घ्यादिकं प्रदाय वर्तुलपिण्डमेकमादाय प्रद्युम्नस्थाने दद्यात्।

अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो दिवङ्गतस्य पितृ-स्वरूपाय प्रद्युम्नाय नमः स्वाहा। ततो द्वितीय पिण्डमादाय सङ्कर्षणस्थाने-

अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यमुकनाम्नो दिवङ्गतस्य पितामहस्वरूपाय सङ्कर्षणाय नमः स्वाहा। इति वेद्यां कुशोपरिस्थापयेत् । ततः तृतीय पिण्डमादाय वासुदेवस्थान-

अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यमुकनाम्नो दिवङ्गतस्य प्रपितामहस्वरूपाय वासुदेवाय नमः स्वाहा। कुशोपरिस्थापयेत्।

दिवङ्गतभागभूतं लम्वायमानं पिण्डं दिवङ्गतस्वरूपायानिरुद्ध भागभूताय पिण्डाय नमः। इत्युक्त्वा गन्धपुष्पतुलसीदलैः सम्पूज्य प्रणमेत्-ततः स्वर्णसूत्रेण कुशमूलेन वा दिवङ्गतस्वरूपमनिरुद्धभागभूतं पिण्डं समानरूपेण भागत्रयं कृत्वा तेष्वेकं वामहस्ते गृहीत्वापिताहमस्वरूपं प्रद्युम्नपिण्डं दक्षिणहस्तेनादायोत्तराभिमुखो भूत्वा तस्मान्न्यासमेषां तपसेत्यादिमन्त्रं पठन्सन् प्रद्युम्नस्वरूपपिण्डे तं विलापयेत्-

---

(माता-अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गतायाः श्वश्रूस्वरूपायै सत्यायै नमः स्वाहा) इति वेद्यांकुशोपरि स्थापयेत् ।

अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गताया:प्रश्वश्रूस्वरूपायै हिरण्यायै नमः स्वाहा।) इति वेद्यांकुशोपरि स्थापयेत् ।

अद्यामुकगोत्राया अमुकनाम्न्या दिवङ्गतायाः प्रश्वश्रूस्वरूपायै हरिण्यै नमः स्वाहा।) इति वेद्यांकुशोपरि स्थापयेत् ।

दिवङ्गतस्वरूपाय नित्यानन्दाभागभूताय पिण्डाय नमः) इत्युक्त्वा गन्धपुष्पतुलसीदलैः सम्पूज्य प्रणाम्यदिवङ्गतस्वरूपनित्यानन्दाभागभूतं पिण्डं समानरूपेण भागत्रयं कृत्वा तेष्वेकं वामहस्ते गृहीत्वापिताहमीस्वरूपं सत्यापिण्डं दक्षिणहस्तेनादायोत्तराभिमुखो भूत्वा पूर्वोक्तरित्या सत्यापिण्डे विलापयेत्-

ॐ तस्मान्न्यासमेषां तपसामतिरिक्तीमाहुर्वसुरण्वोविभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वधृत्तेजोदा त्वमसि अग्निरसि वर्चोदा त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः। उपयामगृहीतोसि ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत।

अद्यामुकगोत्रममुकप्रवरान्वितममुकनामानं दिवङ्गतस्वरूपमनिरुद्धं तत्पितृस्वरूपे प्रद्युम्ने विलापयामि। ॐ प्रद्युम्नाय भगवते नमः। इति प्रद्युम्नपिण्डे तं संयोजयेत्। एवमेव द्वितीयभागमादाय पूर्वोक्त प्रकारेण संकर्षणपिण्डे विलापयेत्–

ॐ तस्मान्न्यासमेषां तपसामतिरिक्तीमाहुर्वसुरण्वोविभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वधृत्तेजोदा त्वमसि अग्निरसि वर्चोदा त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः। उपयामगृहीतोसि ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत।

अद्यामुकगोत्रममुकप्रवरान्वितममुकनामानं दिवङ्गतस्वरूपमनिरुद्धं तत्पितामहस्वरूपे सङ्कर्षणे विलापयामि। ॐ सङ्कर्षणाय भगवते नमः। इति सङ्कर्षणपिण्डे तं संयोजयेत्। एवमेव द्वितीयभागमादाय पूर्वोक्त प्रकारेण वासुदेवपिण्डे विलापयेत्–

ॐ तस्मान्न्यासमेषां तपसामतिरिक्तीमाहुर्वसुरण्वोविभूरसि

माता– अद्यामुकगोत्राममुकनाम्नीं दिवङ्गतस्वरूपां नित्यानन्दां तत्श्वश्रूस्वरूपायां सत्यायां विलापयामि ॐ सत्यायै भगवत्यै नमः। सत्यापिण्डे तं संयोजयेत्। द्वितीयभागमादाय पूर्वोक्त प्रकारेण हिरण्यापिण्डे विलापयेत्–

अद्यामुकगोत्राममुकनाम्नीं दिवङ्गतस्वरूपां नित्यानन्दां तत्प्रश्वश्रूस्वरूपायां हिरण्यायां विलापयामि। ॐ हिरण्यायै भगवत्यै नमः। हिरण्यापिण्डे तं संयोजयेत्।)

प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि व्विश्वधृत्तेजोदा त्वमसि अग्निरसि वर्चोदा त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः । उपयामगृहीतोसि ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत ॥

अद्यामुकगोत्रममुकप्रवरान्वितममुकनामानं दिवङ्गतस्वरूप-मनिरुद्धं तत्प्रपितामहस्वरूपे वासुदेवे विलापयामि । ॐ वासुदेवाय भगवते नमः । इति वासुदेव पिण्डे तं संयोजयेत् ।

इति सपिण्डनं कृत्वा पिण्डान् गन्धपुष्पतुलस्यादिभिरभ्यर्च्य वस्त्रेणाच्छाद्य गोदुग्धेन स्नापयित्वा नीराजनं विधाय हस्ते पुष्पाण्यादाय महापुरुषविद्यया प्रार्थयेत् ।

❖ महापुरुषविद्या ❖

ॐ तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्वसुरण्वोविभूरसि प्राणेत्वमसि सन्धाताब्रह्मन्त्वमसि व्विश्वधृत्तेजोदाः त्वमस्यग्निरसि वर्चोदाः त्वमसि सूर्यस्य द्युम्नोदाः त्वमसि चन्द्रमसः । उपयामगृहीतोसि ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत । तस्यैवं विदुषोयज्ञ-स्यात्मा यजमानः श्रद्धापत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः कामऽआज्यं मन्युः पशुः तपोग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाताचक्षुरध्वर्यु मनोब्रह्मा श्रोत्रमग्नीद्यावद् ध्रियते सादीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदोयत्संचरयुपविशतित्युत्तिष्ठते च सप्रवर्ग्योयन्मुखं तदाहवनीयो याव्याहृतिराहुतिर्यदस्य विज्ञानं तत् जुहोति

माता—अद्यामुकगोत्राममुकनाम्नीं दिवङ्गतस्वरूपां नित्यानन्दां तद्वृद्ध-प्रश्वश्रूस्वरूपायां हरिण्यां विलापयामि । ॐ हरिण्यै भगवत्यै नमः । हरिणी-पिण्डे तं संयोजयेत् ।)

यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनं सायं च तानि सवनानि येऽअहो रात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि यऽऋतवस्ते पशुबन्धाः ये संवत्सराश्च परिवत्सराश्च तेऽअहर्गणाः सर्ववेदसं वाऽएतत्सत्रं मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यङ्गच्छति । अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोति एतौ वै सूर्याश्चन्द्रमसोर्महिमानौ ब्रह्मणे विद्वानभिजयति तस्माद्ब्रह्मणो महिमानम् आप्नोति तस्मात् ब्रह्मणो महिमानम् ॥ ॐ शान्तिः३ ॥

ॐ वेदान्त विज्ञान सुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्वाः। ते ब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥

ॐ नमो विष्णुपदस्थेभ्यः स्वधाः वः पितरो नमः ।
हरये पितृनाथाय अग्निसोमात्मने नमः ॥
सत्सोमपात्मने विष्णो नमो वर्हिषदात्मने ।
आसंसाराभिजनका अग्निष्वाता तथाच्युत ॥
पितामहाः सोमपास्त्वं त्वमन्ये प्रपितामहाः ।
तुभ्यं नमो भगवते पितृमूर्तेच्युताय च ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
मम तृप्तिं प्रयान्त्वद्य होमाप्यायित मूर्तयः ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
तृप्तिं प्रयान्तु पिण्डेन मया दत्तेन भूतले ॥
ॐ वाजे वाजे वत वाजिनो नोधनेषु विप्रा अमृता ऋतज्ञाः ।
अस्यमध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥

इति विप्रान् प्रणम्य विसर्जयेत् पिण्डान् जले क्षिपेत् यथाशक्ति ब्राह्मणानां स्वजाति वन्धूनां दीनानाथपंग्यन्धवधिराणाञ्च भोजनं दत्वास्वयं भुञ्जीतेति ॥

दीक्षासममिमं श्राद्धङ्कुगतेः सुगतिप्रदम् ।
तस्मात्सर्वप्रयत्नेन यथा लब्धेन केनचित् ॥
वस्तुना च पवित्रेण इमं श्राद्धं समाचरेत् ।
द्वादशी सर्वकालानामुत्तमा परिकीर्तिता ॥
वैष्णवः परमं पात्रं देश आयतनं हरेः ।
सदा प्रपन्नशूद्राणां सर्वेषां मोक्षकांक्षिणाम् ॥
सत्सायुज्यादि सिध्यर्थं द्विजधर्मोक्तवद्भवेत् ।
त्रैवर्णिकाना वेदोक्त सम्यग्भक्तिमतामपि ॥
आहुरप्युत्तमस्त्रीणामधिकारन्तु वैदिके ।
चित्तञ्चवित्तञ्च नृणां विशुद्धं शस्तश्च कालः कथितो विधिश्च ।
पात्रं यथोक्तं परमा च भक्तिर्नृणां प्रयच्छन्त्यभिवाञ्छितानि ॥

◆इति सपिण्डन विधिः◆

❖शय्यादानविधानम्❖

द्वादशे त्रयोदशदिवशे वाचार्यादिसहितः कर्त्ता नैतिक्यं समाप्य हवन पद्धतावुक्तप्रकारेण सर्वाणि कर्माणि परिसमाप्य शय्यादान अत्यावश्यकानि सर्वाण्युपकराणि सम्पाद्य हस्ते कुशाक्षततिलान्यादाय पूर्वोक्तप्रकारेण देशकालादीन् संकीर्त्य ॐ अद्यामुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकशर्माहं भगवदाज्ञया भगवन्मुखविकासार्थं सारदारुमयीमिमां शय्यां सतूलिकाम्

उत्तरच्छदप्रच्छन्नां गण्डोपधानयुतां सप्रावरणां ताम्बूलकर्पूरकुङ्कुमा-गरुचन्दनदीपिकाचामरासनसहितां लक्ष्मीनारायणप्रतिमायुतां घृतकुम्भ-सप्तधान्यसहितामुत्तानाङ्गिरदैवतां परिधानीयवस्त्राणि बृहस्पतिदैवतानि सौवर्णरजतादीन्याभरणानि पाकभोजनपात्राणि च विश्वकर्मदैवतानि सौभाग्यद्रव्याणि विष्णुदैवतानि तण्डुलमाषलवणनेकविधफल-शाकादिवस्तूनि प्रजापतिदैवतान्यमुकगोत्रायामुकशर्मणे सपत्नीकाय सुपूजिताय श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं संप्रददे तत्सन्न ममे -त्युक्त्वा कुशजलादिकं विप्रकरे दत्वा प्रार्थयेत् ।

देवदेव जगन्नाथ शरणागतवत्सल ।
शय्यादानेन लक्ष्मीश प्रसन्नो भव सर्वदा ॥
शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ।
वस्त्रं तस्य प्रदानेन प्रसन्नोऽस्तु हरिः सदा ॥
नराभरणदानेन तुष्टिं याति हरिः सदा ।
योषिदाभरणैर्दत्तैः प्रीयते हरिवल्लभा ॥
अन्नदानं महादानं जीवानां प्राणरक्षकम् ।
अन्नदानेन देवेश पितृमोक्षप्रदो भव ॥

इति सम्प्रार्थ्य दानप्रतिष्ठां कुर्यात्- ॐ पूर्वसङ्कल्पसिद्धिरस्तु- अद्येह कृतस्य सोपस्करणशय्यादानकर्मणः न्यूनातिरिक्तपरिपूणार्थं राज-मुद्राङ्कितमिमं द्रव्यं विष्णुदैवतममुकगोत्रायामुकशर्मणे श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं सम्प्रदद इत्युक्त्वा विप्रकरे कुशादिकं दद्यात् । पूर्वोक्तप्रकारेण गोदानं पददानं च कुर्यात् । प्राणोत्क्रमणसमये गवादि दशदानानि न कृतानि चेत् तानि सर्वाण्यत्रैव कुर्यात् ।

इतिशैय्यादान विधिः

❖ अर्चिरादिमार्गश्रवणदानविधिः ❖

अर्चिरादिमार्ग-कथावाचकाय देयवस्तूनि सर्वाणि एकस्मिन् विस्तृतपात्रे निधाय हस्ते कुशतिलाक्षतजलान्यादाय पूर्वोक्त प्रकारेण सङ्कल्पं कृत्वा भगवदाज्ञया भगवद् मुखकमलविकासार्थमर्चिरादिमार्ग कथाश्रवण-जन्यस्वरूपज्ञानसिध्या परमेश्वरप्रीत्यर्थमिमानि देयद्रव्याणि छत्रोपानहा-सनान्युत्तानाङ्गिरदैवतानि मुद्रिकाद्याभूषणानि वह्निदैवतानि वस्त्राणि बृहस्पतिदैवतानि भक्षभोज्यलेह्यादि पक्वान्नानि सूपतण्डुलचणक शाकामान्नानि च प्रजापति दैवतान्यमुकगोत्रायामुकशर्मणे अर्चिरादि मार्गकथावाचकाय ब्राह्मणाय श्रीवैष्णवाचार्याय तुभ्यमहं संप्रददे ॐ तत्सन्न मम । इति दत्वा प्रार्थयेत्-

वाचकाय नमस्तुभ्यं कथाश्रवणकारिणे ।
संसारसागरे मग्नजीवोद्धरणशालिने ॥

इति सम्प्रार्थ्य दानप्रतिष्ठां कुर्यात् - ॐ अद्य कृतस्य सोपस्करणदेय वस्तुदानकर्मणो न्यूनातिरिक्तपरिपूर्णार्थं राजमुद्राङ्कितमिमं द्रव्यं विष्णु-दैवतममुकगोत्रायामुकशर्मणे कथावाचकाय श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं सम्प्रददे इत्युक्त्वा विप्रकरे कुशादिकं दद्यात् ।

ततो भूयसीदक्षिणा नाना नामगोत्रेभ्यो ब्राह्मणेभ्यो कन्याकुमारीभ्यश्च यथाभागं विभज्य देया ॥

◆इति त्रयोदशाह विधिः◆

❖ मासिकादि विधानम् ❖

सोदकुम्भं प्रदद्यात्तु यावदब्दान्तिकं नरः ।

इत्युक्तप्रकारेण पाक्षिकादौ पूर्वदिन एव पुष्पताम्बूलादिकमादाय कर्त्ता आचार्यान् प्रार्थयित्वा निमन्त्रयेत्- भो भागवताचार्याः श्व आगत्य

भवद्दासस्य मे यथाशक्तिकं पितृयागकर्मकारयन्त्यित्युक्त्वा प्रणमेत् ।
कर्त्ता प्रातर्विधिना स्नात्वा नैत्यिकं कृत्वा आगतानाचार्यान् सत्कृत्याघ्र्याद्युपचारैः सम्पूज्य शुभासने निवेशयेत्। ततो गोमयादिना शोधितस्थाने पुरुषसूक्तविधिना भगवन्तं समाराध्य घृतपक्वादि नैवेद्यं निवेद्य पुनराचमनादिकं विधाय नीराज्य पुष्प तुलस्यादिकं गृहीत्वा भगवन्तं प्रार्थयेत् ।

ॐ भगवन् देवदेवेश भक्तरक्षणतत्पर ।
अस्मत्पितृस्वरूपिँस्त्वं प्रसन्नो भव सर्वदा ।।
पत्रपुष्पादिकं सर्वं यद्धव्यन्ते समर्पितम् ।
तत्सर्वं गृह्यतां देव पितृतृप्तिकरो भव ।।

इति प्रार्थ्य सुगन्धि द्रव्ययुतं शर्करान्वितं शुद्धजलमताम्रे घटे पूरयित्वा

ॐ अद्यामुकगोत्रस्यामुकप्रवरान्वितस्यामुकनाम्नो मम पितृ स्वरूपीप्रद्युम्नो भगवान् प्रीयतां ते नम इत्युच्चार्य भगवन्तं निवेदयेत् । ततः पूर्वोक्तप्रकारेण दीपकलशविक्सेनाष्टवसुब्रह्माद्याराधनपूर्वकं हवनं कृत्वा मङ्गलाशासनं मन्त्रपुष्पाञ्जलिं च विधाय भगवन्तं प्रणम्य कुशादिकमादाय-

ॐ अद्यामुकगोत्रामुकनामाहास्मत्पितृस्वरूपिप्रद्युम्नतृप्त्यर्थं भगवत् कैङ्कर्यरूपेण यथोपचारैः श्रीवैष्णवान् ब्राह्मणानर्चयिष्यामि वा अर्चयिष्य । इत्युक्त्वा षोडशोपचारैः पूजयेत् । ततो नीराज्याघ्र्यादिकं कृत्वा पूर्वाभिमुखानुत्तराभिमुखान् वा कुशासनेषूपवेशयित्वा

भो अस्मत्पितृ स्वरूपिणः श्रीवैष्णवाचार्या व आसनं समर्पयामि । इति आसनं दत्वा हस्तप्रक्षालनार्थमघ्र्यं समर्पयाम्येवमेव पाद्याचमने दत्वा शुद्धवस्त्रेण हस्तपादादि शुद्धिं विधाय तत्र मण्डलं परिकल्प्य साग्रदण्डरम्भाफलपत्रादीनि पूर्वाग्राणि निधाय जलेन संशोध्य दक्षिणतो जलपात्रादीनि निधाय परिषेचयेत् । प्रथमं पायसं ततः साज्यं गुणान्नं लेह्यपेयभक्ष्यभोज्यादिकं यथाक्रमं वितीर्य समन्त्रमाचमनं परि

षेचनं कारयित्वा भगवत्तीर्थञ्च दत्वा शनैः शनैर्यावत्तृप्तिं भोजयेत्। भुञ्जानेषु तेषु कर्त्ता विष्णुसहस्रनामकठवल्ल्यादिकं पठेत्।

तृप्तिं विज्ञायोत्तरापोशनं समन्त्रं दत्वोत्थाप्य हस्तपादादिशुद्धिं कारयित्वा शुभासने निवेश्य गन्धादिभिः संपूज्य पूर्वं निवेदितं घटं दत्वा दक्षिणाताम्बूलवस्त्रादिकं दत्वा साष्टाङ्गप्रणामं विधाय श्रीपादतीर्थञ्च स्वीकृत्य ततो ब्राह्मणान् स्वगृहे प्रेषयित्वा बालवृद्धादिभ्यो दत्वा पश्चात् स्वयमपि भुञ्जीत भूशायी भवेदिति संक्षेपमासिक विधिः ॥

❖अथ वैकुण्ठोत्सवविधिः❖

❋तीर्थस्नानम्❋

अस्नात्वा नाचरेत्कर्म जपहोमादिकं तथा ।
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ॥
स्रवत्येव दिवारात्रं तस्य स्नानं विशोधनम् ।
विधिना ह्याचरेत् स्नानं स्नात्वा कार्यं समाचरेत् ॥

कर्त्ता वैकुण्ठोत्सव-कर्मकारकान् परमभागवतान् श्रीवैष्णवानाचार्यान् ताम्बूलपूगीफलतुलसीपत्राणिदत्वा पूर्वदिवसे निमन्त्रयेत् । कुशतिलाक्षतदूर्वापुष्पपञ्चगव्यापमार्गादीनि तीर्थस्नानोपयोगिवस्तूनि संपाद्य निमन्त्रितश्रीवैष्णवैः सह यथा संभवजलाशयसमीपे गत्वा मुण्डनं कुर्यात् ।

आत्मनः शुद्धिकामो वा पितृणां मुक्तिहेतवे ।
वपनं वै करिष्यामि तीरेऽहं तव जाह्नवी ॥
यानि कानि च पापानि ब्रह्महत्यासमानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम् ॥

इत्युक्तप्रकारेण वपनं कृत्वा स्नायात् ।

❖तीर्थ प्रार्थना❖

ॐ तीर्थराजाय नम इति तीर्थम्प्रणम्याञ्जलिं बद्ध्वा प्रार्थयेत् ।

सागरस्य तु निःश्वासो दण्डहस्तो□सुरान्तकः ।
जगत्स्रष्टर्जगन्नाथ नमामि त्वा सुरेश्वरम् ॥
अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु निवसन्ति याः ।
देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वथा ॥ हस्ते जलाक्षत-ताम्बूलहिरण्यादिकमादाय सङ्कल्पं कुर्यात् । हरिः ३ ॐ तत्सत् ३ ॐ विष्णुर्विष्णुर्विष्णुरद्यास्य श्रीशेषशेषाशनविष्वक्सेनादिनित्यसूरि-निर्विशेषैरशेषसज्जनजनसम्भावनीयैरसम्भवदवद्यगन्धैरनादिमाया-महावर्तवम्भ्रम्यमाणबाह्यकथकरभावनगन्धसिन्धुरैरधिजिगमिषित-मुक्तिघण्टापथैरखण्डदिङ्मण्डलव्यापियशोवितानधवलितजगत्त्रितयै-रौपनिषदरहस्योपदेशदेशिकैः पराङ्कुशपरकालनाथयामुनयतिवरादि-दिव्य देशिकैः परमव्योमश्वेतद्वीपक्षीरसागरश्रीरङ्गवृषगिरिसत्यव्रतयदुगिरि-पुरुषोत्तमसाकेतमथुरादिदिव्याभिव्यक्तिप्रदेशेषु समनुष्ठितमङ्गलाशासनस्य निखिलसुरासुरमुकुटमणिमञ्जरीनिकरनीराजितपादपीठस्य शरणागत-परित्राणसप्ततन्तुदीक्षादीक्षितस्य सरसीरुहवासिनीसहचरितधर्मणः संसरणदवदहनतापनिर्वापणवलाहकस्यजगद्रक्षणशिक्षाविचक्षणस्य अच्युतानन्तवीर्यस्यमहाजालकमध्यपरिभ्राम्यमाणानेककोटिसूर्य प्रभासमेतस्य श्रीभूमिनीलाकुचकलशविन्यस्तकुंकुमाङ्कितवक्षस्थलस्य शेषपर्यङ्कशायिनः शंखचक्रगदाखड्गशार्ङ्गपद्महस्तविराजितस्य शौशील्य-वात्सल्यादिगुणगणौघमहार्णवस्य श्रीमन्नारायणस्येक्षयानाभि कमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिंकुर्वतस्तदुद्धरणाय प्रार्थितस्य महापुरुषस्याचिन्त्यापरिमितशक्त्या महाजलौमद्ध्ये परि-

भ्राम्यमाणानामेकतमेऽव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते ह्यस्मिन्महति ब्रह्माण्डखण्डे श्रीमदादिवराहद्रंष्टाग्रविराजितेऽस्मिन् भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्ड आर्यावर्त्तैकदेशेऽमुकराज्येऽमुकदेवक्षेत्रेऽमुकजनपदेऽमुकपत्तने ग्रामे वा परार्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्ध एकपञ्चाशत्तमे वर्षे प्रमथमासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीये यामे तृतीये मुहूर्तेऽष्टमे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमद्रामानुजमुनिप्रादुर्भावात् श्रीमन्नृपतिविक्रमार्कराज्याद् वा वर्तमानेऽमुकसंवत्सरेऽमुकायनेऽमुकर्तावमुकमासेऽमुकपक्षेऽमुकतिथावमुकनक्षत्रेऽमुकयोगेऽमुककरणेऽमुकराशिस्थिते श्रीसूर्येऽमुकराशिस्थिते चन्द्रेऽमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथा स्थानस्थितेषु सत्स्येवं गुणगणविशेषेणविशिष्टायां शुभपुण्यतिथौ ममामुकस्य वा जन्मप्रभृति ज्ञाताज्ञातकामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसंकरीकरणमलीककरणापात्रीकरण जातिभ्रंशकरणप्रकीर्णपातकानां मध्ये संभावित पापनिरासार्थं शरीरशुद्धयर्थं कृच्छ्चान्द्रायणादि प्रायश्चित्तप्रत्याम्नायरूपं तथा भगवदपचारभागवताचारासह्यापचारनानाविधानन्तापचारनिवृति पूर्वकममुकस्य दिवंगतस्य श्रीवैकुण्ठोत्सवपूर्वकनारायणबलि कर्मणो योग्यताप्राप्तयेऽमुकतीर्थे नानानामगोत्रैः श्रीवैष्णवैः सह तीर्थस्नानमहं करिष्यामि ।

❖प्रार्थना❖

हिरण्यश्रृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।
त्वं राजा सर्वतीर्थानां तीर्थेषु वसतिस्तव ॥
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ।

याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥
आपो नारायणोद्भूता तस्य ता अयनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मराम्यहम् ॥

तीर्थजल एक हस्तपरिमितं दीर्घमायतं च चतुरस्रं तीर्थपीठं तर्जन्या कृत्वा तत्र गङ्गामावाहयेत् ।

आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥
विष्णुवामपदांगुष्ठनखस्रोतो विनिः सृते ।
त्वद्भक्तिविघ्नरूपास्त्वं गङ्गे मां मोचयैनसः ॥

हस्तयोर्न्यूब्जाञ्जलिना तोयमभिमन्त्रयेत् ।

ॐ उरु गँ हि राजा वरुणश्चकार सर्याय पन्थामन्वे तवाउ ।
अपदे पादा प्रतिधातवे करूतापवक्ता हृदयाविधिश्चित् ॥
नमो वरुणायाभिष्ट्विुतो वरुणस्य पाशः ।

इति ततो जलं दक्षिणहस्तांगुलिभिर्दक्षिणमावर्तयन् पठेत् ।

ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पासा विततामहान्तः ।
तेभिर्नोऽद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।

ततः श्रीमन्नारायणं ध्यायन् त्रिनिमज्जेदुन्मज्य पञ्चगव्यस्नानं कुर्यात् । शरीरशुद्धर्थम्पञ्चगव्यस्नानमहं करिष्ये । इति सङ्कल्प्य वक्ष्यमाणमन्त्रं पठन् गोमूत्रेण स्नायात् ।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोनः प्रचोदयात् । ततो गोमयोदकेन स्नायात् । ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । ततो गोघृतेन स्नायात्- ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि ।

प्रियन्देवानामनाधृष्टन्देवयजनमसि । ततो गोदध्ना स्नायात् ।

ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभिनो मुखाकरत्प्रणऽआयू गूँ षि तारिषत् । गोदुग्धेन स्नायात्-

ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्यम् ।

भवावाजस्य सङ्गथे ॥

❖ मृत्तिकास्नानविधिः ❖

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा गूँ सुरे स्वाहा । इति शुद्धमृदमादाय भागचतुष्टयं कृत्वा प्रथमभागमादाय जलेनार्पयित्वा शिरसि संलिप्य स्नायात् ।

ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।

शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥ ततो द्वितीयभागमादाय बाहू वक्ष्यस्थले संलिप्य स्नायात् ।

ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना ।

मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥

तृतीयभागमादाय जङ्घयोर्विलिप्य स्नायात् ।

ॐ मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिमन्त्रिता ।

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥

चतुर्थभागमादाय पादयोर्विलिप्य स्नायात् ।

ॐ मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके ।

त्वया हतेन पापेन गच्छामि परमाङ्गतिम् ॥

❖ प्रायश्चित्तस्नानम् ❖

सर्वपापनिवृत्तिपूर्वकशरीरशुद्ध्यर्थम्प्रायश्चित्तस्नानमहं करिष्ये । इति सङ्कल्प्य प्रायश्चित्तस्नानं कुर्यात् ।

ॐ यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रह । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्नऽइन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः ॥

ॐ अत्याशनादतिपानाद् यच्चऽउग्रात्प्रतिग्रहात् ।
तन्नो वरुणो राजा पाणिना ह्यवमर्षतु ।
सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्विषः ।
नाकस्य पृष्टमारुह्य गच्छेद् ब्रह्म सलोकताम् ॥

कुशैः सर्वाङ्गसंमार्जनं कुर्यात् ।

❖वरुणसूक्तम्❖

ॐ आपोहिष्ठामयोभुवस्तानऽउर्जे दधातन । महेरणाय चक्षसे ॥
ॐ यो वः शिवतमो रसस्तस्य भाजयतेहनः । उशतीरिव मातरः ।
ॐ तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथ । आपो जन यथाचनः ।

❖समुद्रज्येष्ठासूक्तम्❖

ॐ समुद्रज्येष्ठा सलिलस्य मध्यात्पुनानायान्त्यनिविशमानाः ।
इन्द्रोऽयावज्री वृषभोरराद ताऽआपो देवीरिह मामवन्तु ।
ॐ यासां राजा वरुणो याति मध्ये सत्यानृतेऽअवपश्यञ्जनानाम् ।
मधुश्च्युतः शुचयो याः पावका ताऽआपो देवीरिहमामवन्तु ।
ॐ याऽआपोदिव्याऽउतवा स्रवन्ति खनित्रियाऽउत वा यास्वयञ्जाः ।
समुद्रार्थायाः शुचयः पावकास्ताऽआपो देवीरिह मामवन्तु ॥
ॐ यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्यंमदन्ति । वैश्वानरो यास्वग्निः प्रविष्टस्ताऽआपो देवीरिहमामवन्तु ॥

❖शुद्धिसूक्तम्❖

ॐ एतोन्विन्द्र गुँ स्तवाम शुद्ध गूँ शुद्धेन साम्ना ।

शुद्धैरुक्थैर्वावृध्वास गूँ शुद्धऽआशीर्वान्ममत्तु ॥

ॐ इन्द्रः शुद्धोनऽआगहि शुद्धः शुद्धाभिरूतिभिः ।

शुद्धोरयिन्निधारय शुद्धो ममद्धिसोम्य ॥

ॐ इन्द्रः शुद्धो हिनोरयि गूँ शुद्धो रत्नानि दाशुषे ।

शुद्धो वृत्राणि जिघ्नसे शुद्धो वाज गूँ सि शाससि ॥

पवमानसूक्तम्

ॐ पवमानः सुवर्जन पवित्रेण विचर्षिणः ।

यः पोतास पुनातु माम् ।

ॐ पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।

विश्वेदेवाः पुनीत मा जातवेदः पुनीहि माम् ॥

ॐ पावमानीः स्वस्त्ययनीः सुदुघाहि घृतश्च्युतः ।

ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम् ।

ॐ पावमानिर्दिशन्तुनऽइमं लोकऽअथोऽअमुम् ।

कामान्समर्धयन्तु नो देवीर्देवं समाहिता ॥

ॐ येन देवाः पवित्रेणऽआत्मानं पुनते सदा ।

तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ॥

ॐ प्राजापत्यं पवित्रं शतोद्याम गूँ हिरण्मयम् ।

तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीहि मे ।

ॐ इन्द्रः पुनीतिः सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या ।

यमो राजा प्रमृणाभिः पुनातु मा जातवेदामूर्जयन्त्या पुनातु ।

ॐ यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् ।

जातस्य यश्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि ॥

ॐ ब्रह्म वधात् सुरापानात् स्वर्णस्त्येयाद् वृषलीमैथुनसङ्गमात् ।

गुरो दाराधिगमाच्च तत्पावमानीभिरहं पुनामि ।
ॐ दुर्यष्टं दुरधीतं पापं यच्चाज्ञानकृतोकृतम् ।
अयाजिताश्चासंयाज्यास्तत्पावमानीभिरहं पुनामि ॥
ॐ पावमानीः स्वस्त्ययनीर्याभिर्गच्छन्ति नान्दनम् ।
पुण्यांश्च भक्ष्याभक्षयत्यमृतत्वञ्च गच्छति ॥
ॐ पावमानीः पितृन्देवान्ध्यायेद्यश्च सरस्वतीम् ।
पितृंस्तस्योपवर्तेत क्षीरं सर्पिर्मधूदकम् ॥
ॐ पावमानं परंब्रह्म शुक्रञ्ज्योतिः सनातनम् ।
ऋषींस्तस्योपतिष्टेत क्षीरं सर्पिर्मधूदकम् ॥
ॐ पावमानं परंब्रह्म ये पठन्ति मनीषिणः ।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ अपामार्गमादाय मार्जयेत्-

❖ अपामार्गस्नानम् ❖

ॐ अपाघमपकिल्विषमपकृत्यामपोरपः ।
अपामार्गत्वमस्मदपदुष्वप्न गुँ सुवः ॥ दूर्वामादाय मार्जयेत् ।

❖ दूर्वास्नानम् ❖

ॐ काण्डात्काण्डात्प्ररोहन्ति परुषः परुषस्परि ।
एवानो दुर्वे प्रतनु सहस्रेण शतेन च ॥
सहस्रपरमा देवी शतमूला शताङ्कुरा ।
सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ॥
ॐ तच्छं योरा वृणीमहे । गातुं यज्ञाय ।
गातुं यज्ञपतये । दैवी स्वस्तिरस्तुनः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो
अस्तु द्विपदे । शं चतुष्पदे ॐ शान्तिः ३ ॥

ततो निमज्जयेदुन्मज्याघमर्षणं कुर्यात् – अघमर्षणसूक्तस्यामघर्षण ऋषिरनुष्टुपछन्दो भाववृत्तो देवतामघर्षणे विनियोगः ।

ॐ ऋतञ्च सत्यञ्चाभिद्धा तपसोऽध्यजायत ततो रात्र्यजायतः । ततः समुद्रोर्णवः समुद्रादर्णवादधिसंवत्सरोऽअजायत । अहो रात्राणि विदधद्विश्वस्य मिषतोवशी सूर्याश्चन्द्रमसौ धाता यथा पूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो सुवः ।

इत्यन्तर्जलेऽअघमर्षणप्राणायामं कृत्वोन्मज्य संकल्पं कुर्यात् ।

(अथ समस्तपितृणाममुकामुकनाम्नां श्रीवैकुण्ठधामप्राप्त्यर्थममुकतीर्थे पुरुषसूक्तेन स्नानमहं करिष्यामि)

इति पुरुषसूक्तमुच्चरन् स्नायात् । तत आर्द्रवाससा जले तिष्ठन् स्नानांगतर्पणं कुर्यात् ।

❖स्नानाङ्गतर्पणविधिः❖

पूर्वाभिमुखो जलाञ्जलिमादाय–

ॐ श्रीसहितं	केशवं	तर्पयामि
ॐ लक्ष्मीसहितं	नारायणं	तर्पयामि
ॐ कमलासहितं	माधवं	तर्पयामि
ॐ पद्मासहितं	गोविन्दं	तर्पयामि
ॐ पद्मिनीसहितं	विष्णुं	तर्पयामि
ॐ कमलालयासहितं	मधुसूदनं	तर्पयामि
ॐ रमासहितं	त्रिविक्रमं	तर्पयामि
ॐ वृषाकपिसहितं	वामनं	तर्पयामि
ॐ धन्यासहितं	श्रीधरं	तर्पयामि

ॐ पृथ्वीसहितं	हृषीकेशं	तर्पयामि
ॐ यज्ञासहितं	पद्मनाभं	तर्पयामि
ॐ इन्दिरासहितं	दामोदरं	तर्पयामि
ॐ हरिणीसहितं	वासुदेवं	तर्पयामि
ॐ हिरण्यासहितं	संकर्षणं	तर्पयामि
ॐ सत्यासहितं	प्रद्युम्नं	तर्पयामि
ॐ नित्यानन्दासहितं	अनिरुद्धं	तर्पयामि
ॐ त्रयीसहितं	पुरुषोत्तमं	तर्पयामि
ॐ सुखासहितं	अधोक्षजं	तर्पयामि
ॐ सुगन्धासहितं	नारसिंहं	तर्पयामि
ॐ सुन्दरीसहितं	अच्युतं	तर्पयामि
ॐ विद्यासहितं	जनार्दनं	तर्पयामि
ॐ सुशीलासहितं	उपेन्द्रं	तर्पयामि
ॐ सुलक्षणासहितं	हरिं	तर्पयामि
ॐ नीलासहितं	श्रीकृष्णं	तर्पयामि
ॐ आधारशक्त्यादिवैकुण्ठपार्षदान्		तर्पयामि
ॐ ब्रह्मादयो ये देवाः तान्		तर्पयामि ।
ॐ भूर्देवान्		तर्पयामि ।
ॐ भुवर्देवान्		तर्पयामि ।
ॐ स्वर्देवान्		तर्पयामि ।
ॐ भूर्भुवः स्वर्देवान्		तर्पयामि ।

निवीत्युत्तराभिमुमुखो भूत्वा ऋषितर्पणं कुर्यात् ।

ॐ द्वैपायनादयो य ऋषयः तान् तर्पयामि ।

ॐ भूः ऋषीन् तर्पयामि ।

ॐ भुवः ऋषीन् तर्पयामि ।

ॐ स्वः ऋषीन् तर्पयामि ।

ॐ भूर्भुवः स्वः ऋषीन् तर्पयामि ।

अवैष्णवपितृणां कृते अपसव्यो भूत्वा दक्षिणाभिमुखः सन् पितृतीर्थेन तर्पयेत् । वैष्णवानां कृते तु सव्येनैव पूर्वाभिमुखो भूत्वैव तर्पयेत् ।

ॐ कव्यवाडनलादयो ये पितरः तान् तर्पयामि ।

ॐ भूः पितृन् तर्पयामि । ॐ भुवः पितृन् तर्पयामि ।

ॐ स्वः पितृन् तर्पयामि । ॐ भूर्भुवःस्वःपितृन्तर्पयामि ।

ॐ चतुर्दशयमान् तर्पयामि । ॐ स्व पितृन् तर्पयामि ।

ॐ पितामहान् तर्पयामि । ॐ प्रपितामहान् तर्पयामि ।

ॐ मातृः तर्पयामि । ॐ पितामहीः तर्पयामि ।

ॐ प्रपितामहीः तर्पयामि । ॐ मातामहान् तर्पयामि ।

ॐ प्रमातामहान् तर्पयामि । ॐ वृद्धप्रमातामहान्तर्पयामि ।

ॐ आचार्यान् तर्पयामि । ॐ सर्वसंबन्धिनःतर्पयामि ।

ततो वक्षमाणमन्त्रं पठन् जलाञ्जलिं प्रदद्यात् ।

ॐ देवा सुरास्तथा यक्षा नागा गन्धर्वदानवाः ।
पिशाचा गुह्यकाः सिद्धाः कुष्माण्डास्तरवः खगाः ।
जलेचरा भूनिलया वाय्वाहाराश्च जन्तवः ।
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाखिलाः ।
अग्निदग्धाश्च ये जीवा येप्यदग्धा कुले मम ।
भूमौ दत्तेन तोयेन तृप्ता यान्तु परांगतिम् ॥

इति तीर्थतटे निक्षिप्य पुनर्जलाञ्जलिं गृहीत्वा–

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु। इत्युच्चार्य तीर्थतटे क्षिपेत् ॥

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः। ततः शिखां दक्षिणपूर्वं नामयन्निष्पीडयेत्।

शिखोदकं भूपतितं पिबन्ति पितरोऽधमाः।

तेषामाप्यायनायैव शिखां निष्पीडयाम्यहम् ॥

पुनर्जलाञ्जलिमादाय-

यन्मया दूषितं तोयं शारीरमलसम्भवात्।

तस्य पापस्य शुद्धयर्थं यक्ष्मैतत्ते जलाञ्जलिः। इति यक्ष्म तर्पणाय तीर्थतटे क्षिपेत्। ततो धौतवस्त्रपरिधानं कृत्वा हस्ते जलाक्षत-कुशहिरण्यमादाय- भगवदाज्ञया भगवत्कैङ्कर्यत्वेन करिष्यमाणविष्णु-श्राद्धनारायणबलिकर्मयोग्यताप्राप्तये तप्तकृच्छ्रचान्द्रायणादिप्रत्याम्नाय रूपत्वेनामुकगोत्रोत्पन्नममुकनामशर्माहममुकगोत्रायामुकशर्मणे ब्राह्म-णाय तुभ्यं हिरण्यादि द्रव्यं दातुमहमुत्सृजे। इति संकल्प्य श्रीवैष्णव ब्राह्मणाय दद्यात्। ततस्तिलकधारणं कुर्यात्।

❖ तिलकधारणविधिः ❖

ॐ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्।

विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥

इति श्वेतमृत्तिकाम् आदाय वामहस्ते जलं निधाय घर्षयेत्-

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजा गुँ सि। योऽअस्कभायदुत्तर गूँ सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥

तत्रानामिकया क्ष्रौं बीजमालिख्य ललाटे पुण्ड्रैकं धारयेत्।

ॐ अतो देवाऽअवन्तुनो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः ॥ ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

एवं क्रमेणोदरे पुण्ड्रत्रयं वक्षस्थले पुण्ड्रैकं कण्ठे पुण्ड्रत्रयं दक्षिणभुजे चैकं वामभुजे चैकं पृष्ठे मूर्धनि चैकैकमिति द्वादशोर्द्ध्वपुण्ड्रान् धृत्वा हरिद्रानिर्मितं चूर्णमादाय जलेन द्रवीकृत्य-

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

इति घर्षयित्वाभिमन्त्र्य पुण्ड्रमध्ये धारयेत् । ततः श्रीपादतीर्थं पीत्वा गुरुपरम्परामनुसन्दध्यात् । गृहे यागागारं प्रविश्य सर्वेषां श्रीवैष्णवानां सन्निधावनुज्ञां प्रार्थयेत् ।

ॐ नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां चक्षुषे । नमो दिवे नमः पृथिव्यै सप्रथसभां मे गोपाय ये च सभ्याः सभासदः तानिन्द्रियावतः कुरु सर्वमायुरुपासताम् । ॐ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः इति प्रणम्य-

अशेषे हे परिषत् भगवत्पादमूले मया समर्पितां यत्किञ्चित् सौवर्णीं दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्याद्यामुकगोत्रोत्पन्ना-मुकप्रवरान्वितामुकशर्माहं ममामुकगोत्रस्यामुकप्रवरान्वितस्यामुक-संबन्धिनोऽमुकदिवंगतस्य (ममामुकगोत्रायामुकसंबन्धिन्याऽ मुकदिवंगताया) श्रीभगवदाज्ञया भगवतो नारायणस्य मुखोल्लासार्थं श्रीवैकुण्ठोत्सव-पूर्वकनारायणबलिनामकं कैकर्यकर्तुं योग्यतासिद्ध्यर्थं प्राजापत्यकृच्छ्राणि मुख्यतः कर्तुमशक्तस्य मम प्रतिनिधिरूपेण यत्किञ्चित् हिरण्यदानं कर्तुं योग्यतासिद्धिमनुगृहाण इत्यनुज्ञाप्य यत्किञ्चित् दक्षिणां श्रीवैष्णवेभ्यो दत्वा - अस्मद्गुरुभ्यो नमः । इत्यारभ्य श्रीधराय नमः । इत्यन्तं वाक्यगुरुपरम्परामनुसन्धाय प्राणानायम्य पुण्याहवाचनार्थं आग्नेयदिशि विष्वक्सेनपूजनार्थं ऐशान्यां द्वौ कलशौ पूजयेत् ।

❖कुम्भार्चनविधिः❖

कुम्भलक्षणम्– स्वर्णं वा रजतं वापि ताम्रमृण्मयमेव वा ।

अकालमव्रणं चैव सर्वलक्षणसंयुतम् ॥

पञ्चाशाङ्गुलवैफुल्यमुत्सेधः षोडशाङ्गुलः ।

द्वादशाङ्गुलकम्मूलम्मुखमष्टाङ्गुलन्तथा ॥

भूप्रार्थना– ॐ भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षं महीत्वा ।

उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्यायादधे ॥

धान्यास्तरणम्– ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्वनः ॥ कलशस्थापनम्–

ॐ कुम्भो वनिष्टुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भोऽ अन्तः । प्याशिर्व्यक्तशतधारऽउत्सो दुहेन कुम्भी स्वधां पितृभ्यः ।

कलशे जलपूरणम् –

ॐ अपो देवीरुपह्वये यत्र गावः पिबन्ति नः ।

सिन्धुभ्यः कर्त्वं गँ हविः ॥ कलशदृढीकरणम्–

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।

पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहनः ॥ पञ्चपल्लवनिक्षेपः–

ॐ अश्वत्थेवो निषदनं पर्णेवो वसतिष्कृता ।

गोभाज इत्किला सथयत्सनवथ पूरुषम् ॥ कुशकूर्चनिक्षेपः–

ॐ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनुर्न तदामोऽअश्नुते श्रृतासऽइद्वहं तस्तत्समासते ॥ दूर्वानिक्षेपः–

ॐ सहस्रपरमादेवी शतमूलाशतांकुरा ।

सर्वं हरतु मे पापं दूर्वादुःस्वप्ननाशिनी ॥ फलप्रक्षेपः–

ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः ।

बृहस्पति प्रसूतास्तानोमुञ्चत्व गूँ हसः । सर्वौषधीनिक्षेपः–

ॐ याऽऔषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगं पुरा । मनैनु–
बभ्रूणामह गूँ शतं धामानि सप्त च ॥ पञ्चरत्नप्रक्षेपः–

ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
दधद्रत्नानि दाशुषे ॥ गन्धनिक्षेपः–

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ सप्त मृत्तिकानिक्षेपः–

ॐ मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके ।
त्वया हतेन पापेन गच्छामि परमाङ्गतिम् । पूर्णपात्रम्–

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदुच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ श्रीफलस्थापनम् –

ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ विल्ल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः ।
वस्त्रवेष्टनम्–

ॐ सुजातो ज्योतिषा सह शर्मवरूथमासदत्स्वः ।
वासो अग्ने विश्वरूप गूँ संव्ययस्व विभावसो ॥

ततः प्रधानकलशस्य चतुर्दिक्षु चतुरो वेदान् आवाह्य पूजयेत् ।

ॐ पूर्वे ऋग्वेदाय नमः । ऋग्वेदमावाहयमि स्थापयामि पूजयामि

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातम् ॥ दक्षिणे–

ॐ यजुर्वेदाय नमः । यजुर्वेदमावाहयामि स्थापयामि पूजयामि ।

अश्वस्थानात् गजस्थानाद् वल्मीकात् संगमाद् ह्रदात् ।
राजद्वारात् गोकुलाच्च मृदमानीय निक्षिपेत् ॥

ॐ इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्श्रेष्ठतमाय कर्मणऽआप्यायद्ध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मामा वस्त्तेनऽईशतमाघस गूँ सोद्धुवाऽअस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि । पश्चिमे– ॐ सामवेदाय नमः । सामवेदमावाहयामि स्थापयामि पूजयामि ।

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये ।

निहोता सत्सि वर्हिषि ॥ उत्तरे–

ॐ अथर्ववेदाय नमः । अथर्ववेदमावाहयामि स्थापयामि पूजयामि

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभि-स्रवन्तुनः । चतुर्भ्यो वेदेभ्यो नमः । सर्वोपचारान् समर्पयामि ॥ कलशप्रतिष्ठां पीताक्षतैः कुर्यात् ।

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ गूँ समिमं दधातु । विश्वेदेवासऽइहमादयन्तामों ३ प्रतिष्ठ । एषवै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेवप्रतिष्ठितं भवति ।

कलशप्रार्थना–

देवदानवसंवाधे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदाकुम्भ विधृतो विष्णुना स्वयम् ।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
आदित्या वसवो रूद्रा विश्वेदेवाः सपैतृकाः ।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

तत ईशानकलशे विष्वक्सेनं पूजयेत् ।

❖ विष्वक्सेनपूजनम् ❖

कलशपूर्णपात्रोपरि सप्तदर्भमयं कूर्चन्निक्षिपेत् । ॐ विश्वकर्मन्निति त्र्यृचस्य शाकऋषिः त्रिष्टुप्छन्द विश्वकर्मा विष्वक्सेनो देवता विष्वक्सेनपूजने विनियोगः । पीताक्षतैरावाहयेत्–

ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुतद्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु ।
ॐ वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्याहुवेम ।
सनो विश्वानि हवनानि जोषद्विश्वशंभूरवशे साधुकर्मा ॥
ॐ विश्वकर्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ॥
तस्मै विशः समनमन्तपूर्वीरयमुग्रो विहव्यो यथासत् ॥

ॐ आवाहयामि सेनेशं सर्वविघ्नविनाशकम् ।
सूत्रवत्यासमेतञ्च ब्रह्माण्डपरिपालकम् ॥

ॐ सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनमावाहयामि स्थापयामि पूजयामि । इत्यावाह्य–सूत्रवतीसहिताय श्रीमते विष्वक्सेनाय नमः । हस्तयोरर्घ्यं समर्पयामि, पादयोः पाद्यं, मुखयाचमनीयं, वस्त्रमुपवीतं गन्धं पुष्पं धूपं दीपं नैवेद्यं सफलताम्बूलं दक्षिणां प्रदक्षिणां नमस्कारं समर्पयामि । ततो विष्वक्सेनस्येशानाग्नेयनैऋत्यवायव्यपूर्वदक्षिण पश्चिमोत्तरेषु क्रमेण तत्पार्षदान् पूजयेत् ।

ॐ गं गजानाय नमो गजाननमावाहयामि स्थापयामि पूजयामि ।
ॐ जं जयत्सेनाय नमो जयत्सेनमावाहयामि स्थापयामि पूजयामि ।
ॐ हं हरिमुखाय नमो हरिमुखमावाहयामि स्थापयामि पूजयामि ।
ॐ कं कालप्रकृतये नमः कालप्रकृतिमावाहयामि स्थापयामि पूजयामि
ॐ बं बलाय नमो बलमावाहयामि स्थापयामि पूजयामि ।
ॐ प्रं प्रबलाय नमः प्रबलमावाहयामि स्थापयामि पूजयामि ।

ॐ विं विनायकाय नमो विनायकमावाहयामि स्थापयामि पूजयामि।
ॐ विं विघ्नेशाय नमो विघ्नेशमावाहयामि स्थापयामि पूजयामि
इत्यावाह्याघ्यार्द्युपचारैः संपूज्याञ्जलिं बध्वा प्रार्थयेत् ॥

ॐ विघातं विघ्नानां विदधति गजास्य प्रभृतयः
सदस्या गीर्वाणप्रवरप्रणुता यस्य शततम् ।
रमाभर्तुः सेवा प्रणयनपरो यश्च नितरां
स विष्वक्सेनो मे वितरतु मनोवाञ्छितमदः ॥
ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः ।
स मे वैकुण्ठसेनानी भूयात् सर्वत्र विघ्नहा ॥
विदधतु सुखं विष्वक्सेनस्य ते प्रथमे भटाः
गजमुखजयत्सेनौ कालाह्वसिंहमुखौ च नः ।
जगति भजतां तत्तत्प्रत्यूहतूलदवानलाः
दिशि दिशि दिवारात्रं श्रीयज्ञपालनतत्पराः ॥

इति विष्वक्सेनं सूत्रवत्या पार्षदैश्च सहितं संपूज्य प्रणमेत् ।

❖ वरुणपूजनम् ❖

तत आग्नेयदिशि पुण्याहकलशे पीताक्षतैर्वरुणमावाह्य पूजयेत्–

ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युराचके ॥
ॐ तत्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहव्विर्भिः ।
अहेडमानोव्वरुणेहबोध्युरुश गूँ समानऽआयुः प्रमोषीः ॥
ॐ वरुणाय नमः साङ्गं सपरिवारं सशक्तिकं वरुणमावाहयामि स्थापयामि पूजयामि । इत्यावाह्यसर्वोपचारैः संपूज्य प्रणम्य प्रार्थयेत् ।

त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।

सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

॥ ब्राह्मणवरणम् ॥

हरिः ॐ तत्सत् ३ ॐ विष्णुर्विष्णुर्विष्णुविष्णु:श्रीमद्भगवतो महापुरुषस्य श्रीभूनीला नायकस्य सौशील्यादि सकलकल्याण गुणगणसमलङ्कृतस्य श्रीमन्नारायणस्य नाभिकमलोद्भवस्य भगवदाज्ञया सकलजगत्सृष्टिं कुर्वतरखिललोकपितामहस्य ब्रह्मणो द्वितीये परार्द्ध एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रमथदिवसे दिनस्यद्वितीये यामे तृतीये मुहूर्तेऽष्टमे श्रीश्वेतवाराहकल्पे वैवस्वत मन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमन्नृपति विक्रमार्कराज्यात् श्रीरामानुजमुनिप्रादुर्भावादमुक ९९४ वत्सरे वर्तमानेऽमुकायनेऽमुकर्त्तावमुकमासेऽमुकपक्षेऽमुकतिथावमुकनक्षत्रेऽमुकयोगेऽमुककरणेऽमुकराशिस्थिते चन्द्रेऽमुकराशिस्थिते श्रीसूर्येऽमुकराशि स्थिते देवगुरौ शेषेष्वन्येषु ग्रहेषु तत्तत्स्थान स्थितेषु सत्सु एवं गुणगण विशेषेण विशिष्टायां शुभपुण्यतिथौ जम्बुद्वीपे भारतबर्षेऽमुकराज्येऽमुकनद्याः समीपेऽमुकग्रामेऽमुकदेवसन्निधौ वर्तमानाऽमुकवेदान्तर्गत अमुकशाखाध्यायी अमुकर्षिकोऽमुकगोत्रोत्पन्नामुकनामाहं (अमुकशर्माहं) भगवदाज्ञया भगवत्कैंकर्यरूपेण भगवन्मुखोल्लासार्थममुकामुकसमाराधनपूर्वकं वैकुण्ठोत्सवपूर्वकनारायणबल्याख्यं कर्मकर्तुम् नानानामगोत्रान् नानानामशर्मणो ब्राह्मणानेभिर्द्रव्यैस्तत्तत्कर्मकरणार्थमहं वृणे । इति संकल्प्य ब्राह्मणवरणं कृत्वा पुण्यहवाचनं कुर्यात् ।

❖पुण्याहवाचनम्❖

पुण्याहे चतुरो ब्राह्मणान् दर्भहस्तान् पूरत उपवेश्यार्च्चयेत् । यजमानः- पुष्पाणि पान्तु, विप्राः सौमनस्यमस्तु । यजमान अक्षताः पान्तु,

विप्रा अरिष्टमक्षतं चास्तु। यजमानो गन्धाः पान्तु, विप्राः सौमङ्गल्यम-स्तु। यजमानः- सफलताम्बूलं पातु। विप्रा ऐश्वर्यमस्तु। यजमानो दक्षिणाः पान्तु, विप्रा बहुदेयञ्चास्तु। यजमानो भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये, विप्रा वाच्यताम्। हस्ते हिरण्याक्षतोदकमादाय पूर्वोक्तप्रकारेण देशकालादीन् संकीर्त्य भगवदाज्ञया भगवत्प्रीत्यर्थं यागो-पकरणगृहशरीरादिशुद्ध्यर्थम्पुण्याहवाचनमहङ्करिष्यामि। इति सङ्कल्प्य जानुनी भूमौ निपात्याञ्जलिं बद्ध्वा प्रार्थयेत्।

व्रतजपतपःस्वाध्यायक्रतुदयादानदमनियमसम्पन्नानां तत्र भवतां ब्राह्मणानां मनः समाधीयतां, विप्राः समाहितमनसः स्म। यजमानः- प्रसीदन्तु भवन्तः, विप्राः प्रसन्नास्मः। यजमानो भवदभिरनुज्ञातः पुण्याहं वाचयिष्ये, विप्रा वाच्यताम्। तत उदकुम्भं सव्यहस्ते निधाय दक्षिणाहस्तेन पिधाय प्रार्थयेत्। यजमानो भो ब्राह्मणा अस्य श्रीवैकुण्ठोत्सवपूर्वकनारायणबलिकर्मणः पुण्याहं भवन्तो ब्रुवन्तु। विप्राः ॐ पुण्याहमस्तु ३। ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणोवसुनीतयज्ञैः। घृतेनत्त्वंतन्न्वं वर्धयस्वसत्याःसन्तु यज मानस्यकामाः॥ यजमानो भो ब्राह्मणा अस्य श्रीवैकुण्ठोत्सव पूर्वक नारायणबलि कर्मणः स्वस्तिभवन्तोब्रुवन्तु। विप्रा ॐ स्वस्तिरस्तु ३

हेमाद्रि संभवं कुम्भं मन्त्रादिभिर्क्षालितान्तरम्।
चन्दनागरुकर्पूरधूपितं शोभनाकृतिम्॥
आवेष्ठिताङ्गनीरन्ध्रं तन्तुना त्रिगुणात्मना।
अर्चितं गन्धपुष्पाद्यैः कूर्चासनसमन्वितम्॥
नारिकेलयुतं पञ्चपल्लवैः समलङ्कृतम्।
नवरत्नोदकं मन्त्री स्थापयेत्तारमुच्चरन्॥

ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्निस्ताक्ष्र्यो ऽअष्टिनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु ।

यजमानो भो ब्राह्मणा अस्य श्रीवैकुण्ठोत्सवपूर्वकनारायणबलि कर्मण ऋद्धिं भवन्तो ब्रुवन्तु । विप्राः- ॐ ऋद्धिरस्तु ३ ।

ॐ ऋद्ध्याम तोमं सनुयाम वाजमानो मन्त्रं सरथे होपयाताम् यशोनपक्वं मधुगोष्वन्तरा भूतांशो अश्विनो कामप्राः ॥ ततः सर्वे ब्रुयुः । ॐ शान्तिरस्तु ३ । ॐ पुष्टिरस्तु ३ । ॐ तुष्टिरस्तु ३ । ॐ ऋद्धिरस्तु ३ । ॐ अविघ्नमस्तु ३ । ॐ आयुष्यमस्तु ३ । ॐ आरोग्यमस्तु ३ । ॐ धनधान्यसमृद्धिरस्तु ३ । ॐ गोब्राह्मणेभ्यः शुभमस्तु ३ । ॐ सर्वशोभनमस्तु ३ । ॐ सर्वासम्पदः सन्तु ३ । ॐ शुभानि वर्धन्ताम् ३ । ॐ शान्तिः ३ ।

ततः कुशहस्तैश्चतुर्भिर्विप्रैः सहाचार्यः पुण्याहकलशमभिमन्त्रयेत् । प्रथमं वरुणासूक्तपवमानसूक्ताभ्यामभिमन्त्र्य पाञ्चरात्रागममन्त्रैरभिमन्त्रयेत् ।

❖ वरुणासूक्तम् ❖

ॐ हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः।
या ऽअग्निं गर्भं दधिरे सुवर्णाः तान ऽआपः श गुँ स्योना भवन्तु ॥
यासां राजा वरुणो याति मध्ये सत्यानृते ऽअवपश्यञ्जनानाम् ।
या ऽअग्निं गर्भं दधिरे सुवर्णास्तान ऽआपः शं गुँ स्योना भवन्तु ॥
यासान्देवा दिवि कृण्वन्ति भक्ष्यं या ऽअन्तरिक्षे बहुधा भवन्ति ।
या ऽअग्निं गर्भं दधिरे सुवर्णास्तान ऽआपः श गुँ स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृश तत्वं च मे ।
घृतश्चुतः शुचयो याः पावकास्तान ऽआपः श गुँ स्योना भवन्तु ॥
ॐ आपोहिष्ठा मयोभुवस्तान ऽऊर्ज्जे दधातन । महेरणाय चक्षसे ॥

ॐ योवः शिवतमोरसस्तस्य भाजयतेहनः । उशतीरिवमातरः ॥
ॐ तस्माऽअरङ्गमामवो यस्य क्षयायजिन्वथ । आपोजन यथाचनः ॥
ॐ चित्पतिर्म्मा पुनातु वाक्पतिर्म्मा पुनातु देवो मां सविता पु-
नात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्यते पवित्रपते
पवित्र पूतस्य यत्कामः पुने तच्छकेयम् ॥ ततः (११४) पृष्टोक्तप्रकारेण
पवमानसूक्तेनाभिमन्त्र्य पाञ्चरात्रागममन्त्रैरभिमन्त्रयेत् ।

❖पाञ्चरात्रागममन्त्राः❖

ॐ दर्भैः पृशन्तु कलशं ब्राह्मणैः सह देशिकः ।
ततश्च शुद्धि मन्त्रांस्तु पठेदेवं समाहितः ॥
शुद्धये ऽस्तुपरो देवो वासुदेवोऽस्तु शुद्धये ।
सङ्कर्षणः शुद्धयेऽस्तु प्रद्युम्नश्चास्तु शुद्धये ॥
शुद्धयेस्त्वनिरुद्धोऽपि केशवश्चास्तु शुद्धये ।
नारायणोऽस्तु विश्वेश शुद्धये सर्वकर्मणाम् ॥
शुद्धये माधवश्चास्तु सर्वलोकहिते रतः ।
गोविन्दः शुद्धये चास्तु परमात्मा सनातनः ॥
शुद्धये विष्णुरस्त्वाद्य शुद्धये मधुसूदनः ।
सर्वलोकहितो देवः शुद्धयेऽस्तु त्रिविक्रमः ॥
वामनः शुद्धये चास्तु श्रीधरोद्यास्तु शुद्धये ।
शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥
सदा दामोदरो देवः शुद्धयेऽस्तु जगत्पतिः ।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः ॥
अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये ।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ।

सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा ।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥
क्रोडात्मा शुद्धये चास्तु शुद्धये वडवानलः।
शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥
देव एकार्णवशयः शुद्धयेऽस्तु निरन्तरम् ।
शुद्धयेऽस्तु सदा देवः कूर्मः पातालधारकः ॥
वाराहः शुद्धये चास्तु नारसिंहोऽस्तु शुद्धये ।
अमृताहरणञ्चास्तु शुद्धये सर्वकर्मणाम् ॥
श्रीपतिः शुद्धये चास्तु शान्तात्मा चास्तु शुद्धये ।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥
पारिजातहरश्चास्तु वामनश्चास्तु शुद्धये ।
सर्वत्र शुद्धये चास्तु दत्तात्रेयो महाप्रभुः ॥
न्यग्रोधशायी भगवान् शुद्धये चास्तु सर्वदा ।
एकश्रृङ्गतनुश्चास्तु वामनश्चास्तु शुद्धये ॥
त्रिविक्रमः शुद्धयेऽस्तु शुद्धयेऽस्तु नरः सदा ।
नारायणः शुद्धयेऽस्तु हरिः कृष्णश्च शुद्धये ॥
ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः ।
रामश्च शुद्धये चास्तु वेदविद्भगवाँस्तथा ॥
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयङ्करः ।
शुद्धयेऽस्तु सदादेवः पातालशयनः प्रभुः ॥
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा ।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः ॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च ।

शिवाय मुक्तये सन्तु वृद्धये सर्वकर्मणाम् ॥
मन्त्राणां देशिकानाञ्च स्थानानामपि सर्वदा ।
पुत्रमित्रकलत्राणां दासीदासगवामपि ॥
वेदशास्त्रागमादीनां व्रतानामिष्टसम्पदाम् ।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥
आयुरारोग्यमेधानां धनधान्यादिसम्पदाम् ।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥
राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम् ।
वैष्णवानां विशेषेण परत्र हितमिच्छताम् ॥
पञ्चकालविशुद्धानां सत्वस्थानां शुभात्मनाम् ।
स्वस्त्यस्तु च शिवञ्चास्तु शुभं चास्तु पुनः पुनः ॥
अविघ्नमशिवञ्चास्तु दीर्घमायुष्यमस्तु वै ।
समाहितमनश्चास्तु सम्पदश्चोत्तरोत्तरम् ॥
पुण्याहं शुद्धये चास्तु वासुदेवादि मूर्तयः ।
शङ्खचक्रगदापद्मयुक्तः सर्वेश्वरेश्वरः ॥
प्रीयतां भगवान्देवो लांगली प्रीयतां सदा ।
प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः ॥२८॥
नारायणः सुरेशोपि कर्मणां पूरणाय च ।
न्यूनाधिकानां शान्त्यर्थं प्रीयतां प्रीयतां विभुः ॥
पुण्याहं स्वस्ति ऋद्धिं च संवाच्य सहितो द्विजैः ।
आत्मानं प्रोक्षयेत् पश्चाद्यागोपकरणानि च ॥
येन देवा पवित्रेणेत्यादि मन्त्रान्पठन्गुरुः ।
एवं सर्वेषु यागेषु कुर्यात्पुण्याहवाचनम् ॥

इति पुण्याहं वाचयित्वा तज्जलेनाम्रपल्लवेन कूर्चेन चात्मानं यागोपकरणानि गृहादिकञ्च घण्टावादनपूर्वकं प्रोक्षयेत् । प्रोक्षणमन्त्राः-

ॐ येनदेवाः पवित्रेण आत्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ॥

❖वास्तुसूक्तम्❖

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवानः ।
यत्वे महे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे ॥
ॐ वास्तोष्पते प्रतरणो नऽएधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रतितन्नो जुषस्व ॥
ॐ वास्तोष्पते शग्मयासंसदाते सक्षीमहिरण्मया गातुमत्या ।
पाहि क्षेमऽउतयोगेवरन्नो यूयं पात स्वस्तिभिः सदा नः ॥
ॐ अमीवहा वास्तोष्पते विश्वारूपाण्याविशन् ।
सखा सुसेवऽएधिनः शन्नो भव द्विपदे शञ्चतुष्पदे ॥ इति मन्त्रैः सर्वतः प्रोक्ष्ययित्वा ब्राह्मणानभ्यर्च्य वेदादि पारायणे नियोजयेत् ।

❖पारायणग्रन्थानां नामानि❖

ऋग्यजुःसामाथर्वेतिचत्वारोवेदाःसाङ्गाःसरहस्या ईशादि कौषीतक्यान्तादशोपनिषदोऽष्टादशपुराणानि वाल्मीकीयरामायणं महाभारतोद्योगशान्तिपर्वणी श्रीभाष्यगीताभाष्यगद्यत्रयवैकुण्ठस्तवसहस्रगीतिस्तोत्ररत्नजितन्तेस्तोत्रादीनि यथाशक्तिपारायणङ्कारयेत् । श्रीवैकुण्ठोत्सवैकत्रिपञ्चसप्तनवभिर्दिनैरपि कर्तुं शक्यते संक्षेपविस्तारेण यथाशक्ति व्यवहारः कर्तव्यः ।

❖भगवदाराधनाविधिः❖

प्रथमं भगवत्पुरतो गत्वा साष्टाङ्गं कुर्यात् ।

ॐ अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥

दीपं प्रज्वाल्य हस्तशोधनं कृत्वा घण्टानादं विधाय श्रीविग्रहोत्थापनं कुर्यात् ।

ॐ उतिष्ठब्रह्मणास्पते देवयन्तस्त्वे महे ।
उपप्रयन्तुमरुतः सुदानवऽइन्द्र प्रासुर्भवासचा ॥
ॐ प्रैतु ब्रह्मणास्पतिः प्रदेव्येतुसूनृता ।
अच्छावीरन्नर्य्यम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनः ॥

त्यजविबुधगणारिसूदनाद्य निद्रां भवभुवनपतेघसञ्चयापयज्ञे । त्वयि भवति हि नाथ यस्य भक्तिरुग्रा गतिरतिशायिनी तु तस्य दैवतेभ्यः ॥

सुमङ्गलमित्यादिना मङ्गलं विधाय पूजास्थानं संशोध्य पूजोपयोगि पात्रादीनि संशोध्य पूर्वदिननिवेदितपुष्पादिकं विर्जयेत् । पीठादौ पूजासामाग्रिं संस्थाप्य पञ्चपात्राणि क्रमेणाग्नेयादि कोणेष्वर्घ्यपाद्याचमनस्नानीयानि संस्थाप्य मध्ये शुद्धोदकं संस्थाप्य पूर्णकुम्भे वस्त्रपूतजलं पूरयित्वा व्याहृतिना मूलेन चाभिमन्त्र्य तुलसीपुष्पादीनि मूलेनैव निक्षिप्यसुरभिमुद्रयाभिमन्त्र्य पूर्व स्थापितपञ्चपात्रेषु पूर्णकुम्भजलेनपूरयित्वा तुलसीदलादीनिनिक्षिप्य मूलेन दशवारमभिमन्त्र्य सुरभिमुद्रां प्रदर्श्य पञ्चोपनिषणमन्त्रैः संक्षेपतो भूतशुद्धिं कुर्यात् ।

❖ संहारन्यासः ❖

ॐ लां नमः पराय सर्वात्मने नारायणाय नमः ।इति पादयोर्न्यसेत् ।
ॐ वां नमः पराय निवृत्यात्मने अनिरुद्धाय नमः ।इत्युपस्थे न्यसेत् ।
ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः । इति हृदये न्यसेत् ।
ॐ यां नमः पराय पुरुषात्मने संकर्षणाय नमः ।इति नासाग्रे न्यसेत्
ॐ षां नमःपरायपरमेष्ठ्यात्मने वासुदेवाय नमः ।इति मूर्ध्नि न्यसेत्

इति पञ्चमन्त्रैर्ध्यानद्वारा प्राकृतपञ्चतत्वानां संहारं विधायाग्रिम पञ्चमन्त्रैर्भगवद्ध्यानेन दिव्यतत्वमुत्पाद्य तेन दिव्यतत्वेन भगवदाराधनाकर्तु योग्यं दिव्यदेहप्राप्तिं ध्यायेत् ।

❖ सृष्टिन्यासः ❖

ॐ षां नमः परायपरमेष्ठ्यात्मने वासुदेवाय नमः । इति मूर्ध्निन्यसेत्
ॐ यां नमः पराय पुरुषात्मने संकर्षणाय नमः ।इति नासाग्रे न्यसेत्
ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः । इति हृदये न्यसेत् ।
ॐ वां नमः पराय निवृत्यात्मने अनिरुद्धाय नमः । इत्युपस्थे न्यसेत्
ॐ लां नमः पराय सर्वात्मने नारायणाय नमः । इति पादयोर्न्यसेत्

❖ सेवाप्रारम्भः ❖

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
संसारसिन्धोस्तरणैकहेतून्दधे गुरून्मूर्ध्नि हरिस्वरूपान् ।
रजांसि येषां पदपङ्कजानां तीर्थाभिषेकश्रियमावहन्ति ॥
स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः ।
विधातुं प्रीतिमात्मानं देवः प्रक्रमते स्वयम् ॥
कूर्मादीन्दिव्यलोकाँस्तदनुमणिमयं मण्डपं तत्र शेषं
तस्मिन्धर्मादिपीठं तदुपरिकमलं चामरग्राहिणीश्च ।
विष्णुं देवीविभूषायुधमुरगगणं पादुके वैनतेयं
सेनेशं द्वारपालान्कुमुदमुखगणान् विष्णुभक्तान् प्रपद्ये ।

एवं गुरुपरम्परां भगवत्परिवारांश्च ध्यात्वा भगवन्तं षोडशोपचारैः पूजयेत् । प्रथमं बलमन्त्रं चिन्तयेत्–

ॐ भगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा भगवतः कर्म करिष्यामि । भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैक-रसेन स्वशेषभूतेन मया स्वकीयैश्चोपकरणैः स्वाराधनैकप्रयोजनाय परमपुरुषः सर्वशेषी सर्वेश्वरः स्वशेषभूतमिदममुकगोत्रस्यामुकप्रव-रान्वितस्यामुकशर्मणो ममामुकसंबन्धिनः श्रीवैष्णवस्य श्रीवैकुण्ठोत्सव

पूर्वकनारायणबलिरूपं स्वाराधनां स्वयमेव कारयति । इत्यनुसंधाय प्रथमं पुरुषसूक्तमन्त्रमुच्चार्यानन्तरं निम्नश्लोकमुक्त्वोपचारान् दद्यात् । अत्रोक्तन्यासो भगवच्छ्रीविग्रह एव कर्तव्यः ॥

❖पुरुषसूक्तषोडशोपचारो न्यासविधिश्च❖

भगवद्वामकरे स्पृष्ट्वा पुष्पाञ्जलिना श्रीमन्नारायणमावाहयेत्-

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुवाहवे ।
सहस्रनाम्ने पुरुषायशाश्वते सहस्रकोटीयुगधारिणे नमः ॥

ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि गूँ सर्व्वतस्पृत्वास्त्यतिष्ठद्दशाङ्गुलम् ।

आवाहयाम्यमरवृन्दनताङ्घ्रियुग्मं
लक्ष्मीपतिं भुवनकारणमप्रमयेम् ।
आद्यं सनातनतनुं प्रणवासनस्थं
पूर्णेन्दुभास्करहुताशसहस्रदीप्तिम् ॥

श्रीमन्नारायणमावाहयामि स्थापयामि पूजयामि । भगवद्दक्षिणकरे स्पृष्ट्वासनं समर्पयेत्-

ॐ पुरुष एवेद गूँ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥

सद्रत्नजाम्बूनदनिर्मितं विभो वरासनं सर्ववरप्रदायते ।
समर्पये सर्वजगन्निवासिने सुनिर्मलज्ञानधनप्रदायिने ॥

श्रीमते नारायणाय नमः । आसनं समर्पयामि । भगवद्वामपादे स्पृष्ट्वार्घ्यम्प्रदद्यात् -

ॐ एतावानस्य महिमातोज्यायाँश्च पूरुषः ।
पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥

यः सर्वलोकस्य समाश्रयश्च पूज्यश्च मान्यश्च दिवौकसामपि ।

गृणातु सोर्घ्यं परिपूर्णकामः प्रसीदतां ब्रह्ममहाविभूतिः ॥

श्रीमते नारायणाय नमोऽर्घ्यं समर्पयामि । इति भगवद्दक्षिणपादे स्पृष्ट्वा पाद्यं समर्पयेत्-

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्क्रामत्साशनानसने अभिः ॥
यो राजते यज्ञपतिश्च यज्ञे सर्वस्य लोकस्य शरण्यभूतः ।
यज्ञेश्वरो यज्ञवपुश्च विष्णुः पाद्यं प्रगृह्णातु सवासुदेवः ॥

श्रीमते नारायणाय नमः । पाद्यं समर्पयामि । भगवद्वामजानौ स्पृष्ट्वा- चमनं समर्पयेत् ।

ॐ ततो विराडजायत विराजोऽअधिपूरुषः।
सजातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥
योऽसौ भवान्सर्वजगत्प्रधानो यस्य प्रसादेन भवन्ति लोकाः ।
स त्वं कुरुष्वाचमनं वरण्य भव प्रसन्नो मयि दीननाथ ॥

श्रीमते नारायणाय नमः । आचमनं समर्पयामि । इति भगवद्दक्षिण-जानौ स्पृष्ट्वा स्नानं समर्पयेत्-

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे व्वायव्यानारण्याग्राम्याश्च ये ॥
समाहृतैः स्वर्णघटैश्च स्वच्छैः स्वर्लोकस्रोतस्विनिदिव्यतीर्थैः ।
स्नानं कुरुष्वाच्युतदिव्यमूर्ते देवाग्रजानां निधनप्रदायिन् ॥

श्रीमते नारायणाय नमः । स्नानं समर्पयामि । दुग्धेन स्नापयेत्-

ॐ सन्तेपया गुँ सि समुसन्तु वाजाः सम्वृष्ण्यान्यभिमातिषाह ।
आप्यायमानोऽअमृतायसोम दिविश्रवा गुँ स्युत्तमानिधिष्व ।

श्रीमते नारायणय नमः । दुग्धस्नानं समर्पयामि । शुद्धोदकेन स्नापयेत्-

ॐ इतोन्विन्द्रंस्तवाम शुद्धं शुद्धेन साम्ना ।

शुद्धैरुक्थैर्वावृधासं शुध्या आशीर्वान्ममत्तु ॥

श्रीमते नारायणाय नमः । शुद्धोदकस्नानं समर्पयामि ॥ एवं क्रमेण प्रत्येकस्नानान्ते शुद्धोदकस्नानं कारयेत् । दध्ना स्नापयेत्–

ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभिनो मुखाकरत्प्रणऽआयू गुँ षितारिषत् ।

श्रीमते नारायणाय नमः । दधिस्नानं समर्पयामि ॥ घृतेन स्नापयेत्–

ॐ तेजः पशूनां हविरिन्द्रियावत्परिश्रुता पयसा सारघं मधु ।

अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृत सोमऽइन्दुः।

श्रीमते नारायणाय नमः । घृतस्नानं समर्पयामि ॥ मधुना स्नापयेत्–

ॐ मधुवाताऽऋतायते मधुक्षरन्तिसिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव गूँ रजः । मधुद्यौरस्तु नः पिता ॥ ॐ मधुमान्नो वनस्पतिर्मधुमाऽअस्तुसूर्यः । माध्वीर्गावो भवन्तु नः ॥ श्रीमते नारायणाय नमः । मधुस्नानं समर्पयामि । शर्करया स्नापयेत्–

ॐ ताः शर्कराऽअभवंस्तच्छर्कराणां शर्करात्वम् । पशुरग्निर्यच्छर्कराभिरग्निम् । परिमृणोति वज्रेणैवास्मिन् पशुं परिदधाति ॥

श्रीमते नारायणाय नमः । शर्करास्नानं समर्पयामि । भगवद्वामकट्यां स्पृष्ट्वा वस्त्राणि समर्पयेत्–

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।

छन्दा गुँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायतः ॥

शुद्धस्त्वमात्मा पुरुषः पुराणो जगत्सुतत्वं सुरलोकनाथ ।

वस्त्राणि गृह्णीष्व मयार्पितानि दूकूलकौशेयसुपट्टकानि ॥

श्रीमते नारायणाय नमः । वस्त्राणि समर्पयामि । भगवद्दक्षिणकट्यां स्पृष्ट्वा यज्ञोपवीतं समर्पयेत्–

ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥
कार्पासतन्तूद्भवब्रह्मसूत्रं सूत्रात्मने सर्वचराचरस्य ।
समर्पये सात्वतपुङ्गवाय तेजः स्वरूपाय सुखप्रदाय ॥
श्रीमते नारायणाय नमः । यज्ञोपवीतं समर्पयामि ॥ भगवन्नाभौ स्पृष्ट्वा चन्दनं समर्पयेत्–

ॐ तं यज्ञं वर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥
आनन्दनो यो सुमतां परात्मा तापत्रयस्योपशमश्च यस्मात् ।
तस्मै प्रयच्छामि सुचन्दनं वै काश्मीरकर्पूरविभावितं च ॥
श्रीमते नारायणाय नमः । चन्दनं समर्पयामि । भगवद्धृदये स्पृष्ट्वा पुष्पाणि समर्पयेत्–

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्किं बाहू किमूरूपादाऽउच्येते ॥
यः सर्वगन्धोखिलविश्वरूप तस्मै प्रसूनानि समर्पयामि ।
कदम्बजातीवकुलोद्भवानि कुशेशयश्रीतुलसीदलानि ॥
श्रीमते नारायणाय नमः । पुष्पाणि समर्पयामि । भगवद्वामकुक्षौ स्पृष्ट्वा दशाङ्गधूपं समर्पयेत्–

ॐ ब्राह्मणोस्यमुखमासीद्वाहूराजन्यः कृतः ।
ऊरूतदस्य यद्वैश्यः पद्भ्या गुँ शूद्रोऽअजायत ॥
धूपं दशाङ्गं शुभगन्धकञ्च गोसर्पिषाक्तं हृदयप्रियञ्च ।
समर्पये दिव्यनभास्पदाय क्षीराब्धिजासेवितसत्पदाय ॥
श्रीमते नारायणाय नमः । दशाङ्गधूपं समर्पयामि । भगवद्दक्षिणकुक्षा स्पृष्ट्वा दीपं दर्शयेत्–

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
आदित्यचन्द्राग्नि प्रकाशकाय वै सदा चिदानन्दमयाव्ययाय च ।
स्वाज्येनयुक्तं शुभवर्त्तिभूषितं दीपं प्रयच्छामितमःप्रणाशकम् ॥
श्रीमते नारायणाय नमः । दीपं दर्शयामि ॥ ततो घृतदधिमधुकर्पू-

रान्वितं मधुपर्कम्भगवते निवेदयेत्–

योऽसौ भवांस्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः ।
गृहाण चैवं सुरलोकनाथ भक्तोपनीतं मधुपर्कसंज्ञम् ॥
श्रीमते नारायणाय नमः । मधुपर्कं समर्पयामि । भगवत्कण्ठे स्पृष्ट्वा

नैवेद्यं निवेदयेत्–

ॐ नाभ्याऽआसीदन्तरिक्ष गूँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकाँ ३ अकल्पयन् ॥
द्विजस्त्रीणां भक्ते मृदुनि विदुरान्ने व्रजगवां
दधिक्षीरे सख्युः स्फुटचिपिटमुष्टौ मुररिपो ।
यशोदायास्तन्ये ब्रजयुवतिदत्ते मधुनि ते
यथासीदामोदस्तमयमुपहारेपिकुरुताम् ॥
श्रीमते नारायणाय नमः । नैवेद्यं निवेदयामि । भगवद्वक्त्रे स्पृष्ट्वा

ताम्बूलं समर्पयेत्–

ॐ यत्पुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥
एलादिपूगीफलचन्द्रसंयुतं प्रशस्तदेशोद्भवसौरभास्पदम् ।
ताम्बूलपत्रं भगवन्समर्पये भवप्रवाहोपरमाय तेऽच्युत ॥
श्रीमते नारायणाय नमः । ताम्बूलं समर्पयामि । भगवदक्ष्णोः

स्पृष्ट्वा नीराजयेत्–

ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञन्तन्न्वाना ऽअवद्ध्नन् पुरुषं पशुम् ॥
सुवर्तिकर्पूरविदीपितेन सुवर्णपात्रे विनियोजितेन ।
नीराजये त्वामहमप्रमेय दिव्येन दीपेन दिवप्रदेन ।

श्रीमते नारायणाय नमः । नीराजनं समर्पयामि । भगवन्मूर्ध्नि स्पृष्ट्वा साष्टाङ्गप्रणामं कुर्यात्-

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्यासन् ।
तेह नाकं महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥

श्रीमते नारायणाय नमः । प्रणामङ्करोमि । अर्चनादिकं कुर्यात्-

❖ मन्त्रपुष्पाञ्जलिः ❖

ॐ तद्विष्णोः परमं पद गूँ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्प्रासो विपण्यवो जागृवा गुँ सः समिन्धते । विष्णोर्यत्परमं पदम् ॥ पर्याप्तानन्तरायाय सर्वस्तोमोतिरारात्र-मुत्तममहर्भवति । सर्वस्याप्त्यै सर्वस्य जीत्यै सर्वमेव तेनाप्नोति सर्वं जयति हरिः ॐ शान्तिः ३ ॥

सुगन्धवल्लीशतपत्रजाति सुवर्णचम्पावकुलोद्भवानि ।
गृहाण देवेश मयार्पितानि प्रभो हरे श्रीतुलसीदलानि ॥

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातम् ॥

ॐ इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ ॐ अग्न आयाहि वीतये गृणानो हव्य दातये । निहोता सत्सिवर्हिषि ॥ ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तुपीतये । शंयो-रभिस्रवन्तु नः ।

ॐ इत्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युप-रिष्ठात् ॐ इत्येकाक्षरम् । नमः इति द्वे अक्षरे । नारायणायेति

पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदं यो ह वै नारा-यणस्याष्टाक्षरं पदमध्येति । अनुपब्रुवः सर्वमायुरेति विन्दते प्राजापत्यं रायस्पोषं गोः पत्यं ततो मृतत्वमश्नुते । ततोऽमृतत्वमश्नुत इति य एवं वेद इत्युपनिषत् ।

ॐ उषा वाऽअश्वमेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणोव्यात्त-मग्निर्वैश्वानरः । संवत्सर आत्माश्वास्य मध्यस्य द्यौः पृष्टमन्तरिक्षमुदरं पृथिवीपाजस्यम् । दिशः पार्श्वेऽअवान्तरदिशः पर्शवऽऋतवोऽअङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभोमा गुँ सानिऽउवध्य गूँ सिकताः । सिन्धवो गुदा यकृच्च क्लोमानश्च वनस्पतयश्च लोमानि । उद्यन् पूर्वार्धो निम्लोचञ्जघनार्धो तद्विजृम्भते यद्विद्योतते यद्विधूनुते तत् स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॐ शान्तिः ३ ॥

ॐ केशवाय	नमः	ॐ नारायणाय	नमः
ॐ माधवाय	नमः	ॐ गोविन्दाय	नमः
ॐ विष्णवे	नमः	ॐ मधुसूदनाय	नमः
ॐ त्रिविक्रमाय	नमः	ॐ वामनाय	नमः
ॐ श्रीधराय	नमः	ॐ हृषीकेशाय	नमः
ॐ पद्मनाभाय	नमः	ॐ दामोदराय	नमः
ॐ श्रीकृष्णाय	नमः	ॐ कमलानाथाय	नमः
ॐ वासुदेवाय	नमः	ॐ सनातनाय	नमः
ॐ वसुदेवात्मजाय	नमः	ॐ पुण्याय	नमः
ॐ लीलामानुषविग्रहाय	नमः	ॐ श्रीवत्सकौस्तुभधराय	नमः
ॐ यशोदावत्सलाय	नमः	ॐ हरये	नमः

ॐ चतुर्भुजात्तशंखारिगदाखड्गाद्युदायुधाय नमः

ॐ देवकीनन्दनाय नमः	ॐ श्रीशाय नमः
ॐ नन्दगोपप्रियात्मजाय नमः	ॐ यमुनावेगसंहारिणे नमः
ॐ बलभद्रप्रियानुजाय नमः	ॐ पूतनाजीवितहराय नमः
ॐ शकटासुरभञ्जनाय नमः	ॐ नन्दव्रजजनानन्दिनेनमः
ॐ सच्चिदानन्दविग्रहाय नमः	ॐ नवनीतविलिप्ताङ्गाय नमः
ॐ नवनीतनटाय नमः	ॐ अनघाय नमः
ॐ नवनीतनवाराहाय नमः	ॐ मुचुकुन्दप्रकाशकाय नमः
ॐ षोडशस्त्रीसहस्रेशाय नमः	ॐ त्रिभङ्गीललिताकृतये नमः
ॐ शुकवागमृताब्धिन्दवे नमः	ॐ गोविन्दाय नमः
ॐ योगिनां पतये नमः	ॐ वत्सवाटचराय नमः
ॐ अनन्ताय नमः	ॐ धेनुकासुरभञ्जनाय नमः
ॐ तृणीकृततृणावर्ताय नमः	ॐ यमलार्जुनभञ्जनाय नमः
ॐ उत्तालतालभेत्त्रे नमः	ॐ तमालश्यामलाकृतये नमः
ॐ गोपगोपीश्वराय नमः	ॐ योगिने नमः
ॐ कोटिसूर्यसमप्रभाय नमः	ॐ इलापतये नमः
ॐ परञ्ज्योतिषे नमः	ॐ यादवेन्द्राय नमः
ॐ यदुद्वहाय नमः	ॐ वनमालिने नमः
ॐ पीतवाससे नमः	ॐ पारिजातापहारकाय नमः
ॐ गोवर्धनाचलोद्धर्त्रे नमः	ॐ गोपालाय नमः
ॐ सर्वपालकाय नमः	ॐ अजाय नमः
ॐ निरञ्जनाय नमः	ॐ कामजनकाय नमः
ॐ कञ्जलोचनाय नमः	ॐ मधुघ्ने नमः
ॐ मथुरानाथाय नमः	ॐ द्वारकानायकाय नमः
ॐ बलिने नमः	ॐ बृन्दावनान्तस्संचारिण नमः

ॐ तुलसीदामभूषणाय नमः ॐ स्यमन्तकमणिहर्त्रे नमः
ॐ नरनारायणात्मकाय नमः ॐ कुब्जाकृष्टाम्बरधरायनमः
ॐ मायिने नमः ॐ परमपुरुषाय नमः
ॐ मुष्टिकासुरचाणूरमल्लयुद्धविशारदाय नमः
ॐ संसारवैरिणे नमः ॐ कंशारये नमः
ॐ मुरारये नमः ॐ नरकान्तकाय नमः
ॐ अनादिब्रह्मचारिणे नमः ॐ कृष्णाव्यसनकर्षकाय नमः
ॐ शिशुपालशिरश्छेत्रे नमः ॐ दुर्योधनकुलान्तकाय नमः
ॐ विदुराक्रूरवरदाय नमः ॐ विश्वरूपप्रकाशकाय नमः
ॐ सत्यवाचे नमः ॐ सत्यसङ्कल्पाय नमः
ॐ सत्यभामारताय नमः ॐ जयिने नमः
ॐ सुभद्रापूर्वजाय नमः ॐ विष्णवे नमः
ॐ भीष्ममुक्तिप्रदायकाय नमः ॐ जगद्गुरवे नमः
ॐ जगन्नाथाय नमः ॐ वेणुनादविशारदाय नमः
ॐ वृषभासुरविध्वंसिने नमः ॐ वाणासुरकरान्तकायनमः
ॐ युधिष्ठिरप्रतिष्ठात्रे नमः ॐ बर्हिबर्हावतंसकाय नमः
ॐ पार्थसारथये नमः ॐ अव्यक्ताय नमः
ॐ गीतामृतमहोदधये नम ॐ कालियफणामाणिक्य-
रञ्जितश्रीपदाम्बुजाय नमः ॐ दामोदराय नमः
ॐ यज्ञभोक्त्रे नमः ॐ दानवेन्द्रविनाशकाय नमः
ॐ नारायणाय नमः ॐ परब्रह्मणे नमः
ॐ पन्नगाशनवाहनाय नमः ॐ जलक्रीडासमासक्तगोपी-
वस्त्रापहारकाय नमः ॐ पुण्यश्लोकाय नमः
ॐ तीर्थपादाय नमः ॐ वेदवेद्याय नमः

ॐ दयानिधये	नमः	ॐ सर्वभूत्तात्मकाय	नमः
ॐ सर्वतीर्थात्मकाय	नमः	ॐ परात्पराय	नमः
ॐ सर्वग्रहरूपिणे	नमः	ॐश्रीरुक्मिणीसत्यभामासहित	
श्रीवेणीमाधवस्वामिने	नमः	ॐ श्रीमते नारायणाय नमः	

❖ श्रीमहालक्ष्म्यष्टोत्तरशतनामावलिः ❖

ॐ श्रियै	नमः	ॐ अमृतोद्भवायै	नमः
ॐ कमलायै	नमः	ॐ चन्द्रसौन्दर्यै	नमः
ॐ विष्णुपत्न्यै	नमः	ॐ वैष्णव्यै	नमः
ॐ वरारोहायै	नमः	ॐ हरिवल्लभायै	नमः
ॐ शारङ्गिण्यै	नमः	ॐ देवदेविकायै	नमः
ॐ लोकसुन्दर्यै	नमः	ॐ महालक्ष्म्यै	नमः
ॐ श्रियै	नमः	ॐ पद्मायै	नमः
ॐ शान्तायै	नमः	ॐ व्योमपदाश्रितायै	नमः
ॐ नित्यशुद्धायै	नमः	ॐ परमानन्दरूपिण्यै	नमः
ॐ नित्यपुष्टायै	नमः	ॐ नित्यतृप्तायै	नमः
ॐ निर्विकारायै	नमः	ॐ अब्जसम्भवायै	नमः
ॐ उन्निद्रपद्माक्ष्यै	नमः	ॐ विष्णुवक्षस्थितायै	नमः
ॐ पद्मालयायै	नमः	ॐ पद्मकरायै	नमः
ॐ पद्ममुख्यै	नमः	ॐ पद्मनाभप्रियायै	नमः
ॐ सिद्ध्यै	नमः	ॐ स्वधायै	नमः
ॐ स्वाहायै	नमः	ॐ सुधायै	नमः
ॐ लोकपावन्यै	नमः	ॐ सन्ध्यायै	नमः
ॐ प्रभायै	नमः	ॐ भूत्यै	नमः
ॐ मेधायै	नमः	ॐ श्रद्धायै	नमः

ॐ सरस्वत्यै	नमः	ॐ यज्ञविद्यायै	नमः
ॐ महाविद्यायै	नमः	ॐ गुप्तविद्यायै	नमः
ॐ आत्मविद्यायै	नमः	ॐ विमुक्तिफलदायिन्यै	नमः
ॐ हिरण्यवर्णायै	नमः	ॐ हरिण्यै	नमः
ॐ सुवर्णरजतस्रजायै	नमः	ॐ चन्द्रायै	नमः
ॐ हिरणमयै	नमः	ॐ आर्द्रायै	नमः
ॐ ज्वलन्त्यै	नमः	ॐ तृप्तायै	नमः
ॐ तर्पयन्त्यै	नमः	ॐ पद्मस्थितायै	नमः
ॐ पद्मवर्णायै	नमः	ॐ प्रभासायै	नमः
ॐ देवजुष्टायै	नमः	ॐ उदारायै	नमः
ॐ पद्मनेम्यै	नमः	ॐ आदित्यवर्णायै	नमः
ॐ गन्धद्वारायै	नमः	ॐ दुराधर्षायै	नमः
ॐ नित्यपुष्टायै	नमः	ॐ करीषिण्यै	नमः
ॐ सर्वभतेश्वर्यै	नमः	ॐ पुष्करिण्यै	नमः
ॐ पुष्ट्यै	नमः	ॐ मङ्गलायै	नमः
ॐ पद्ममालिन्यै	नमः	ॐ हिरणमयै	नमः
ॐ सरोजहस्तायै	नमः	ॐ भगवत्यै	नमः
ॐ हरिवल्लभायै	नमः	ॐ त्रिभुवनभूतिकर्यै	नमः
ॐ विष्णुपत्न्यै	नमः	ॐ इच्छाशक्त्यै	नमः
ॐ ज्ञानशक्त्यै	नमः	ॐ ह्लादिन्यै	नमः
ॐ सद्रूपायै	नमः	ॐ सुप्रतिष्ठितायै	नमः
ॐ अमृतसम्भवायै	नमः	ॐ तमोनुदायै	नमः
ॐ सुमालिन्यै	नमः	ॐ अप्रमेयायै	नमः
ॐ अवदातायै	नमः	ॐ विद्यायै	नमः

ॐ ज्योतिष्मत्यै नमः
ॐ विशालायै नमः
ॐ भूतिदायै नमः
ॐ सहाशक्त्यै नमः
ॐ सुखावहायै नमः
ॐ भद्रकाल्यै नमः
ॐ ज्वालामुख्यै नमः
ॐ चतुर्वर्गफलदायै नमः
ॐ भव्यायै नमः
ॐ मनोजवायै नमः
ॐ महाश्वेतायै नमः
ॐ सर्वकामप्रदायै नमः
ॐ विल्वनिलयायै नमः
ॐ चतुर्भुजायै नमः
ॐ तेजोवत्यै नमः
ॐ सर्वमङ्गलमाङ्गल्यै नमः
ॐ श्रीदेव्यै नमः
ॐ नीलादेव्यै नमः
ॐ श्रीरङ्गनायक्यै नमः
ॐ अस्मत्परमगुरुभ्यो नमः
ॐ श्रीमते रामानुजाय नमः
ॐ श्रीमद्यामुनमुनये नमः
ॐ श्रीपुण्डरीकाक्षाय नमः
ॐ श्रीमते शठकोपाय नमः

ॐ अमृतसहोदर्यै नमः
ॐ कल्याण्यै नमः
ॐ सुमत्यै नमः
ॐ सङ्कल्पसिद्धायै नमः
ॐ कामदोग्ध्यै नमः
ॐ क्षीराब्धिजायै नमः
ॐ सदानन्दायै नमः
ॐ भक्तार्तिनाशिन्यै नमः
ॐ भवसन्तापहारिण्यै नमः
ॐ पुण्यनिलयायै नमः
ॐ सुरमोहिन्यै नमः
ॐ धनधान्यकर्यै नम
ॐ दारिद्र्यनाशिन्यै नमः
ॐ सर्वोपद्रवनाशिन्यै नमः
ॐ सुवर्णकारिण्यै नमः
ॐ श्रीमहालक्ष्म्यै नमः
ॐ भूदेव्यै नमः
ॐ गोदादेव्यै नमः
ॐ अस्मद्गुरुभ्यो नमः
ॐ अस्मत्सर्वगुरुभ्यो नमः
ॐ श्रीपरांकुशदासाय नमः
ॐ श्रीराममिश्राय नमः
ॐ श्रीमन्नाथमुनये नमः
ॐ श्रीमते विष्वक्सेनाय नमः

ॐ श्रियै नमः ॐ श्रीधराय नमः
ॐ समस्तपरिवारविशिष्टाय ॐ श्रीमते नारायणाय नमः

ॐ नृत्यवाद्यादिगीतादि पुराणपठनादिभिः ।
यथोपचारैः सकलैः सन्तुष्टो भव माधव ॥

इति पुष्पतुलस्यादिभिः समर्च्य कर्पूरेण नीराजयेत् ।

ॐ श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवैकुण्ठनिवासाय श्रीनिवासाय मङ्गलम् ॥

जयतु जयतु देवो देवकीनन्दनाऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥

इति नीराजनं कृत्वा साष्टाङ्गं प्रणम्य होमं कुर्यात् ॥

❖होमविधिः❖

ततो हवनपद्धतिं गृहीत्वा कर्मपात्रविधानादारभ्य पूर्वाङ्गहोमं परिसमाप्य मध्यमहोमं कुर्यात् । तद्यथा-नारायणाष्टाक्षरेण सर्पिषा-ष्टोत्तरशताहुतीर्हुत्वा वास्तुसूक्तेन चरुणा हुत्वा पुरुषसूक्तेन घृताक्तेन पायसेनाहुतीर्जुहुयात् । एवं विष्णुसूक्तनारायणसूक्ताभ्यां घृतसर्कराक्तैः तिलयवतण्डुलैर्जुहुयात् केवलेनाज्येनाक्तविल्वफलैः श्रीसूक्तेन जुहुयात् । ततो नारायणष्टाक्षर वासुदेवद्वादशाक्षरविष्णुषडक्षररामषडक्षरमन्त्रैः प्रत्येकमष्टोत्तरशताहुतीर्हुत्वा केशवादिचतुर्विंशतिनामभिर्हुत्वा वैकुण्ठ पार्षदनामभिर्जुहुयात् । ततो हवनपद्धत्युक्तप्रकारेण सर्वाण्यावश्यककर्माणि परिसमाप्य नारायणबलिं कुर्यात् ॥

❁❁❁

❖ नारायणबलिः ❖

अथाचार्यो होमाग्नेरुत्तरतो दक्षिणोत्तरक्रमेण लंबायमानां वेदीं निर्माय तत्र स्वर्णशलाकया वा कुशमूलेन प्राक्-प्रतीच्यक्रमेण चतुर्विंशतिरेखाः समुल्लिख्य तत्र रेखाषु द्वे द्वे कुशखण्डे पूर्वाग्रे स्थापयित्वा केशवादिचतुर्विंशतिव्यूहान् दक्षिणोत्तर क्रमेणावाह्य पूजयेत् ।

अद्य पूर्वोच्चारितसंकल्पसिद्धिरस्तु अमुकगोत्रस्यामुकनाम्नो दिवङ्गतस्य वैकुण्ठोत्सवाङ्गभूतनारायणबलिकर्मणि श्र्यादिसहितान् केशवादिचतुर्विंशतिव्यूहानावाह्य यथा लब्धोपचारैः पूजयिष्ये ।

१, ॐ भूर्भुवः स्वः श्रीसहिताय केशवाय नमः श्रीसहितं केशवमावाहयामि स्थापयामि पूजयामि ।

२, ॐ भूर्भुवः स्वः लक्ष्मीसहिताय नारायणाय नमो लक्ष्मीसहितं नारायणमावाहयामि स्थापयामि पूजयामि ।

३, ॐ भूर्भुवः स्वः कमलासहिताय माधवाय नमः कमलासहितं माधवमावाहयामि स्थापयामि पूजयामि ।

४, ॐ भूर्भुवः स्वः पद्मासहिताय गोविन्दाय नमः पद्मासहितं गोविन्दमावाहयामि स्थापयामि पूजयामि ।

५, ॐ भूर्भुवः स्वः पद्मिनीसहिताय विष्णवे नमः पद्मिनीसहितं विष्णुमावाहयामि स्थापयामि पूजयामि ।

६, ॐ भूर्भुवःस्वः कमलालयासहिताय मधुसूदनाय नमः कमलालयासहितं मधुसूदनमावाहयामि स्थापयामि पूजयामि ।

७, ॐ भूर्भुवः स्वः रमासहिताय त्रिविक्रमाय नम रमा-

माता–अमुकगोत्राया अमुकनाम्न्या दिवङ्गताया वैकुण्ठोत्सवाङ्गभूतनारायणबलिकर्मणि श्र्यादिसहितान् केशवादिचतुर्विंशतिव्यूहानावाह्य यथालब्धोपचारैः पूजयिष्ये ।

सहितं त्रिविक्रममावाहयामि स्थापयामि पूजयामि ।

८, ॐ भूर्भुवः स्वः वृषाकपिसहिताय वामनाय नमो वृषाकपि-सहितं वामनमावाहयामि स्थापयामि पूजयामि ।

९, ॐ भूर्भुवः स्वः धन्यासहिताय श्रीधराय नमः धन्या-सहितं श्रीधरमावाहयामि स्थापयामि पूजयामि ।

१०, ॐ भूर्भुवः स्वः वृत्तिसहिताय हृषीकेशाय नमो वृत्तिसहितं हृषीकेशमावाहयामि स्थापयामि पूजयामि ।

११, ॐ भूर्भुवः स्वः यज्ञासहिताय पद्मनाभाय नमो यज्ञा-सहितं पद्मनाभमावाहयामि स्थापयामि पूजयामि ।

१२, ॐ भूर्भुवः स्वः इन्दिरासहिताय दामोदराय नम इन्दिरा-सहितं दामोदरमावाहयामि स्थापयामि पूजयामि ।

१३, ॐ भूर्भुवः स्वः हरिणीसहिताय वासुदेवाय नमः हरिणी-सहितं वासुदेवमावाहयामि स्थापयामि पूजयामि ।

१४,ॐ भूर्भुवः स्वःहिरण्यासहिताय सङ्कर्षणाय नमःहिरण्या-सहितं सङ्कर्षणमावाहयामि स्थापयामि पूजयामि ।

१५, ॐ भूर्भुवः स्वः सत्यासहिताय प्रद्युम्नाय नमः सत्या-सहितं प्रद्युम्नमावाहयामि स्थापयामि पूजयामि ।

१६, ॐ भूर्भुवः स्वः नित्यासहितायानिरुद्धाय नमो नित्या-सहितमनिरुद्धमावाहयामि स्थापयामि पूजयामि ।

१७, ॐ भूर्भुवः स्वः नन्दासहिताय पुरुषोत्तमाय नमः नन्दा-सहितं पुरुषोत्तममावाहयामि स्थापयामि पूजयामि ।

१८, ॐ भूर्भुवः स्वः त्रयीसहितायाधोक्षजाय नमः त्रयी-सहितमधोक्षजमावाहयामि स्थापयामि पूजयामि ।

१९, ॐ भूर्भुवः स्वः सुखासहिताय नारसिंहाय नमः सुखा-सहितं नारसिंहमावाहयामि स्थापयामि पूजयामि ।

२०, ॐ भूर्भुव :स्वः सुगन्धासहितायाच्युताय नमः सुगन्धा-सहितमच्युतमावाहयामि स्थापयामि पूजयामि ॥

२१, ॐ भूर्भुवः स्वः सुन्दरीसहिताय जनार्दनाय नमो सुन्दरी-सहितं जनार्दनमावाहयामि स्थापयामि पूजयामि ।

२२, ॐ भूर्भुवः स्वः विद्यासहिताय उपेन्द्राय नमः विद्या-सहितमुपेन्द्रावाहयामि स्थापयामि पूजयामि ।

२३, ॐ भूर्भुवः स्वः सुशीलासहिताय हरये नमः सुशीला-सहितं हरिमावाहयामि स्थापयामि पूजयामि ।

२४,ॐ भूर्भुवः स्वःसुलक्षणासहिताय श्रीकृष्णाय नमो सुलक्षणा-सहितं श्रीकृष्णमावाहयामि स्थापयामि पूजयामि ।

तत आसनार्घ्यपाद्याचमनस्नानवस्त्रयज्ञोपवीतगन्धपुष्पपुष्पमालिकाधूप-दीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणानमस्कारैः संपूज्य प्रणमेत् ।

ततः पायसेन घृततिलयुक्तेन विल्वामलकसदृशान् सप्तविंशति-पिण्डान्निर्माय तेष्वेकमादाय वेद्यां कुशोपरि केशवस्थाने सव्यसन् पूर्वाभिमुखो भूत्वा दद्यात् ।

१, अमुकगोत्रस्यामुकनाम्नो दिवङ्गतस्य वैकुण्ठोत्सवाङ्गभूतना-रायणबलिकर्मणि ॐ भूर्भुवःस्वः श्रीसहिताय केशवाय नमःस्वाहा ।

टिप्पणी– भोजयेत् पायसान्नेन शर्कराज्ययुतेन वै ।

विविधैरन्नपानाद्यैर्वासोलंकरणैः शुभैः ।

भोजयित्वा ततः विप्रान् यथा शक्त्या विनिक्षिपेत् ।

प्रागग्रेषु च दर्भेषु उपवीतः समाहितः ।

नामभिः केशवाद्यैश्च दद्यात् पिण्डान् पृथक् पृथक् । ततः

नित्याँश्च मुक्ताँश्च नामलिख्यैव निक्षिपेत् । ब.स्मृ.अ.६ ३८८ ।३८९ ।३९० ।

एवमग्रेऽपि क्रमेण दद्यात् ।

२, ॐ भूर्भुवः स्वः लक्ष्मीसहिताय नारायणाय नमः स्वाहा ।

३, ॐ भूर्भुवः स्वः कमलासहिताय माधवाय नमः स्वाहा ।

४, ॐ भूर्भुवः स्वः पद्मासहिताय गोविन्दाय नमः स्वाहा ।

५, ॐ भूर्भुवः स्वः पद्मिनीसहिताय विष्णावे नमः स्वाहा ।

६, ॐ भूर्भुवः स्वः कमलालयासहिताय मधुसूदनाय नमः स्वाहा ।

७, ॐ भूर्भुवः स्वः रमासहिताय त्रिविक्रमाय नमः स्वाहा ।

८, ॐ भूर्भुवः स्वः वृषाकपिसहिताय वामनाय नमः स्वाहा ।

९, ॐ भूर्भुवः स्वः धन्यासहिताय श्रीधराय नमः स्वाहा ।

१०, ॐ भूर्भुवः स्वः वृत्तिसहिताय हृषीकेशाय नमः स्वाहा ।

११, ॐ भूर्भुवः स्वः यज्ञासहिताय पद्मनाभाय नमः स्वाहा ।

१२, ॐ भूर्भुवः स्वः इन्दिरासहिताय दामोदराय नमः स्वाहा ।

१३, ॐ भूर्भुवः स्वः हरिणीसहिताय वासुदेवाय नमः स्वाहा ।

१४, ॐ भूर्भुवः स्वः हिरण्यासहिताय संकर्षणाय नमः स्वाहा ।

१५, ॐ भूर्भुवः स्वः सत्यासहिताय प्रद्युम्नाय नमः स्वाहा ।

१६, ॐ भूर्भुवः स्वः नित्यासहितायानिरुद्धाय नमः स्वाहा ।

१७, ॐ भूर्भुवः स्वः नन्दासहिताय पुरुषोत्तमाय नमः स्वाहा ।

१८, ॐ भूर्भुवः स्वः त्रयीसहितायाधोक्षजाय नमः स्वाहा ।

१९, ॐ भूर्भुवः स्वः सुखासहिताय नारसिंहाय नमः स्वाहा ।

२०, ॐ भूर्भुवः स्वः सुगन्धासहितायाच्युताय नमः स्वाहा ।

२१, ॐ भूर्भुवः स्वः सुन्दरीसहिताय जनार्दनाय नमः स्वाहा ।

२२, ॐ भूर्भुवः स्वः विद्यासहितायोपेन्द्राय नमः स्वाहा ।

माता–अमुकगोत्राया अमुकनाम्न्या दिवङ्गताया वैकुण्ठोत्सवाङ्गभूतनारायणबलिकर्मणि ॐ भूर्भुवः स्वः श्रीसहिताय केशवाय नमः स्वाहा ।

२३,ॐ भूर्भुवः स्वः सुशीलासहिताय हरये नमः स्वाहा ।
२४ॐ भूर्भुवः स्वः सुलक्षणासहिताय श्रीकृष्णाय नमः स्वाहा ।

एवं क्रमेण चतुर्विंशतिपिण्डान् दत्वा पिण्डान् चन्दनपुष्पतुलसीधूपदीपैः संपूज्य पुरुषसूक्तेन पयसा स्नाप्य नूतनकौशेयवाससाच्छाद्य (पृष्ट १०२) महापुरुषविद्ययोपतिष्ठेत् । तत एतद् वेद्यादक्षिणतो दक्षिणोत्तरक्रमेण द्वादशाङ्गुलविस्तारां चतुरङ्गुलायतां वेदीं निर्माय तत्र तिस्रोरेखाः कृत्वा रेखासु प्रत्येकं कुशद्वयं निधाय तत्र–

ॐ नित्येभ्यो नमः नित्यानावाहयामि स्थापयामि पूजयामि ।
ॐ मुक्तेभ्यो नमः मुक्तानावाहयामि स्थापयामि पूजयामि ।

ॐ अमुकगोत्रोत्पन्नायामुकप्रवरान्वितायामुकनाम्ने दिवंगताय श्रीवैष्णवाय नमोऽमुकगोत्रोत्त्पन्नममुकप्रवरान्वितममुकनामानं दिवंगतं श्रीवैष्णवमावाहयामि स्थापयामि पूजयामि ॥

पूर्वोक्त प्रकारेण सर्वोपचारैः सम्पूज्य वेद्यां कुशोपरि पिण्डत्रयं दद्यात् ।
ॐ नित्येभ्यो नमः स्वाहा । इति नित्यानां स्थान एकं पिण्डं दद्यात् ।
ॐ मुक्तेभ्यो नमः स्वाहा । इति मुक्तानां स्थान एकं पिण्डं दद्यात् ।

ॐ अमुकगोत्रोत्त्पन्नायामुकप्रवरान्वितायामुकनाम्ने दिवंगताय श्रीवैष्णवाय नमः स्वाहा । इति दिवंगतस्य स्थान एकं पिण्डं दद्यात् ।

एवं दत्वा चन्दनपुष्पतुलसीधूपदीपैः सम्पूज्य गोदुग्धेन पिण्डान् स्नापयेत्– ॐ पयःपृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्प्रदिशः सन्तु मह्यम् । ततो नववस्त्रेणाच्छाद्य गोदुग्धमिश्रितोदकेन

माता– ॐ अमुकगोत्राया अमुकनाम्नै दिवंगतायै श्रीवैष्णवायै नम अमुकगोत्राममुकनाम्नीं दिवङ्गतां श्रीवैष्णवामावाहयामि स्थापयामि पूजयामि । ॐ अमुकगोत्राया अमुकनाम्नै दिवंगतायै श्रीवैष्णवायै नमःस्वाहा ।

सश्रीकान् केशवादिचतुर्विंशतिव्यूहान् पूर्वं संतर्प्यवैकुण्ठपार्षदान् तर्पयेत् ।

ॐ आधारशक्तिं तर्पयामि ॐ प्रकृतिं तर्पयामि

ॐ अखिलजगदाधारं कूर्मरूपिणं नारायणं तर्पयामि

ॐ अनन्तं नागराजं तर्पयामि ॐ भूमिं तर्पयामि

ॐ वैकुण्ठं दिव्यलोकं तर्पयामि ॐ वैकुण्ठं दिव्यजनपदं०

ॐ वैकुण्ठं दिव्यनगरं तर्पयामि ॐ वैकुण्ठं दिव्यविमानं०

ॐ आनन्दमयं दिव्यमण्डपरत्नं तर्पयामि

ॐ आस्तरणारूपिणं अनन्तं नागराजं तर्पयामि

ॐ धर्मम्पीठपादं तर्पयामि ॐ ज्ञानं पीठपादं तर्पया०

ॐ वैराग्यं पीठपादं तर्पयामि ॐ ऐश्वर्यं पीठपादंतर्पय०

ॐ ऋग्वेदं पीठवाहकं तर्पयामि ॐ यजुर्वेदं पीठवाहकं ०

ॐ सामवेदं पीठवाहकं तर्पयामि ॐ अथर्ववेदं पीठवाहकं०

ॐ अधर्मं पीठगात्रं तर्पयामि ॐ अज्ञानं पीठगात्रं तर्प०

ॐ अवैराग्यं पीठगात्रं तर्पयामि ॐ अनैश्वर्यं पीठगात्रं ०

ॐ एभिःपरिछिन्नतनुं सदसदात्मकं पीठभूतं नागराजं तर्पयामि

ॐ पीठस्योपर्यष्टदलपद्मं तर्पयामि

ॐ सोममण्डलं तर्पयामि ॐ सूर्यमण्डलं तर्पयामि

ॐ वह्निमण्डलं तर्पयामि ॐ विमलां चामरकरां ०

ॐ क्रियां चामरकरां तर्पयामि ॐ उत्कर्षिणीं चामरकरां०

ॐ ज्ञानां चामरकरां तर्पयामि ॐ प्रह्वीं चामरकरां ०

ॐ ईशानां चामरकरांतर्पयामि ॐ सत्यां चामरकरां तर्प०

ॐ योगां चामरकरां तर्पयामि ॐ अनुग्रहां चामरकरां ०

ॐ जगत्प्रकृतिं चामरकरां० ॐ सहस्रशीर्षाणमनन्तं ०

ॐ पुरतः पादपीठं तर्पयामि ॐ भगवद्पादुके ०

ॐ अस्मद्गुरून् तर्पयामि ॐ अस्मत्परमगुरून् तर्पयामि
ॐ अस्मत्सर्वगुरून् तर्पयामि ॐ श्रीमन्तं रामानुजं तर्पयामि
ॐ श्रीपराङ्कुशदासं तर्पयामि ॐ श्रीमद्यामुनमुनिं तर्पयामि
ॐ श्रीराममिश्रं तर्पयामि ॐ श्रीपुण्डरीकाक्षं तर्पयामि
ॐ श्रीमन्तं नाथमुनिं तर्पयामि ॐ श्रीमन्तं शठकोपं तर्पयामि
ॐ श्रीमन्तं विष्वक्सेनंतर्पयामि ॐ श्रियं तर्पयामि
ॐ श्रीधरं तर्पयामि ॐ सुदर्शनं हेतिराजं तर्पयामि
ॐ पाञ्चजन्यं शंखाधिपतिं० ॐ कौमोदकीं गदाधिपतिं ०
ॐ नन्दकं खड्गाधिपतिं ० ॐ शार्ङ्गं चापाधिपतिं तर्पयामि
ॐ श्रीवत्सं श्रीनिवासं ० ॐ कौस्तुभं सर्वरत्नाधिपतिं ०
ॐ वैजयन्तीं वनमालां तर्प० ॐ ह्रीं पुष्टिं तर्पयामि
ॐ ऐं सरस्वतीं तर्पयामि ॐ द्रां निद्रां तर्पयामि
ॐ क्लीं कान्तिं तर्पयामि ॐ कं पृथिवीं तर्पयामि
ॐ गं गरुडं तर्पयामि ॐ किरीटं मुकुटाधिपतिं ०
ॐ मकराकृतिकुण्डले तर्पयामि ॐ कण्ठिकाभरणं तर्पयामि
ॐ किरीटमालां आपीडात्मिका० ॐ श्रीमत्तुलसीं तर्पयामि
ॐ हारं सर्वाभरणाधिपतिं तर्पयामि
ॐ काञ्चीगुणोज्वलं पीताम्बरं तर्पयामि
ॐ सर्वाणि भगवद्भूषणानि तर्पयामि
ॐ सर्वान् भगवद्दिव्यायुधान् तर्पयामि
ॐ सर्वाः भगवत्पादसंवाहिनीः तर्पयामि
ॐ सर्वान् भगवत्परिकरान् तर्पयामि
ॐ अनन्तं तर्पयामि ॐ विष्वक्सेनं तर्पयामि
ॐ सूत्रवतीं तर्पयामि ॐ जं जयत्सेनं तर्पयामि

ॐ गं गजाननं तर्पयामि ॐ हं हयाननं तर्पयामि

ॐ कं कालप्रकृतिसंज्ञं तर्पयामि ॐ सर्वान् विष्वक्सेनपरिजनान्०

ॐ चण्डं तर्पयामि ॐ प्रचण्डं तर्पयामि

ॐ भद्रं तर्पयामि ॐ सुभद्रं तर्पयामि

ॐ जयं तर्पयामि ॐ विजयं तर्पयामि

ॐ धातारं तर्पयामि ॐ विधातारं तर्पयामि

ॐ कुमुदं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ कुमुदाक्षं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ पुण्डरीकं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ वामनं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ शङ्कुकर्णं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ सर्पनेत्रं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ सुमुखं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ सुप्रतिष्ठितं सायुधं सपरिवारं सशक्तिकं तर्पयामि

ॐ सर्वान् भगवद्गणाधिपतीन् तर्पयामि

ॐ नित्यान् तर्पयामि ॐ मुक्तान् तर्पयामि

ॐ दिव्यान् तर्पयामि

ॐ समस्तपरिवारविशिष्टं श्रीमन्तं नारायणं तर्पयामि

ॐ अस्मत्पितृपितामहप्रपितामहात्मकान् सर्वपरिवारविशिष्टा-
ननिरुद्धप्रद्युम्नसंकर्षणवासुदेवान् तर्पयामि ।

ततो विशेषार्घ्यं दद्यात् ।

शंखे कृत्वा तु पानीयं सपयं कुसुमान्वितम् ।
विशेषार्घ्यं ततो दद्याद् यजमानः समाहितः ॥

जानुभ्यामवनिं गत्वा मन्त्रैः सम्प्रार्थयेत्ततः ।
नारायणदयासिन्धो जगन्नाथ जनार्दन ॥
मामुद्धर महाविष्णो संसाराब्धेः सुदुस्तरात् ।
सप्तजन्मकृतं पापं सञ्चितं मम पूर्वजैः ॥
अनेनार्घ्यप्रदानेन सकलं तत्प्रणस्य तु ।
मुक्तिं प्रयान्तु पितरो निरयादति दारुणात् ॥
वियोनिञ्च गता ये वै पापं कृत्वा सुदारुणम् ।
येऽतीता ये भविष्याश्च सम्प्रजाता कुले मम ॥
मया दत्तार्घ्यदानेन तान्समुद्धर माधव ।

इत्यर्घ्यं दत्वा कर्पूरादिना नीराज्य प्रार्थयेत् ।

यज्जन्मनः प्रभृति मोहवशं गतेन
नानापराधशतमाचरितं मया ते ।
अन्तर्बहिश्च सकलं तव पश्यतोऽपि
क्षन्तुं त्वमर्हसि हरे करुणावशेन ॥
स त्वं प्रसीद भगवन् कुरुमय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम् ।
संसारसागरनिमग्नमनन्तदीन-
मुद्धर्तुमर्हसि हरे करुणा वसेन ॥

इति प्रणम्य पार्षदेभ्यो बलिं दद्यात् । पायसपिण्डं पुटके निधाय दीपं प्रज्वाल्य-

ॐ आद्याश्च कर्मजाश्चैव ये भूताः प्राग् दिशि स्थिताः ।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिमुत्तमम् ॥

इति पूर्वदिशि बलिं प्रदाय-

ॐ वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।
भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु ते त्वमुम् ॥

इति दक्षिणदिशि बलिं प्रदाय-

ॐ विनायकाः क्षेत्रपाला ये चान्ये बलिकाङ्क्षिणः

पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम् ॥

इति पश्चिम दिशि बलिं प्रदाय-

ॐ कुमुदाद्याश्च ये भूताः सर्वतोदिक्षु संस्थिताः ।

आगच्छन्तु च ते सर्वे गृह्णन्तु बलिमुत्तमम् ॥

इत्युत्तरे बलिं प्रदायामन्त्रितचतुर्विंशतिव्यूहरूपिणो ब्राह्मणाँश्च चन्दन-पुष्पमालाभिरलङ्कृत्य स्वमलङ्कृत्य सर्वेषां हस्तेषु सशिखानीक्षुदण्डान् दत्वा तैः सह यागभूमिं देवागारं च परिक्रामेत् ।

परिक्रामन्तश्च सर्वे यथायथं पञ्चसूक्तगद्यत्रयजितन्तेस्तोत्रेशावास्योपनिषत्स्तोत्ररत्नवैकुण्ठस्तवादीन् पठेयुः यदि च नगरपरिक्रमणं स्यात्तर्हि मार्गस्थैः तेषां गन्धपुष्पवस्त्रदक्षिणादिभिर्यथाशक्ति पूजा कर्तव्या । एवं ग्रामं मन्दिरं यागभूमिँ च परिक्रम्य पुनर्यागभूमिमागत्य नीराजनं विधाय नारायणोपनिषत्पठनीक्षुदण्डान् भञ्जयेत् ।

❖नारायणोपनिषत्❖

ॐ अथ पुरुषो ह वै नारायणो अकामयत । प्रजाःसृजेयेति । नायणात् प्राणो जायते । मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योति-रापः पृथिवीविश्वस्यधारिणी । नारायणात्ब्रह्मा जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात्प्रजापतिः प्रजायते नारायणाद्द्वादशादित्यारुद्रावसवः सर्वाणि छन्दाँसि नारायणादेव समुत्पद्यन्ते । नारायणात् प्रवर्तन्ते । नारायणे प्रलीयन्ते एतदृग्वेदशि-रोऽधीते ॥

अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च ना-

रायणः । विदिशश्च नारायणः । ऊर्ध्वञ्च नारायणः । अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम् । निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति । एतद्यजुर्वेदशिरोऽधीते ।

ॐ इत्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणाय इत्युपरिष्टात् । ॐ इत्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । योहवै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवः सर्वमायुरेति । विन्दते प्राजापत्यं रायस्पोषं गौपत्यं ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति एतत् सामवेदशिरोऽधीते ॥।

ॐ प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम् । अकार उकारो मकार इति । तानेकधासमभरत्तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति । तदिदं पुण्डरीकं विज्ञानघनं तस्मात् तडिदाभमात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः । ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युत इति । सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्रह्मों । एतदथर्वशिरोऽधीते ॥

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । सायं प्रातरधीयानः पापोऽपापो भवति । मध्यन्दिनमादित्याभिमुखोऽधीयानः । सद्यः पञ्चमहापातकोपपातकेभ्यः प्रमुच्यते ।सर्ववेदपारायणपुण्यं लभते ।नारायणसायुज्यमवाप्नोति । श्रीमन्नारायणसायुज्यमवाप्नोति । य एवं वेद इत्युपनिषत् ।

सहनाववतु । सह नौ भुनक्तु । सहवीर्यङ्करवावहै । तेजस्विना-वधीतमस्तु । माविद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

इक्षुदण्डान् द्विधा विभज्य शरणागति गद्येन भगवन्तं प्रणमेत् । तद्यथा-यजमानादयः साष्टाङ्गदण्डवतं कुर्युराचार्यः शरणागतिगद्यम्पठेत् ।

❖ शरणागतिगद्यम् ❖

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमहर्निशम् ॥

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो
योऽसौ पुरासमजनिष्टजगद्धितार्थम् ।
प्राच्यं प्रकाशयतु नः परमं रहस्यं
संवाद एष शरणागतिमन्त्रसारः ।

ॐ भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्य शीलाद्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणां पद्मवनालयां भग-वतीं श्रियं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीमखिल-जगन्मातरमस्मन्मातरमशरण्यशरण्यामनन्यशरणःशरणमहं प्रपद्ये ॥

पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिक पर भक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजना-नवधिकातिशयप्रियभगवदनुभवजनितानवधिकातिशयप्रीतिकारिता-शेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्त्यपेक्षया पारमार्थिकी भगवच्च-रणारविन्दशरणागतिर्यथावस्थिताविरतास्तु मे ।

अस्तु ते तयैव सर्वं सम्पत्स्यते ।

अखिलहेयप्रत्यनीक कल्याणैकतान स्वेतरसमस्तवस्तुविलक्षणा-नन्तज्ञानानन्दैकस्वरूप ।

स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्वल्यसौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूप।

स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः सौशील्यवात्सल्यमार्दवार्जवसौहार्दसौगन्ध्यसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यचातुर्य्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसङ्कल्पकृतित्वकृतज्ञताद्यसङ्ख्येयकल्याणगुणगणौघमहार्णव।

स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यनिरतिशयसुगन्धनिरतिशयौज्वल्यकिरीटमकुट(मुकुट)चूडावतंसमक कुण्डलग्रैवेयकहारकेयूरकटकश्रीवत्सकौस्तुभ मुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुराद्यपरिमितदिव्यभूषण।

स्वानुरूपाचिन्त्यशक्तिशङ्खचक्रगदाशार्ङ्गाद्यसङ्ख्येयनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुध।

स्वाभिमतनित्यनिरवद्यानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासङ्ख्येयकल्याणगुणगणाश्रीवल्लभ। एवंभूत भूमिनीलानायक।

स्वच्छन्दानुवृत्ति(वर्ति)स्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरतिशयज्ञानक्रियैश्वर्याद्यनन्तगुणगणशेषशेषासनगरुडप्रमुखनानाविधानन्तपरिजनपरिचारिकापरिचरितचरणयुगल।

परमयोगिवाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्वाभिमतविविधविचित्रानन्तभोग्यभोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवानन्तपरिणामनित्यनिरवद्यनिरतिशयवैकुण्ठनाथ।

स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतैक स्वभावप्रकृतिपुरुषकालात्मकविविधविचित्रानन्तभोग्यभोक्तृवर्गभोगोपकरणभोगस्थानरूपनिखिलजगदुदयविभवलयलील।

सत्यकामसत्यसङ्कल्पपरब्रह्मभूतपुरुषोत्तममहाविभूते श्रीमन् नारायण वैकुण्ठनाथ । अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्य-महोदध । अनालोचितविशेषाशेषलोकशरण्य प्रणतार्तिहराश्रित वात्सल्यैक जलधे ।

अनवरतविदितनिखिलभूतजातयाथात्म्याशेषचराचरभूत नि-खिलनियमननिरताशेषचिदचिद्वस्तुशेषीभूत निखिलजगदाधाराखिल-जगत्स्वामिनस्मत्स्वामिन् सत्यकाम सत्यसङ्कल्प सकलेतरविलक्ष-णार्थिकल्पकापत्सख काकुत्स्थ श्रीमन्नारायणाशरण्यशरण्यानन्यश-रणः त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये ।

अत्र द्वयम् (द्वयमन्त्रानुसंधानं कर्तव्यम्) ।

पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून् ।
रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च ॥
सर्वधर्मांश्च सन्त्यज्य सर्वकामांश्च साक्षरान् ।
लोकविक्रान्तचरणौ शरणं ते व्रजं विभो ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
नत्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमस्वभावः ॥
तस्मात्प्रणम्य प्रणिधायकायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देवसोढुम् ॥

मनोवाक्कायैरनादिकालप्रवृत्तानन्ताकृत्यकरणकृत्याकरणभगव-दपचारभागवतापचारासह्यापचाररूप [illegible]धानन्तापचारानारब्ध-कार्याननारब्धकार्यान् कृतान् क्रियमाणान् करिष्यमाणांश्च सर्वानशेषतः क्षमस्व ।

अनादिकालप्रवृत्तं विपरीतज्ञानमात्मविषयं कृत्स्नजगद्विषयञ्चविपीरतवृत्तञ्चाशेषविषयमद्यापि वर्त्तमानं वर्तिष्यमाणञ्चसर्वं क्षमस्व ।

मदीयानादिकर्मप्रवाहप्रवृत्तां भगवत्स्वरूपतिरोधानकरीं विपरीतज्ञानजननीं स्वविषयायाश्च भोग्यबुद्धेर्जननीं देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण चावस्थितां दैवीं गुणमयीं मायां दासभूतः शरणागतोऽस्मि तवास्मि दास इति वक्तारं मां तारय ।

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः ॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमाङ्गतिम् ।
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥
इति श्लोकत्रयोदितज्ञानिनं मां कुरुष्व ।
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
भक्त्या त्वनन्यया शक्यः मद्भक्तिं लभते पराम् ॥
इति स्थानत्रयोदितपरभक्तियुक्तं मां कुरुष्व ।

परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवोहं तथाविध भगवदनुभव जनितानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भवानि ।

एवं भूतमत्कैङ्कर्यप्राप्त्युपायतयावक्लृप्तसमस्तवस्तुविहीनोऽप्यनन्ततद्विरोधिपापाक्रान्तोऽप्यनन्तमदपचारयुक्तोऽप्यनन्तमदीयापचारयुक्तोऽप्यनन्तासह्यापचारयुक्तोऽप्येतत्कार्यकारणभूतानादिविपरीतवासनाहङ्कारविमूढात्मस्वभावोऽप्येतदुभयकार्यकारणभूत-

अनादिविपरीतवासनासम्बद्धोऽप्येतदनुगुणप्रकृतिविशेषसम्बद्धोऽप्ये-तन्मूलाध्यात्मिकाधिभौत्तिकाधिदैविकसुखदुःखतद्धेतुतदितरोपेक्षणीय-विषयानुभवज्ञानसङ्कोचरूपमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकप-रभक्तिपरज्ञानपरमभक्तिविघ्नप्रतिहतोऽपि येन केनापि प्रकारेण द्वयवक्ता त्वम् ।

केवलं मदीययैव दयया निःशेषविनष्टसहेतुकमच्चरणार-विन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नोऽ मत्प्रसा-दाल्लब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरम-भक्तिर्मत्प्रसादादेवसाक्षात्कृतयथावस्थितमत्स्वरूपरूपगुणविभूति-लीलोपकरणविस्तारोऽपरोक्षसिद्धमन्नियाम्यतामद्दास्यैकरसात्म-स्वभावोमदेकानुभवोमद्दास्यैकप्रियः परिपूर्णानवरतनित्यविशदतमा-नन्यप्रयोजनमद्दास्यैकप्रियःपरिपूर्णानवरतनित्यविशदमानन्यप्रयोजना-नवधिकातिशयप्रियमदनुभवस्त्वं तथाविधमदनुभवजनितानवधिका-तिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्य-किङ्करो भव । एवम्भूतोसि ।

आध्यात्मिकाधिभौतिकाधिदैविकदुःखविघ्नगन्धरहितस्त्व द्वय-मर्थानुसन्धानेन सह सदैववक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व शरीरपातसमये तु केवलमदीययैव दययातिप्रबुद्धोमामेवावलोकयन-प्रच्युतपूर्वसंस्कारमनोरथो जीर्णमिववस्त्रं सुखेनैवेमां प्रकृतिं स्थूलसूक्ष्मरूपां विसृज्य तदानीमेव मत्प्रसादलब्धमच्चरणारविन्दयुगलैकान्तिकात्यन्तिक परभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोज-नानवधिकातिशयप्रियमदनुभवजनितानवधिकातिशयप्रीतिकारिताशेषा-वस्थोचिताशेषशेषतैकरतिरूपनित्यकिङ्करो भविष्यसि मा ते भूदत्र संशयः ।

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
रामो द्विर्नाभिभाषते ।
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्व पापेभ्यो मोक्षयिष्यामि माशुचः ॥

इति मयैव ह्युक्तम् । अतस्त्वं तत्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयं सुखमास्व ।

अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता ।
तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे ॥

इति श्रीभगवद्रामानुजविरचितं शरणागतिगद्यं समाप्तम् ॥

इत्यनेन गद्येन प्रणम्योत्थाय पुष्पाण्यादाय प्रार्थयेत् ।

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैस्स्तवै-
र्वेदैस्साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

इति पुष्पाञ्जलिं समर्प्य स्तोत्रैः स्तुवीरन् नृत्यगीतवाद्यादीनि च कारयेत् ।

वेदेतिहासादिपारायणनिवेदनम्

ॐ अस्य श्रीदेवदेवोत्तमस्य देवतासार्वभौमस्याखिलकोटि ब्रह्माण्डनायकस्य । ज्ञानशक्तिबलैश्वर्यवीर्यतेजशौशील्यवात्सल्यादि गुणगणौघ महार्णवस्य । विधिशिवसनकादिदेवगन्धर्वसिद्धयक्षकिन्नर नारदव्यासवाल्मीकपराशरादिब्रह्माण्डोदरवर्तिसकलसज्जनवृन्दैः संस्तुतस्य ।

पराङ्कुशपरकालनाथयामुनयतिवरादिदिव्यदेशिकवृन्दैः

समनुष्ठितमङ्गलाशासनस्य श्रीशेषशेषासनगरुडनित्यमुक्तादि-दिव्यसूरिवृन्दैः परिचरितयुगलचरणारविन्दस्य। अखिलजगदुदय विभव-लय लीलस्य जगत्कुटुम्बिनः जगद्रक्षणार्थमवतीर्णस्य श्रीभूनीलासमेतस्य अर्चास्वरूपिणः भगवतो नारायणस्वामिनः नित्याराधनसमाप्ति समये। (अथवा भगवतो नारायणस्वामिनो दिव्याज्ञया भगवतो बलेन भगवतो वीर्येण भगवदुपकरणेन भगवतः मुखकमलविकाशार्थं क्रियमाणैकाह्निक त्र्याह्निक पञ्चाह्निक वैकुण्ठोत्सवकर्मणोऽ-मुकदिनसंबन्धि प्रातकालिक माध्यान्नकालिक सायङ्कालिकारा-धनासमाप्ति समये वेदवेदान्तेतिहासधर्मशास्त्रकल्पसूत्रगृहसूत्र-कर्मसूत्रब्रह्मसूत्रपुराणगद्यपद्यादिस्तोत्रपाठक्षेत्रमहात्म्यरहस्यग्रन्थगीता-भाष्यश्रीभाष्यदिव्यप्रबन्धादीनवधारय तत्रादावृग्वेदप्रियग्वेदमवधारय। अरुल्लप्पाड ऋक्वेदम्–.......................... ॐ स्वस्ति।

एवं क्रमेण यजुर्वेदसामवेदाथर्ववेदोपनिषत् कल्पसूत्र गृहसूत्र कर्मसूत्र ब्रह्मसूत्र श्रीभाष्य श्रीरामायण श्रीमहाभारत विष्णुपुराण श्रीमद्भागवत पद्मपुराणादि गीताभाष्य गद्यत्रय सहस्रगीति क्षेत्रमहात्म्य प्रपन्नामृत स्तोत्ररत्न वैकुण्ठस्तवादिग्रन्थान् श्रावयेयुः। ततः दिव्यप्रबन्धेन नीराजनं विधाय प्रार्थना कर्तव्या।

ॐ श्रीदेवदेवोत्तम देवतासार्वभौमाखिलकोटिब्रह्माण्डनायक ज्ञानशक्तिबलैश्वर्यवीर्यतेजशौशील्यवात्सल्यादिगुणगणौघमहार्णव विधि-शिवसनकादिदेवगन्धर्वसिद्धयक्षकिन्नरनारदव्यासवाल्मीकपराशरादि ब्रह्माण्डोदरवर्ति सकलसज्जनवृन्दैः संस्तुत।

पराङ्कुशपरकालनाथयामुनयतिवरादिदिव्यदेशिकवृन्दैःसमनुष्ठित-मङ्गलाशासन श्रीशेषशेषासनगरुडनित्यमुक्तादिदिव्यसूरिवृन्दैःपरि-चरितचरणयुगलारविन्दाखिलजगदुदयविभवलयलील जगत्कुटुम्बिन्

जगद्रक्षणार्थमवतीर्णा श्रीभूनीलासमेतार्चास्वरूपिन् भगवन्नारायण स्वामिन् तव सन्निधौ तवैवदिव्याज्ञया क्रियमाणवैकुण्ठोत्सवकर्मणः प्रथमदिवसीय प्रातः कालिकसमाराधना समाप्तिभूयादिति पुरुषकारभूताः पञ्चकालपरायणाः श्रीमन्नारायणचरणारविन्दमकरन्दरसैकभोगा भगवद्दिव्याज्ञावशवर्तिनः तदीयोत्तमानवेज्याकर्मनिरताः श्रीवैष्णवा भवन्तो ब्रुवन्तु ।

ॐ शान्तिः शान्तिः शान्तिः ॥

एवं संप्रार्थ्य चतुर्विधान्नमयमहानैवेद्यं भगवते निवेद्य ततोऽनन्तगरुडविष्वक्सेनेभ्यो निवेद्य भगवन्तं नीराज्य तुलसीदलैर्पुष्पैश्च पुष्पाञ्जलिं समर्प्य तुलसीतीर्थप्रसादं वितीर्य स्वयमादाय प्रणम्य समागतदेवान्सम्पूज्य यथास्थानगमनाय विसर्जयेत् । हस्ते पीततण्डुलानादाय-

ॐ यान्तु देवगणाः सर्वे पूजामादायमामकीम् ।
इष्टकामप्रदानाय पुनरागमनाय च ॥
ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
एष ते यज्ञो यज्ञपते सह सूक्तवाकः सर्व वीरस्तं जुषस्व स्वाहा ।

इति तत्तद्देवावाहनस्थले निक्षिपेत् ।

ततः पूर्वं भगवदादिभ्यो संभावनां निवेद्याचार्याद्यृत्विग्भ्यः श्रीवैष्णवेभ्यः कन्याकुमारीभ्यश्च दद्यात् ।

❖ संभावनावितरणप्रकारः ❖

ॐ यद्वेदादौ स्वरः प्रोक्तो वेदान्तेषु प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥

ॐ श्रीदेवदेवोत्तमस्य देवतासार्वभौमस्याखिलकोटिब्रह्माण्डनायकस्य जगत्कुटुम्बिनो जगद्रक्षणार्थमवतीर्णस्यार्चास्वरूपिणः श्रीभूनीलासमेतस्याखिलजगदुदयविभवलयलीलस्य श्रीमन्नारायणस्वामिन-

इयं संभावना श्रीमन्नारायणस्वामिने नमः ॥

ॐ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥

ॐ श्रीदेवदेवदिव्यमहिष्या विधिशिवादिदेवनिकरमुनिमनुज-वन्दितायाः शौशील्यवात्सल्यादिगुणगणौघमहार्णवाया आकारत्रय संपन्नायाः पुरुषकारभूताया अकारणकरुणावरुणालयायाः श्रीमन्ना-रायणस्याभिमतानुरूपाया नित्यानपायिन्या अखिलजगन्मातुः श्रीमहा-लक्ष्म्या इयं संभावना श्रीदेवदेवदिव्यमहिष्यै भगवत्यै लक्ष्म्यै नमः ॥

ॐ श्रृण्वन्ति श्रोणाममृतस्य गोपां पुण्यामस्याऽउपश्रृणोमि वाचम् ।
महीं देवीं विष्णुपत्नीमजूर्याम् प्रतीचीमेना गुँ हविषा यजामः ॥

ॐ देवदेवोत्तमस्याकारणकरुणावरुणालयस्य जगद्रक्षणार्थम-वतीर्णस्य भगवतो वाराहस्य द्रंष्टाग्रविराजितायाः सकल देवमनुष्य-पशुपक्षीकीटपतङ्गादिधारणशीलाया अखिलजगन्मातुः श्रीभूदेव्या इयम् संभावना श्रीवाराहवल्लभायै श्रीभूदेव्यै नमः ॥

ॐ त्रेधा विष्णुरुरुगायो विचक्रमे महीं दिवं पृथिवीमन्तरिक्षम् ।
तच्छ्रोणैति श्रव इच्छमाना पुण्यश्लोकँ य्यजमानाय कृण्वती ॥

ॐ शौशिल्यवात्सल्यादि गुणगणविभूषितायाः सप्तवृषभजि-ल्लभ्याया देवदेवोत्तमनारायणवल्लभाया नृत्यवाद्यगानकुशलाया गोपाङ्गनाश्रयभूतायाः कुम्भगोपसुतायाः श्रीनीलादेव्या इयम् संभावना श्रीनारायणवल्लभायै श्रीनीलादेव्यै नमः ।

ॐ श्रियै जातश्रिय आनिर्याय श्रियं वयो जनितृभ्यो ददातु ।
श्रियं वसाना अमृतत्वमायन् भवन्ति सद्यस्समिधामितद्यून् ।

श्रीधन्विनव्यनगरचक्रवर्तिविष्णुचित्तार्यदिव्यदुहितायाः श्रीरङ्गनाथ स्वामिनः परमप्रियायाः श्रीवटदलशयनभगवच्चरणा-

रविन्दसेवारसपाननिष्ठायाः प्रपत्तिधर्मनिष्ठायाः श्रीगोदादेव्या इयं संभावना तुलसीवनजातायै गोदादेव्यै नमः ।

ॐ दह्रं विपाकं परवेश्मभूतं यत्पुण्डरीकं पुरमध्य सँस्थम् ।
तत्रापि दह्रं गगनं विशोकं तस्मिन् यदन्तस्तदुपासितव्यम् ॥

ॐ श्रीवैष्णवान्वयकुलपतीनां बकुलसुमनभूषणविभूषितानां द्राविडाम्नायप्रवर्तकाचार्याणां मातापितादिसर्वविधबन्धुभूतानामनन्त श्रीविभूषितानां प्रन्नजनकूटस्थानां श्रीशठकोपस्वामिनामियं संभावना श्रीशानुभवपुष्टेभ्यः श्रीशठकोपसूरिभ्यो नमः ॥

ॐ वेदान्तविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥

ॐ श्रीवेदान्तसारवेदान्तदीपवेदार्थसंग्रहगीताभाष्यश्रीभाष्य-नित्यग्रन्थगद्यत्रयादिग्रन्थकारकाणां श्रीवैष्णवमतस्थापकानां श्रुतिस्मृत्यादि सकल शास्त्रापार्थनिराकरणशीलानां विशिष्टाद्वैतदर्शनस्थापकानां श्री-रामानुजार्चायस्वामिनामियं संभावना यामुनाङ्गुलिमोचकेभ्यः श्रीभाष्यका-रस्वामिभ्यो मन्नाथेभ्यो नमः ॥

ॐ वेदान्तविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयश्शुद्धसत्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥

ॐ श्रीवचनभूषणमुमुक्षुपडितत्वत्रयादिरहस्यग्रन्थभाष्यकृतानां स्वावयवभूतैरष्टदिग्गजादिदेशिकैः प्रपत्तिधर्मप्रवर्धनशीलानाम् द्वय-मन्त्रोच्चारणकृतसंततस्फुरिताधराणां रम्यजामातृमुनीनामियं संभावना रङ्गेधाम्निसुखासीनेभ्यो यतीन्द्रप्रवणेभ्यो वरवरमुनिभ्यो नमः ॥

ॐ नकर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशु ॥
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयोविशन्ति ॥

ॐ श्रीमद्वेदमार्गप्रतिष्ठापनोभयवेदान्तप्रवर्तकाचार्याणां त्रिदण्ड-

लसत्कराणां काषायाम्बरविभूषितदिव्यकलेवराणामनन्तश्रीविभूषितानां धीरधुरन्धराणां जितकामक्रोधाद्यविद्यादोषगणानाममुकपरिव्राजकाचार्याणामियम् संभावनामुकजीयरस्वामिभ्यो नमः ॥

ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तुपारे सर्वाणि ।
रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते ॥

ॐ श्रीमदुभयवेदान्तप्रवर्तकाचार्याणां पञ्चकालपरायणानां श्रीमन्नारायणचरणारविन्दमकरन्दरसपाननिरतानामासेतुसीताचल पवित्रीकृतानां संसारसागरनिमग्नशिष्यदुर्गतिविनाशकानाममुकाचार्य स्वामिनामियम् संभावनामुकाचार्यस्वामिभ्यो नमः ॥

ॐ धातापुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते ॥

ॐ अमुकगोत्रोत्पन्नानाममुकाचार्यस्वामिनामियम् संभावनामुकाचार्यस्वामिभ्यो नमः ।

ततश्चामन्त्रितश्रीवैष्णवानां हस्तपादादिशुद्धिं विधायासनेषूपवेश्य गन्धपुष्पादिभिरभ्यर्च्य चतुर्विधान्नेन भोजयेत्। ततस्तान् तृप्तान् ज्ञात्वोत्तरापोशनं कारयित्वा ताम्बूलदक्षिणाः प्रदाय साञ्जलिः प्रार्थयेत्।

दातारो नोभिवर्द्धन्तां वेदाः सन्ततिरेव च
श्रद्धा च नो माव्यगमद्बहुदेयञ्च नोस्तु ।
अन्नञ्च नो बहुभवेदतिथीञ्च लभेमहि
याचितारश्च नः सन्तु मा च याचिष्मकञ्चन ॥

ततः श्रीवैष्णवापि युष्मच्छब्देन विपरिणमय्य पठित्वा आशीर्वादं दद्युः । दाता-
रो वोभिवर्द्धन्तां वेदाः सन्ततिरेव च
श्रद्धा च वो माव्यगमद्बहुदेयञ्च वोस्तु ।
अन्नञ्च वो बहुभवेदतिथीञ्च लभध्वम्

याचितारश्च वः सन्तु मा च याचध्वङ्कञ्चन ।

एवमाशीर्वादं गृहीत्वा ब्राह्मणानां विसर्जनं कृत्वा दीनानाथेभ्यो भोजनं दत्वा स्वबन्धुभिः सह स्वयं भुञ्जीत सकृद् भूक्त्वा भूमौ शयीत ।

❖नारायणबलिफलश्रुतिः❖

नारायणबलिर्ह्येष द्विजानां समुदीरितः
एवं यस्य कृते दत्तो बलिर्देवार्चनात्मकः॥
स याति नरकाँस्तीर्त्वा नारायणमनामयम् ।
पापानामितरेषान्तु बलिः पुण्यकृतामपि ।
परमात्मापदप्राप्त्यै कल्पते नात्र संशयः ॥
श्राद्धानामप्यलाभेतु एकं नारायणं बलिम् ।
कुर्वीत परया भक्त्या वैकुण्ठपदमाप्नुयात् ॥
अलाभेषु तु विप्राणां सर्वं कृत्वा स्वशक्तितः ।
केशवादीन् समुद्दिश्य नित्यान् मुक्तांश्च वैष्णवान् ॥
एकन्तु भोजयेद्विप्रं महाभागवतोत्तमम् ॥
पञ्चसंस्कारसम्पन्नो नवेज्या कर्मकारकः ।
आकारत्रयसम्पन्नो महाभागवतोत्तमः ॥
अर्चनं मन्त्रपठनं ध्यानं होमश्च वन्दनम् ।
मन्त्रार्थचिन्तनं योगो वैष्णावानाञ्च पूजनम् ॥
प्रसादतीर्थ सेवा च नवेज्याकर्म उच्यते ।
तस्मिन् सम्पूजिते विप्रे तुष्यन्त्येव न संशयः ॥
हरिश्च देवताश्चैव पितरश्च महर्षयः ।
वैष्णवानां हितार्थाय पाञ्चरात्रोक्त वर्त्मना ॥
एष संक्षेपतः प्रोक्तो वैष्णवेष्टिविधिक्रमः ।

युग्मकः

श्रीवत्सवंशतिलकाद्धिशुकाख्यसूरेः
संस्कारपञ्चककृताज्जनिमल्लता या।
श्रीभाष्यनीरकृतसेचन वर्धिता सा
गोपालजीमुतवराच्च विरम्यते हा।
पराङ्कुशीयबहुसूक्ति विनिश्चितस्य
ग्रन्थस्य लेखनकृतेः श्रमिता नवीना।
ग्रन्थस्य लेखन भवाञ्चतुरश्च दोषान्
क्षन्त्वा गुणान् प्रकरणेन पठन्तु सन्तः॥

श्रीवृन्दावनवास्तव्य श्रीमद्भागवतरहस्यज्ञ श्रीमत् सुदर्शनसूरि-
चरणचञ्चरीकेण दक्षिणदेशवास्तव्य श्रीमद् गोपालाचार्य
कृपालब्धोभयवेदान्तरहस्यकेन कौडिन्येन
श्रीपराङ्कुशाचार्येण सङ्कलिता (प्रसादिता)
वैकुण्ठचन्द्रिका समाप्ता
इति शुभम्॥

ग्रन्थकारको छोटो परिचय- न्यायव्याकरणधर्मशास्त्रपुराणज्योतिष-
वेदवेदान्तद्राविडवेदान्तादिका परमविशेषज्ञ ।

आचार्य-(१) श्री १००८ श्रीशुकदेवाचार्य स्वामीजी दीक्षा वृन्दावन उत्तर प्रदेश । (२)श्री १००८ श्रीगोपालाचार्य स्वामीजी शिक्षा नडिगड्डुम्पालेम आन्ध्रप्रदेश ।

मठ मन्दिरहरू- १ श्रीमुक्तिनाथ मन्दिर सहस्रधारा पाङ पर्वत ।
२ श्रीपरमवैदिक सनातन धार्मिक आश्रम रत्नेचौर म्याग्दी ।
३ श्रीलक्ष्मीहरि यतिराजमठ तिलकाना कालिका बर्दिया ।
४ श्रीलक्ष्मीहरि मन्दिर श्रीशुकदेव भागवताश्रम गैंडाकोट नवल परासी । ५ श्रीलक्ष्मीवैकुण्ठनाथ मन्दिर लङ्कुचितवन ।

लिखित संग्रहीत तथा प्रकाशितग्रन्थहरू-

१गुरुपरंपरा २लघुसन्ध्याविधिः ३ विशिष्टसन्ध्याविधि ४वैकुण्ठचन्द्रिका ५पितृयागपद्धति ६ हवनपद्धति ७ तिरुप्पावैसंस्कृतव्याख्या ८ तिरुप्पावैनेपाली टीका ९उपदेशरत्नमालानेपालीटीका १० वैकुण्ठशोडशी ११ जयन्त्यादिनिर्णय १२ प्रपत्तिद्वादशम् १३ ध्यानसोपान १४ प्रपन्नकण्ठमणिमालिका १५ असाधा-रणसंस्कारविमर्श १६ रहस्यरत्नावलि १७ यतिधर्मप्रभाव १८ आचार्यप्रपत्ति १९ प्राचीनयतिलिङ्गभेदभङ्गवाद २० लक्ष्म्यष्टोत्तरशतनामसहित विष्णुसहस्रनाम २१ मोक्षानन्द २२ द्वयचतुश्लोकी २३ विलक्षणमोक्षाधिकारको अनुवादात्मक पूर्वाचार्यसूक्तिसुधा २४ वैरागयमञ्जरी २५ रशस्यमुक्तावलि २६ प्रपन्नपारि जात २७ आकारत्रयसुधा २८ अर्चिरादिमार्ग २९ प्रपन्नसारावलि ३० श्रीकृष्णविरह ३१ भजनमाला ३२ ब्रह्मविचार ३३ अध्यात्मकथाप्रश्नोत्त-री ३४ सनातनधर्मकोपरिचय ३५ श्रीरामानुजशठारिहृदय ३६ नेपालगौरव ३७ सद्गुणोदय ३८ नित्यपाठमाला ३९ श्रीवेदस्तुति ४० श्रीलक्ष्मीहरि-परवासुदेवपरिचय ४१ गीतोपनिषद्सारसंग्रह ४२ गोदाभक्ति ४३ याग्यवल्क्य मैत्रेयीसंवाद पुरुषसूक्त उत्तरनारायण श्रीसूक्तको व्याख्या ४४ गद्यत्रय ४५ तैतिरीयोपनिषद्मापरविद्या अर्चिरादिमार्ग ४६ बृहद्विष्णुयागविधि ४७ लघुविष्णुयागविधि ४८ नित्यपद्धति ४९ मुलुमुरारीसंवाद ५० स्ववृत्तार्थ लघुप्रकाशिका ५१ सर्वफलप्रदसर्वश्रेष्ठसजिलोधर्म ५२ उठौं जागौं आदि ।

❖ परिशिष्टः ❖

श्रीवैष्णवसन्यासिनां

संक्षेपेण गर्तस्थापनविधिः

ब्रह्ममेधोक्तविधिना सन्यासिशवसंस्कारं कृत्वा गर्तञ्च त्रिदण्डमात्रायामं खात्वा पवित्रमन्त्रेण पञ्चगव्यैः प्रोक्षयेत्-

ॐ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामोऽश्नुते श्रृतासऽइद्वहन्तस्तत्समासते ॥

ततः कुशानास्तीर्य पञ्चरत्नोदकेन नारायणानुवाकेन संस्नाप्या-ष्टाक्षरेण वस्त्रगन्धपुष्पधूपदीपादीन् प्रदाय

ॐ विष्णो हव्यं रक्षस्व । इति शवं गर्ते निधाय

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदं समूढमस्यपा गुँ सुरे स्वाहा ॥ इति हस्ते त्रिदण्डं दत्वा

ॐ अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्टे महतो महीयान् शुक्रेण ज्योतींषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः ।

ॐ येन देवाः पवित्रेणऽआत्मानं पुनते सदा । तेन सहस्रधा-रेण पावमान्यः पुनन्तु त्वाम् ॥ इति मुखे कुशपवित्रं दत्वा सावित्र्या

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात् । चोदरे जलपात्रं दत्वा तस्मान्यासमेषामित्यादि (पृष्टोक्त १०२) महापुरुषविद्ययोपतिष्ठेत् ।

ॐ वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥इति शंखेन कपालं भेदयित्वा पुरुषसूक्तेन लवणेन गर्तम्पूरयेत् । श्वश्रृगालादिभ्यो रक्षार्थम्मृदा सम्यगाच्छादयेत् । तता द्वादशेन्हि वैकुण्ठोत्सवं कुर्यादिति ।

वैकुण्ठ चन्द्रिका २

पृ० पं० अशुद्ध	शुद्ध	पृ० पं० अशुद्ध	शुद्ध
६१ ५ नाम	नामन्	१ ६ चार्यः	चार्यैः
६३ ३ नैत्रृत्या	नैर्ऋत्या	२ ७ चार्यः	चार्यैः
६५ १४ होमं वेदीं	होमवेदीं	२ १२ सारण	सारेण
६५ १ गताऽपि	गतोऽपि	१ २० प्रति ११११	प्रति १०००
६७ १५ चारै सं	चारैःसं	१६ १८ तत्कार्यार्थ	तत्तत्कार्य
७१ १९ पिण्डानिति वाक्यमधिकं मुद्रितम्		१६ १८ प्रधो	प्रभो
७५ १,२२'। ७६ १। ७७ १३। ७८ ५।		१७ ९ गू	गूँ
७९ २३ सर्वत्र सुखा स्थाने नन्दा योजनीयं		१७ १४ सर्यस्य	सूर्यस्य
७६ २२ नन्दायम	नन्दाया	१८ ५ ततो□भि	ततोऽभि
८१ १ पिण्डनविधिः	सपिण्डनविधिः	१८ ९ पृष्टों अग्निः	पृष्टोऽग्निः
८३ ७ कूचौनि	कूर्चानि	१९ १५ पुष्प अक्षता	पुष्पाक्षता
८५ २३ मुद्धर्तु त्व	मुद्धर्तुन्त्व	२० २ सूय	सूर्ये
११३ १९ सवाण्युप	सर्वाण्युप	२० २० २१ गू गूं	गूँ गूँ
१०५ ५ लवणानेक	लवणानेक	२४ १ ऋतजा□	ऋतजाऽ
१०७ १५ नामाहास्मत्	नामाहमस्मत्	२४ १ अद्रिजा□	अद्रिजाऽ
१०७ १५ स्वरूपि	स्वरूपी	२४ ४ दूतो□	दूतोऽ
१०७ २० इति आसनं	इत्यासनम्	२७ २३ ब्रह्म	ब्रह्म
१०९ २ हस्तो□	हस्तोऽ	२८ १० च अन्या	चान्या
११० ५द्वितीय	द्वितीये	३० पृष्ठे नारायणानुवाकाऽस्ति	
११५ १ वृध्वास	वृद्धवास	३१ ८ श्रूयते□	श्रूयते
११६ २ द्रेवतामद्य	देवता अद्य	३२ १४ बह्म	ब्रह्म
११७ ८ त्रयी	नन्दा	३४ २ तत्र अग्निं	तत्राग्निं
९ सुखा	त्रयी	३४ २३ त्यिुत्तरे	त्युत्तरे
१० सुगन्धा	सुखा	३५ ४ नैत्रृत्या	नैर्ऋत्या
११ सुन्दरी	सुगन्धा	५१ १३ देश एष	देशे त एष
१२ विद्या	सुन्दरी	५१ २३ देश एष	देशे त एष
१३ सुशीला	विद्या	५५ १ सकुशानन्तिला	सकुशान्तिला
१४ सुलक्षणा	सुशीला	५६ १७ पण्डि	पिण्ड
१५ नीला	सुलक्षणा	५८ ३ कादाय	कमादाय
११९ १८ मृत्तिकाम् आदाय	मृत्तिकामादाय	५९ १५ दत्वाा	दत्वा
१२२ १६ वासो अग्ने	वासोऽअग्ने	६० ९ गोत्राामुक	गोत्रामुक
१२२ १८ वेदान् आवाह्य	वेदानावाह्य	६० ९ दिव.गत	दिवंगत

वैकुण्ड चन्द्रिका ३

पृ० पं० अशुद्ध	शुद्ध	पृ० पं० अशुद्ध	शुद्ध
१४२ २४ चारिण नमः	चारिणे नमः	१२५ १७ नैऋत्य	नैर्ऋत्य
१४५ १३ सर्वभते	सर्वभूते	१२६ ६ बह्मणो	ब्रह्मणो
१४९ १९ नित्या	नित्यानन्दा	१२६ १२ सत्सु एवं	सत्स्वेवं
" २० नित्या	नित्यानन्दा	१३१ १७ मनिरद्ध	मनिरुद्ध
१५१ १६ नित्या	नित्यानन्दा	१३३ ११ व्याहृतिन	व्याहृतिसहित
१६१ ३ महोदध	महोदधे	१३३ १७ त्यात्मने अनि	त्यात्मनेऽनि
१६३ १६ रहितस्त्व	रहितस्त्वं	१३४ ५ " "	" "
१६५ ११ प्रियगजेद	प्रियगर्वेद	१३६ ५ नसने अभि	नसनेऽअभि
१६८ १० बह्म	बह्म	१३७ ५ दक्रिव्णो	दधिक्राव्णो
१६९ २१ वैष्णावापि	वैष्णवा अपि	१३८ २३ कुक्षा	कुक्षौ

सूचना

४७ ७ पृष्टे वामनाय नमः ।तथा ४७ ८ श्रीधराय नमः । न्यूनमुद्रितौ नामाविमौ ।

मात्र्यर्थे योजनीयानीमानि वाक्यानि ।

६२,पृष्टे १८पंक्तौ अद्यामुकगोत्रायामुकनाम्न्या दिव गताया भगवदपचार भागवतापचारासह्यापचारनिवृत्तिपूर्वक श्रीलक्ष्मीनारायण सन्निधिप्राप्तये हवनपूर्वकममुकदिन संबन्धि पिण्डदानमहं करिष्यामि ॥

७४ पृष्टे १०,पंक्तौ अद्यामुकगोत्रोत्पन्नामुकप्रवरान्वितोऽमुक नामाह ममामुकायामुकगोत्रायामुकनाम्न्या दिवंगताया परमपदगमनाय सर्वबाध निवृत्तिपूर्वक परमपदप्राप्तये भगवत्कैङ्कर्यरूपेण षोडशव्यह पूजनपूर्वकहवन पिण्डदानञ्चाहं करिष्ये (करिष्यामि वा ।

७४ पृष्टे १९ पंक्तौ अद्यामुकगोत्रायामुकनाम्न्या दिवङ्गताय अस्मन्मातृस्वरूपाया भगवत्याः तृप्तये भगवदाज्ञया करिष्यमाणोत्तमषोडश पिण्डान्तर्गताद्योन मासिकेत्यादि..................... ....।

११७ पृष्टे क्रमेण ७ ८ ९ १० ११ १२ १३ १४ पंक्तौ त्रयीपुरुषोत्तमःसुख अधोक्षजः,सुगन्धा नारसिंहः,सुन्दरी अच्युतः,विद्या जनार्दनः,सुशील उपेन्द्रः,सुलक्षणाहरिः,नीला श्रीकृष्णारिति रूपेण पूर्वसंस्करणे प्रमादेन मुद्रितोऽ

विस्मृत्या मुद्रितोऽस्ति। तेषु स्थलेषु सर्वत्र नन्दा पुरुषोत्तमः, त्रयी अ...
सुखा नारसिंहः, सुगन्धा अच्युतः, सुन्दरी जनार्दनः, विद्या उपेन्द्रः ...
हरिः, सुलक्षणा श्रीकृष्णरितिरूपेण स्वयं नामानि संशोध्य योजयित्वा ...
कर्तुं प्रार्थयामि। प्रमादेनाज्ञबालकेन विस्मृत्या कृतेति विभाव्य ...
विद्वासोऽनुग्रहं वित-रन्तु। अग्रिम संस्करणे संशोध्य मुद्रयितुं प्रयति...

यतिधर्मोक्तप्रकारेण पूर्वसंस्करणे मुद्रिता यतिचरकसंस्कारप्र...
विषयाःस्वल्पप्रयोजनदर्शनात् कर्गतस्य कर्मकारकाणां जनानां पा...
मूल्यवृद्धेः कारणाच्च मुद्रणकार्ये द्रव्यालाभेनाधिकव्ययवृद्धिभिया नि...
वश्यकसमये मुद्रयितुं सुसांख्ययन्त्रे संरक्ष्य स्थापिताः सन्ति। यदा द्र...
भविष्यति तदान्यपुस्तकरूपेण प्रकाशयितुं प्रयतिष्यामि। विषय ...
तथावदेव पञ्चदशपुटके मुद्रितोऽस्ति।

१७२ पृष्टको पहिलो पंक्ती भन्दा पहिलेको वाक्यावली

ग्रन्थकर्ताको परिचय–

नामः– त्रिदण्डी शठकोप यतिराज रामानुज जीयर (श्रीप–राङ्कुशाचार्य) स्वामीजी।

कार्यक्षेत्र–नेपाल (रिडी वाग्लुङ नवलपरासी चितवन भैरहवा त्रिवेणी जुहाङ बर्दिया पर्वत र भारतका विभिन्नक्षेत्रहरु।

शिक्षा– वेद वेदान्त पुराण व्यारण धर्मशास्त्र ज्योतिष रामायण ... न्याय र द्राविडवेदान्तका विशेषज्ञ इत्यादि ।

विनय मति विनाको अज्ञ गोविन्द दास विवुध जनहरूले गर्नु पर्ने प्रयास
गरिकनजति यस्ले काम संपन्नपारो सुमतिजन सबैको टार्नखोजेर गा...
मतिरहित हुँनाले ग्रन्थमा दोष धेर अधिक कमिभए हुन् या भए हेरफेर।
सकल कमि हटाई पढ्नु होला प्रबुद्ध सुमति जनहरूले ग्रन्थ पारेर शुद्ध
जति कमि यसमाछन् शुद्ध पारेर हेरी विषय पछि सपाने यत्न गर्नेछु ...
अधिक कमिभएको माफबक्सिन्छ ज्ञानी विवुधजन सबैले अज्ञयो ...

श्रीमते रामानुजाय नमः श्रीवेदपुरुषाय नमः

प्राप्तिस्थान

१. श्रीशुकदेवभागवताश्रम श्रीलक्ष्मीहरिमन्दिर गैडाकोट नबल परासी ०५६-५०१८९८

२. श्रीवैष्णव परिषद केन्द्रीय कार्यालय श्रीरामानुजवेदविद्याश्रम गैडाकोट नवलपरासी ०५६-५०१०५५

३. श्रीमुक्तिनाथमन्दिर सहस्रधारा पर्वत ९८५७६३०२२०

४. श्रीलक्ष्मीबैकटेशमन्दिर बत्तिसपुतली काठमाण्डौ ०१-४४७२५७१

५. श्रीलक्ष्मीनारायणमन्दिर धनगडी, कैलाली फोन नं. ०९१-५२१५८४

६. श्रीयोगिराजकमलयनाश्रम श्रीलक्ष्मीनारायणमन्दिर माईधार सतासीधाम झापा ०२३-५५०३६७

७. श्रीरामकृष्णचार्य पी.ओ. पाचेखानी पाकिम पूर्वसिक्किम ००९१-९९३२०१००६१

८. डिम्भमुकुन्दाश्रम विराटनगर-३, शंकरपुर (शंकरषण नगरी) मोरङ ०२१-५३५८७८

९. श्रीलक्ष्मीनारायणमन्दिर पुण्यपिपलगाछी चौक, विराटनगर ०२१-४६१९८९

१०. श्रीलक्ष्मीनारायणमन्दिर, पाञ्चाली ०२१-५२३५७३

११. बैदिक संस्कार विर्तामोड, झापा ०२३-५४४४४९

१२. सम्पर्क फोनः ०२१-५३५८७८, ९८४२३९५३७२ गोविन्दाचार्य विराटनगर-३, शंकरपुर